দেবীভাগবত ৬ষ্ঠ স্কন্ধ ৩য় অধ্যায়, উপাখ্যান

SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

Fumigated AUG 1993

But thought nor word can seize eternal truth

VIII. F. 11. of Adyar Library.

श्री

(विवरणाचार्यकृतं)

प्रपञ्चसारविवरणं

(प्रपञ्चसारव्याख्यानं)

अवर्णविग्रहं देवं वर्णविग्रहवर्जितम् ।
वर्णविग्रहवेत्तारं नमामि स्तौमि संश्रये ॥

इह खलु लोकानुग्रहैकरसतया कृतशरीरपरिग्रहो भगवान् **शंकराचार्यः** अपरोक्षीकृतपरदेवतात्मतत्त्वः परमां विभूतिकाष्ठां प्राप्तः स्वयमेकान्तिकसंपद्यां सज्जमानो दुःखीकृतजनकारुण्याक्रान्तमानसश्च संस्तदनुग्रहाय समस्तागमसारसंग्रहं प्रपञ्चागमसारसंग्रहरूपं ग्रन्थं

विवरणे

चिकीर्षुरभिमतस्वकृत्यप्रयोजनसिद्ध्ये प्रथमतः परदेवतातत्त्वानुस्मरणलक्षणमाशीर्लक्षणं च मङ्गलमाचरन् ग्रन्थारंभौपयिकं विषयादिकमप्यर्थात्सूचयल्लूलच्चरत्नपद्याद्यैरित्यादिना। शारदा वश्चेतसः परिशुद्धिं वितरत्वित्यन्वयः। चित्ताधिसंघातव्यतिरिक्तायाः शारदायाः सत्वे सिद्धे संभवतीयमाशीः ॥

तदेव कुत इति विश्वकार्यकारणत्वेनानुमानादित्याह — विश्वयोनिरिति,, अपूर्वपरिणामत्वाभ्युपगमादृष्टस्य कर्मणोऽपि विश्वयोनित्वसंभवान्न शार-

(नु)

दासाधकमसमानीमिति चेन्न, कर्मणः कार्यत्वेनानित्यत्वात् जगन्मूलकारण-

त्वानु (त्वेनानु) पपत्तेः। अतो नित्यं किञ्चित् जगदुपादानं वक्तव्यम्। नित्यत्वंच सर्वसाक्षिण्याः शारदाया एव संभवतीत्यभिप्रेत्याह —— शाश्वतेति॥ सांख्यराद्धान्तसिद्धप्रधानस्यापि नित्यत्वात् तदेवास्तु जगद्योनिरिति चेन्न, अचेतनस्य प्रधानादेश्चेतनानधिष्ठितस्य कारणत्वानुपपत्तेः अतश्चिद्रूपिणी सर्वाधिष्ठानसमर्था शारदैव विश्वयोनिरित्यभिप्रेत्याह —— सकलेति॥ सकलं कारणं कलाभिः शक्तिभिः सह वर्तत इति जगत् कार्यं तयोः सकलजगतोरधीश्वरीत्यर्थः। अस्तु तर्हि शारदाधिष्ठितस्य परमार्थसत्त्वस्य प्रधानस्य जगदुपादानत्वं शार-

दायास्तोत्रि (स्तुति) मित्तमात्रत्वमेवेति सेश्वरसांख्यादिपक्षमाशङ्क्य सर्ववर्णतदर्थसमष्ट्यात्मकस्य प्रध्यानस्य शारदारूपचैतन्येध्यस्तत्वेन तद्व्यतिरेकेणासत्वाच्छारदैव तद्द्वारेण जगदुपादानं निमित्तं चेत्यभिप्रेत्य वर्णानां तद्विग्रहत्वेन तच्छेषत्वमाह — अकचटतपयाद्येरित्यादिना शरीरवत्वेनास्मदाद्याविशेषमाशङ्क्य शरीरग्रहणे स्वातन्त्र्यं (त्र्य) विशेषउक्तो विरञ्चितेति। स्वातन्त्र्ये हेतुमाह — सकलजगदधीशेति तर्ह्यधिष्ठातृत्वेन विकारित्वानित्यत्वादिदोषप्रसक्तिरिति. नेत्याह — शाश्वतेति ,, न तर्हि नित्येश्वररूपिण्याः शारदाया अधिष्ठातृत्वं

कारणत्वं वा नास्तीत्याशङ्क्य परमार्थतस्तत्वभावेऽपि मायाद्वारेणास्त्येव तदभ्युपगन्तव्यम्। पक्षान्तरेष्वेवं विश्वकारणत्वस्याप्यनुपपत्तेरित्यभिप्रेत्याह— विश्वयोनिरिति, अतः संघातव्यतिरि- चित्तादे- रिक्तायाः चिन्मात्रविग्रहायाः शारदायाः सत्त्वम्। तस्याः चित्तशुद्धिवितरणसामर्थ्यं च सिद्धमिति। मङ्गलाचारप्रकारः॥

स्थूलसूक्ष्मकारणसामान्यसाक्षिलक्षणः पञ्चविधोऽस्य ग्रन्थस्य विषयः। तत्र वैखरी तदर्थात्मकं विराड्रूपं स्थूलं विषयमाह—— प्रथमार्धेन आद्यैरिति पदं आद्यैः काद्यैश्चाद्यैरित्यादिप्रकारेण प्रत्येकं संबध्यते, मातृकाक्षरन्यास-

स्थानं वदन् विराजो व यवक्त्रमिमाह— विरचितमुखबोहत्यादिना — मध्यशब्दः पवर्गन्यासस्थानार्थः। आख्याशब्देन वर्गादिध्यातव उक्ताः। आख्यायन्त एभिरिति। हृ-शब्देन हृत्स्थबुद्धिवाचिना ज्ञानक्रियाशक्त्यात्मकः प्राणस्तत्कारणभूता मायाशक्तिश्चाभिहिता। कशब्देन सुखार्थेन परमात्मोक्त इति। यादिन्यासस्थानानि तेषां याख्यास्यं यादिन्यासे सस्थाने ध्यातव्यादियोगः। सर्वमन्त्राशेषतया जपादिः न्यासश्च सूचितः॥

ननु वर्गादिपरमात्मनस्त(नां त) स्य देवतात्मनो यादिन्यासेनैव साधकशरीरे सान्निध्याने सति किमवशिष्टाक्षर-

न्यासेनेति देवतावयवविशेषकल्पनार्थमि(रचनाकल्पने)ति ब्रूमः —

(पृथक्)

ननु प्रथमं सामान्यकल्पना पुनः विशेषकल्पनेति नियमोऽस्ति, येन लिपिन्यासस्य क्षकारि(रादि)त्वं स्यात्। सर्वदा नित्यमेव सामान्यविशेषरूपं हि देवताशरीरं तस्य साधकशरीरे सान्निध्विन्यासेनोत्पाद्यते। अतः (अ) प्रथममकारादिन्यासेनावयवविशेष(षेण) सान्निध्विस्मरणेन कश्चिद्दोषः॥

(पृथक्) ननु संहारक्रमेण मातृकान्यासे प्रथमं सामान्यसंहारः। पश्चाद्विशेषसंहारइति क्रमकोपः। उभयोरप्यामन्येव संहारात्॥

विवरणे

नच सामान्यसंहारेणैव संहृतत्वाद्विशेषाणां पृथक् संहरणं अनर्थकम्। विशेषसंहारक्रमचिन्तायाः कर्तव्यत्वात्॥

ननु वैखर्यात्मकस्थूलकथने प्रस्तुते प्राणादिरूपसूक्ष्मादिकथनमनुपपन्नम् ‡ न, तेन विना स्थूलमात्रेण व्यवहारासिद्धेः विराजोपि सर्वात्मत्वात्। अथवा प्राणशक्त्यात्मशब्दैरपि प्राणबुद्धिजीवस्थितिकराः स्थूलांशात्वाकारणादिशब्दवाच्याः कथिताः। अस्मिन् पक्षेऽक्षारगतबिन्दुनादादिभिः विराट्शरीरानुगतसूक्ष्मादिकथनमित्यवगन्तव्यम्॥

वात्वादि

रि.

ननु अकचटतपयाद्यैः विरचितमुखबाहूर्व्यादिनैवाभिहि (म) तत्स्थूलवि-

प्रथमः पटलः

षयासिद्धौ किमाधिकोऽन्यति। नैष दोषः॥ सौरस्थानिकौ स्था(स्था)निकस्नानाद्यनुष्ठानेषु लिपिन्यासभेदसूचनार्थत्वात् सौरस्थानिकानुष्ठानएकपञ्चाशद्वर्णानां प्रत्येकं न्यासः सूचितो कंचटतपयाद्यैः विरचितमुखबाह्वित्यादिना औत्था(स्था)निके वर्गमात्रस्य मुख~~अ~~बाहुपादहृदयनाभिहृत्सु व्यापकत्वेन न्यासः सप्तभिः विरचितमुखबाह्वित्यादिना स्ना(स्था)नादावकयादि वर्गत्रयस्य मुखम व्यापारेषु वर्गैर्विरचितेति भोजनकाले समस्तस्य समस्तकादिपाद्यान्त(न्तो) न्यासः सूचितो वर्णैः विरचितेति देशकालाद्यपेक्षया सर्वे वा सर्वत्र प्रयोक्तव्या इत्यभिप्रायः॥ सप्तभिर्वि-

च

रचितः॥

अथवा समस्तमन्त्रपारायणोद्धाराथोधिकोक्तिः। तथाहि— अकचटतपयाद्यैरकचटतपयवर्गसंबन्धिभिरकाराद्यैः षोडशस्वरैः विरचितमुखबाहुपादमध्यारव्यहृदयेति पञ्चाशद्वर्णानां (मक) प्रत्येकं षोडशस्वरयोग उक्तः। लिपिन्यासस्थानेषु षोडशदलानि पद्मानि सञ्चिन्त्य कर्णिकासु तं तं प्रथमं वर्णं विन्यस्य दलेषु तत्तद्वर्णानुबन्धषोडशस्वरान् न्यसेत्। न्यासप्रियो जपेच्च जपप्रियो ध्यायेत् (च) ध्यानप्रिय इत्यर्थः॥ ओं अं ओं नम इत्यकाराब्जकर्णिकायां विन्यस्य ओं अं अं नमः ओं अं आं नमः।

प्रथमः पटलः

ओं अं इमित्यादिकं दलेषु विन्यस्याकारपद्मकर्णिकायां ओं आं ओं नम इति न्यसित्वा ओं आं अं नमः, ओं आं आं नमः, ओं आं इं नमः इत्यादिकं दलेषु विन्यस्यावशिष्टाक्षरपद्मेष्वप्येवमेव न्यसेदिति स्वरपारायणन्यासादिमन्त्रक्रमः ॥ स्या ई

अथ व्यञ्जनपारायणक्रमः ॥

अकचटतपयाद्यैरुक्तैः विरचितमुखबाहुपादमध्याख्य हृल्लेति विविध्यरचनम् । ओं अं अं नमः । ओं अँः कं नमः । ओं अँः खं नमः । इत्यादि क्षान्तम् न्यसेत् । पूर्वोक्ताकारपद्मदलस्याकारपरिवारत्वेनैषां न्यासः । आं अं नमः । आं कं नमः । आं खं नमः । इत्या इत्याद्याकारपरिवारत्वेन इं अं नमः इं कं

नमः। ईं खं नमः। इत्याद्यीकारपरिवारत्वेनेत्यादि विसर्गान्तं समानम्। पुनः कं अं नमः। पुनः कं कं नमः। कं खं नमः। कं गं नमः। इत्यादि ककाराम्बुजदलस्थककारपरिवारत्वेन कां अं नमः। कां कं नमः। कां खं नमः। कां गं नमः। इत्यादि काकारपरिवारत्वेनेत्यादि समानम्। पुनः खं अं नमः। खं कं नमः। खं खं नमः। खं गं नमः। इत्यादि खाम्बुजदलगतखकारपरिवारत्वेनेत्यादि सर्वमूह्यम्। इति ब्रह्मब्रह्मपारायणक्रमः। अं ओं नमः। अं कां नमः। अं खां नमः। इत्यादिरूपो ब्रह्मविष्णुपारायणक्रमः। अं इं नमः। अं किं नमः। अं खिं नमः। इत्यादिरूपो ब्रह्मरुद्रपारायणक्रमः। अं ईं नमः। अं कीं नमः। इत्यादि विष्णुब्रह्मणः

1 x अं ऐं नमः अं कैं नमः इत्यादि रुद्रसर्वेश्वरस्य.

प्रथमः पटलः

अं उं नमः अं कुं नमः इत्यादि विष्णुविष्णोः
अं ऊं नमः अं कूं नमः। इत्यादि विष्णुरुद्रस्य
अं ऋं नमः। अं कृं नम इत्यादि रुद्रब्रह्मणः
अं ॠं नमः। अं कॄं नमः इत्यादि रुद्रविष्णोः।
अं अं (ऌं) नमः। अं कॢं नमः। इत्यादि
रुद्ररुद्रस्य अं ॡं नमः। अं कॣं नमः इत्यादि
ब्रह्मसर्वेश्वरस्य अं *एं नमः। अं कें नमः। इत्यादि
1 विष्णुसर्वेश्वरस्य x अं ओं नमः। अं कों नमः।
इत्यादि सर्वेश्वरस्य, ~~ओ~~ अं औं नमः। अं कौं
नमः॥ इत्यादि चतुर्मूर्तेः। अं अं नमः। अं कं
नमः। इत्यादि साक्षिणः अं अः नमः ^ इत्यादि अं कः नमः ^
परब्रह्मण इति पारायणक्रमः॥ पारायणक्र-
मवन्मः (नियमम) न्नाभेदानामपि अक्षरविरचनारूपत्वात् सोऽपि विरचिते-

त्यनेनैव सूचितः॥
अथ तत्तन्मन्त्रभेदेन पारायण-
क्रमभेदमाह — अकचटतपयाद्यैरित्यादि-
ना अकचटतपयाद्यैरुक्तैः सप्तभिश्च वर्णव-
म
र्गैः मन्त्रवर्यैः विरचितमुखबाह्वाद्यादिसमानमन्त-
सप्त
त्रा ब्रह्मा सरस्वती विष्णुः श्रीरुद्रो मासर्क्षैश्वरमन्त्रा-
वर्गा उक्तपारायणमन्त्रान्ते तांस्तान्मन्त्राननुसृत्य
मू अ
न्यासादिकं कर्तव्यमित्यत्र मनन्तवैखरीत-
ध्यमसदर्थ दर्थरूपस्थूलप्रपञ्चनेन। अथ मध्यमा त-
दर्थहिरण्यगर्भविन्दुरूपं सूक्ष्मं विषयमाह—
सकलजगदध्यीशेति कलाभिरवयवैः तत्-
भुवनकला वर्णपदमन्त्ररूपैः संहताः सन्तो जा-
यन्तइति सकलजा जीवाः तेषां गदध्यियोः
ओतदति सकलजगदध्यीशा, गदशब्देन वा-

स्वान्तिना तन्निर्वर्तकः प्राणः क्रियाशक्तिमात्रामोच्यते —— धीशब्देन ज्ञानशक्तिमत्रं तयोः शायनं च तदनुगतस्वातन्त्र्यात्मेच्छाशक्त्यात्मना ततश्चेच्छाक्रियाज्ञानशक्त्यात्मको हिरण्यगर्भः प्रकाश्यप्रकाशकरूपाभ्यां मध्यमा वाक् तदर्थात्मा सूक्ष्मरूपो विषय इत्युक्तं भवति। अत्र सकलशब्देनैव मध्यमान्तर्भूतानि नाद शून्यस्पर्शादि ध्वनि बिन्दुशक्ति बीजाक्षराण्युक्तानि, तानि मूलाधारलिङ्ग मूलनाभिहृत्कण्ठलंबिका भ्रूमध्यकपालेषु न्यस्तव्यानीति। इच्छादित्रितयं शिरोदक्षिणवामस्तनेषु शान्तिमूलाधारे वामा ज्येष्ठा रौद्र्यम्बिकाकृत तेष्वेवं न्यस्तव्याः। वैखरीन्यासात् पूर्वमेवेति मध्यमान्यासप्रकारः॥

विवरणे

द्रुपोप

अथ पश्यन्ती तदर्थात्मकं तपउपचयादिशब्दवाच्यं कारणात्मनः सृष्ट्याभ्युन्मुखं रूपं कारणशब्दोक्तं नादात्मकं प्रकाश्यप्रकाशकरूपेण वागर्थात्मकं विषयमाह शाश्वतेति। आदिसर्गादिमहाप्रलयानवस्थानात् सदादिरूपत्वाच्च शाश्वतत्वमवगन्तव्यम्। महासत्तायै नमः। महासंविदे नमः। महानन्दायै नमः। महेश्वर्यै नमः। इति मूर्धस्तन हृन्मूलाधारेषु पश्यन्तीन्यासोऽनेन सूचितः। अथ परा तदर्थात्मकं सामान्यरूपमात्मा विमर्शान्तर्मुखकारणात्मकं शक्तिरूपं विषयमाह — विश्वयोनिरिति॥ व्यापकत्वेनास्यान्यासः। एवं वागर्थात्मकचतुर्विधविषयकथनेनैवाविशिष्टमप्यप-

व्यव

प्रथमः पटलः

हार्थं विषयं लक्षणयोक्तमवगन्तव्यम्। भुक्तिमुक्तिलक्षणं प्रयोजनमाह — शारदेति॥ शीर्यत इति शारं स्थूलादिलक्षणं कर्मफलं तद्ददातीति शारदा, तत्कारणं चाज्ञानाविद्याधिकरणा सती द्यति खण्डयतीति च शारं ददाति शारदेति एवं प्रयोजनद्वयपरतया व्याख्येयम्। प्रयोजनकथनेनैव सामान्यतस्तत्तत्कामिन्यधिकारिणि सिद्धे अधिकारविशेषः सूचितो वितरविद्यादिना शुद्धान्तःकरणो गुरुणा केनचिद्दीक्षाप्रकारेणानुगृहीताधिकारित्वाभिलक्षणवानिकदीक्षाकरणेनोक्तं भवति॥

तत्राणवी दीक्षा। अणुभिः मन्त्रैः क्रियमाणानेकविधा तच्चोक्तचतुर्विधलिपि-

न्यासानामेकेन शिष्यशरीरमशुद्धं संहृत्य शुद्धं सृजेदिति न्यासरूपाणवी दीक्षाप्रकारः। होमादिपूर्वकं तूत्तरत्र भविष्यति। स्वशक्तिसूत्रेण शिष्यदेहं प्रविश्य त-
तत् त्रलसंहारं कृत्वा तं परदेवतारूपं भावयेदिति शाक्तदीक्षाप्रकारः, सकलजगदधीशेत्यादिपदत्रयेण सूचितः। सा च बहुप्रकारा चाक्षुषी स्पार्शी वाचिकी मानसीत्यादिप्रकारभेदात्। शांभवदीक्षा केवलस्वरूपस्थितिमात्रेण शिष्यसर्वदे~~ह~~हस्त्रग्रसनरूपा शारचेत्यनेनोक्ता। संबन्धस्तु विषयकथनेनैव विषयविषयिभावः सूचित इति विषयादिमत्वात् ग्रन्थस्यारंभणीयत्वे सिद्धेयमुत्तरश्लोकावतारः। शार-

दा जगद्योनिरित्युक्तं तदनुपपन्नम्॥ पुरा श्री णादिषु त्रिमूर्त्तीनां जगत्सृष्ट्यादिहेतुत्वावगमादित्याशंक्य पुराणादिष्वेव मूर्त्तीनां सृज्यत्वावगमात् परमकारणत्वानुपपत्तेस्तद्व्यतिरिक्तया शारदया परमकारणभूतया भाव्यमिति मन्वानास्त्रिमूर्त्तीनां ततः उत्पत्तिं वदन् विद्यास्तुत्यादिप्रयोजनयाख्यायिकया ग्रन्थमारभते — अथेति। सृष्टिनेत्रककमौलिमुख्योन्मुख्यानन्तर्यार्थको थशब्दः ब्रह्महरीश्वरास्तदाख्यात्रीति समासः। तेषामौपाधिक्युत्पत्तिः न पारमार्थिकीत्याह — पुराभवन्तीति। शरीरेणेत्यर्थः। प्रथितमत्तीति प्रधानशब्देन प्रकृतिपुरुषकालास्तद्वान्-

हेतु

[illegible]

विवरणे

को हकारश्चोक्तः। कदा सृष्ट्यौन्मुख्यं कर्मणइति तत्राह—प्रलयावसानइति। उत्पत्तिवद्भेदोप्यौपाधिकस्तेषामित्याह—गुणेति॥ तेषामुत्पत्तिप्रयोजनमाह—जगत्इति, जन्येति कार्यत्वेन सृष्ट्याद्यपेक्षत्वं सूचितम्। एकैकस्यापि त्रितयहेतुत्वश्रुतेः कथमेकैकहेतुत्वोक्तिरिति तत्राह—स्पष्टेति, प्राधान्येनेत्यर्थः। सृष्ट्यादौ विनियुक्ताः चतुर्मूर्त्तिवाचका मन्त्राश्चात्रोद्धृताः॥ तथाहि—ब्रह्महरीश्वराख्याइति ब्रह्मविष्णुसदाशिवसर्वेश्वरशब्दाः मूर्त्तिमन्त्रान्तर्गताः सूचिताः। ध्रुवेति, स्थूलविराट्शरीरस्य विश्वे वैश्वानरात्मने सूक्ष्महिरण्यगर्भशरीरस्य तैजससूत्रात्म-

ने सौषुप्ताशानशरीराय प्राज्ञेश्वरात्मने व्याकृताव्याकृतशरीराय प्रत्यग्ब्रह्मात्मने नाम इति मन्त्रापदानि सूचितानि । अत्र पुरा वचनेनैव पुराभिमानिनामपि ग्रहणं कृतम् । तयोः नित्यसंबन्धत्वात् प्रध्यानादिति मन्त्राणां शक्त्यानन्तर्यं सूचितम् । प्रकृत्यावस्थानइति शक्तेः व्यस्तसमस्त प्रणवानन्तर्यं गुणप्रभिन्नाइति स्थूलादिपदात् पूर्वं रज उपाध्ये सत्त्वोपाध्ये तम उपाध्ये गुणसाम्योपाध्ये इति मूर्तीनां पुरस्तात् सरस्वतीसहिताय सर्वज्ञाय सद्यात्मने सङ्गयारवण्डसंविदे परमात्मने नमः । लक्ष्मीसहिताय सर्वज्ञाय आनन्दात्मने सङ्गाद्वयसंविदे परमात्मने नमः । उमासहि-

ताय सर्वज्ञाय चिदात्मने सङ्गापरोक्षसं-
विदे परमात्मने नमः। मूलप्रकृतिमाया-
रहिताय सर्वज्ञाय सदानन्दनित्यात्मने
सङ्गाखण्डाद्वयापरोक्षसंविदे परमात्मने
नमइति च योगः सूचितः॥

अत्र परमात्मपदात् पूर्वमिष्टदेवता-
नाम योज्यम्। जगतोऽस्येति मूर्तीनां पूर्व-
भागे सर्वस्रष्टृ सर्वपालकाय सर्वसंहर्त्रे स-
र्वोत्पत्तिस्थितिसंहारकर्त्र इति योगः सूचि-
स्त्व तः। मूर्त्यपवादमन्त्रास्वारोपमात्रसूचना-
देव सूचितः। ओं ह्रीं ओं ओं ओं निरवद्य-
निर्गुणाय वीर्याशरीरायासङ्गप्रत्यगद्व-
याय स्वाभासावभासितकृत्स्नायास-
ङ्गबोधायाखण्डाद्वयापरोक्षसदानन्द-

नित्यात्मने स्वबोधध्वस्तानर्थाद्वैताया निरालम्बना बिम्बायाहीनमहोदयाय परमात्मने नमः। इत्यपवादमन्त्रः॥ प्रध्यानाद्भवन्नाख्या गुणप्रभिन्नाइति परैः विशिष्टकुले प्रसूता गर्भाधानजातकर्मनामकरणादिसंस्कारविशिष्टा गुणिनो जगदुपकारका वक्ष्यमाणविद्यास्वधिकारिण इति विद्यास्तुतिः कृतावबोद्धव्या॥२॥ ते किमकुर्वन्नित्याकाङ्क्षायां तद्वृत्तान्तं वदन् अन्नत्वादीणि न तेषां परमकारणत्वमित्याह — स्वनिष्पत्तिमिति। निष्पद्यते तस्मादित्युपादानं निष्पत्तिः निमित्तार्थेत्वशब्दः कृत्यं चेति च शब्दस्वरूपार्थः, विचिन्त्याज्ञातेन स्वयं निर्णेतुमशक्ता गु-

णवतन्त्रोणाधि मायिनं वक्तारं स्वमाविदन्नित्यर्थः। तस्य निर्णयसामर्थ्ये मूर्तिवैलक्षण्यं हेतुमाहाज्ञामीति। अज्ञो हेतुरन्यकमिति। अरूपत्वं तत्र। एवं निर्विशेषस्य तस्या वक्तृत्वमिति मायासंबन्धात् कथञ्चित् सविशेषत्वं प्राप्येत्याह मायिनामिति। तत्पारवश्यावहत्वेन वक्तृत्वासामर्थ्यमाशङ्क्य निराचष्टे विभुमिति॥ विचारक्षमा गुरूपसदनादियुक्ताश्चाधिकारिणः। गुरुश्च निग्रहानुग्रहादिशक्तिमानित्यनुसूचितम्॥३॥

कथं

अत्र मायिनोपि स्थानमूर्तिविशेषादिसंबन्धाभावे वक्तृत्वमाशङ्क्य क्रमेण तत्सर्वं संपादयति। मूर्तीत्यादिना। मूर्तिमी-

भेद

याशक्तिबीजमास्यमन्ताद्भासते इत्याभासः प्रणवः। तेन मन्त्रेण विग्रहभूतेन दुग्धाब्धावनन्तभोगे शायितमित्यन्वयः। सर्वेश्वरप्रणवौ पार्थिकमित्यर्थः। ~~द्व~~ द्योमिति सर्वेश्वरप्रणवः ते समाविद्धीति। त्रिमूर्तयोऽस्य मुनयः सूचिताः। छन्दश्च दैवी गायत्री गायकत्राणकथनात् सूचितम्। स्वामिन्! प्रसीद विश्वेशेति, देवतां च सूचयिष्यति। मूर्त्याभासेनेत्यङ्गदेहन्यासौ सूचितौ। तथाहि—— मूर्तिसंबन्धित्वेनाभासन्त इति मूर्त्याभासा ह्रामादिकाः सप्रणवा अङ्गानीत्यङ्गसूचनाप्रकारः। भेदे मूर्तौ मूर्तिभूते मूलमन्त्रे अनुगतया भासन्तीति मूर्त्याभासा ब्रह्मसर्वेश्वरादिम- त

न्त्राः ह्रौं ह्स्रौं ह्स्रौमित्येवंरूपाः नाभिहृद्भ्रूमध्येष्वेषां न्यासः। मूलाधारमूर्ध्नोः मूलन्यासः। ध्यानप्रकारस्तु दुर्गेध्यानित्यादिनोक्तः। तस्य च यथाश्रुतोऽर्थः स्पष्टः। अध्यात्मार्थः मूर्तिर्माया आभासस्तदभिव्यक्तश्चैतन्याभासः, स्वच्छत्वगंभीरत्वगुणयोगात् दुग्धाब्धिशब्दोदितस्त्रिमूर्तिशुक्लवाभासिनः शायिन आभासस्य द्रष्टृत्वं तृतीयार्थः। तस्य तद्बुद्धौ स्फुटत्वे गमकमाह झषेति, झषशंखशब्दाभ्यां क्रियाज्ञानशक्ती ब्रह्मोपलक्षणभूतेऽर्थोऽभिकल्पसाम्येन लक्ष्यते। तस्य तत्र स्फुटत्वे तत्स्वरूपलक्षणभूतसुनाद्याभिव्यक्तिं हेत्वन्तरमाह —— मरुदिति, मरुतोऽन्तर्या-

ग्वाक्षौं

मिणः प्रेरणोद्भूताः सुखत्याग-जनिताश्चित्तवृत्तयो लहर्यः तासु व्यक्तैः सुखलवैर्निस्तापइत्यर्थः। ।४॥ बुद्धावीश्वरसद्भावमुपपाद्य तत्र तदभिव्यक्तिविशेषे कारणमाह— 4

उद्यद्विति, उद्यन्तो विकारित्वस्य प्रचारप्रकारैः प्रशान्तसंस्कारोदय इत्यर्थः। विवेकज्ञानविलं संस्कारं मान्द्यमभिध्याय तत्फलभूतामानन्दाभिव्यक्तिमाह— पूर्णेति— परमानन्दाकारसंबन्धेन प्रतिबुद्धध्यजडाशये प्रातिलोम्येन विषयपरित्यागेनान्तर्मुखतया बुद्ध्याः प्रवृत्ता जडविषया आशाया वृत्तयो यस्मिन्स तथोक्तः ॥५॥

अतएवानन्तं ब्रह्मभुङ्क्ते इत्यनन्त-

भोगः। अनन्ताकारवृत्तयः पुनः पुनराविर्भवन्त्यः फणायुतशब्दार्थः शायितमभिव्यक्तं। तच्छाभिव्यक्तं मायितं हेतुमाह— शार्ङ्गिणमिति। शरणाक्रमणाद्गमनाच्च मायाशार्ङ्गं तद्वांश्च शार्ङ्गी॥ ६॥

विष्टरश्रवसं विस्तरावेद्यास्तेषु श्रवः श्रवणं यस्य स तथोक्तः। विस्तीर्णकीर्तिं वा स्तोतव्यत्वमाह— विभुमिति। सूक्तिभिरुक्तैर्मन्त्रैस्स्तुतिभिश्च प्रीत इत्यर्थः। तत्र जायमानो भक्तिपरवशचित्ताः अप्योकारणः। स्वामिन्निति प्रसादकर्तव्यतासूचनं प्रसादे स्वातन्त्र्यं प्रसन्नस्याभीष्टदानसामर्थ्यं च सूचितम्। विश्वेशेति, के वयमिति, किं नित्या? उतानित्या? इत्यर्थः।

यदि नित्यास्तर्हि केवलं किंस्वरूपा इत्यावृत्त्या योज्यम्। यद्यनित्यास्तर्हि केन निमित्तकारणेन भाविताः किं मूलाः किमुपादानाः किं क्रियाः किं व्यापाराः स्वरूपेण नित्यानामप्यौपाधिकमकार्यत्वमस्तीत्यनित्यत्वपक्षमाश्रित्य शार्ङ्गी निमित्तोपा- ॥७-१६॥
दानादिकं संग्रहेणोक्तवानित्याह—

इति पृष्ट इति प्रमिताक्षरं प्रकर्षेण मीयते मिनोति। परिच्छिनत्तीति क्रमेण प्रकृतिपुरुषकालाः प्रमिताः। प्रमितानां वाचकमक्षरं मिता!
तदभिन्नं प्रमिताक्षरं। परा वाक् सतत्वाहंकारमित्यर्थः। तस्य बीजबिन्दुनादरूपेण प्रकृत्यादिवाचकत्वं द्रष्टव्यम्। अहंमननरूपेण वा। तत्र प्रकृतिरुपादानमितरौ,

निमित्तमिति शार्ङ्गिणोभिप्रायः। येति।
संग्रहेणोक्तेप्युत्तरे तेषामप्रतिपत्तिमा-
लक्ष्य शार्ङ्गी स्वाभिप्रायं विवृणोति—
यूयमिति— कार्यप्रश्नोत्तरं सृष्टीति। निमि-
त्तप्रश्नोत्तरं तैरिति। एकैकस्य केवलस्यो-
पादानत्वाद्यनुपपत्तेः मिलितैव तेषां का-
रणत्वमित्युक्तम्। तैरेवेति। उपादानत्व-
मुपपादयति— तेष्विति। अत्र तैरेवेति ब-
हुवचनप्रयोगाद्यूयमक्षरइत्यत्रापि प्रकृति-
पुरुषकालाहङ्कारा उत्तरत्र वक्ष्यमाणा न
क्षरन्तीति व्युत्पत्त्या रूढ्या चाक्षरशब्दे-
॥१७॥१८॥ नोच्यन्त इति गम्यते। अक्षरशब्दोक्तं सर्व-
मेकीकृत्य पृच्छत्यक्षरं नामेति। किं नित्य-
मुतानित्यमिति प्रश्नार्थः। अनित्यत्वे कुतो

जातं नित्यत्वे किमात्मकमित्यर्थः। सर्वेषां ॥१९॥ नित्यत्वपक्षमाश्रित्य वाचकस्य तावन्नित्यसमस्तशब्दानुगतं स्वरूपमाह— मूलार्णमिति। अथवा वाचकप्राधान्यमाश्रित्य वाच्यवाचकाभेदमाश्रित्य वा सर्वेषामेव नित्यं स्वरूपमाह— संग्रहेण मूलार्णमिति। प्रकृतमक्षरशब्दं परित्यज्यार्णशब्दप्रयोगादन्ते हकारप्रयोगाच्च वाचकसर्वात्मकत्वादिकमेवात्रोच्यत इति गम्यते॥ ?

वाच्यानामुत्तरत्र पृथक्सर्वात्मत्वकथनाच्च मूलार्णं शक्तिबीजं केवलमर्थसिद्धं वा। एवमुत्तरत्रापि अर्णविकृतिहकाररेफमायार्णविकृतित्वेन वक्ष्यमाणाः

विवरणे

स्वराः विकृतीनां स्वराणां विकृतिः। कादीक्षान्ता विकृतेर्विकृतिः। तत्प्रभिन्नानि तेभ्यो वर्णेभ्यो निष्पन्नानि मन्त्राणि तेषामङ्गं लेन प्रयुज्यन्तइति प्रयोगः। अङ्गन्यासादिपूजा मन्त्राः। षट् कर्मलक्षणा वा प्रयोगाः तान् सर्वान् ह इत्थमोहत्यन्वयः। हकारो क्षकार हकारात्मा तयोश्चाद्यन्ताक्षरयोः प्रत्याहारग्रहणन्यायेन गृहीतेतरवर्णयोः नादाकाररूपेण बुद्धिप्राणरूपेण ज्ञानक्रियाशक्तिरूपेण प्रकाशविमर्शरूपेण चिदानन्दरूपेण वा सर्ववर्णाद्यनुगमात् सर्वेशब्दार्थसमष्ट्यात्मकपरा वागात्मत्वेन सर्वात्मत्वात् प्रकृतिपुरुषकात्मत्वं नित्यत्वं चावगन्तव्यम्। एवं ११८ वाचकस्याक्षरस्य नित्यत्वं सर्वात्मत्वं स्व-

रूपं चाभिधाय वाच्याक्षराणामपि तत्क्रमेण
प्रतिपादयति। प्रकृतीत्यादिना। चकारौ पु-
रुषकालादिसंबन्धभेदसमुच्चयार्थौ न।
कालस्य पृथक् ग्रहणं निमित्तत्वद्योतना-
र्थं प्रकृतिपुरुषकाला द्विविधाः। परापर-
भेदेन विचिकीर्षुः स्वसंवेद्यस्वरूपाया-
युष्मानापि बहुना किं परं पुंसः। सा तु
कालात्मना लवादिप्रलयान्तइत्यादिवा-
क्यविशेषात् सप्तमेति। नित्यत्वउपपत्ति-
विपर्यये ऽनवस्था लक्षणात्वस्यैव प्रति-
पत्तव्येत्युक्तम्। प्रकृतेः स्वरूपं व्याप्तिं चा- ॥२०॥
घाणोरित्यादिना। अण्वादिषु सामान्य- (V/38)
तो व्याप्तिमाह—— व्याप्नोतीति। अधिज्योति-
षमधिविषयमधिगुणमधिभूतमध्यात्मं च

विवरणे

क्रमेण व्याप्तिमाह — आदिरेखादिना — अन्तरा मध्ये इन्द्रियरूपेण अन्तः अन्तःकरणप्राणादिरूपेण बहिः सप्तधातुरूपेण देहिनां देहपूरणीत्यर्थः। कथं ~~तर्ह्येवं~~ तर्ह्येवं निर्विशेषाया अस्या धारणं रूप ~~[illegible]~~-मुपलब्धम्। शक्यत इति देशिकेनाचार्येण दर्शितैरुपायैः परप्रकृतिरूपसाक्षिस्वरूपे-
॥२२॥२३॥२४॥ णेत्याह — स्वसंवेद्येति। सा लब्धेत्यत्र लब्धुः स्वात्मप्रत्यक्षायोपपादकं गमकमाह — यथेति। आकाशं कार्यमात्रोपलक्षणं तत्कारणं जडरूपा पराशक्तिः वापीति सबाह्यरूपशब्दाद्यगोचरा॰। तस्याः स्त्रीलिङ्गव्याप्तिमाह — पुंनपुंसकयोरिति त्रिषु तुल्यापीत्यर्थः। अङ्गनासु प्रसवधर्मि-

२, त्वाविशेष० ।, गुणभूतादिरूपेण त्रिष्वपि तु- ॥२५॥
ल्यत्वं शब्दतोपि त्र्यात्मकत्वं गम्यत इत्या-
ह —— प्रधानमिति ॥ पुल्लिङ्गत्वान्न काना-
मप्युपलक्षणमेतत्। किं बहुना जगत्कारण-
भूतान् युष्मानपि मद्वशंभात् कम्बलीकरो-
ति स्वेत्याह —— युष्मानपीति। मां निखिलव-
षृभ्यया युष्मानप्यतिवर्तत इत्यन्वयः ॥ त्वद- ॥२६॥
नतिक्रमे किं कारणमित्याशङ्क्य मयि कल्पि-
तत्वेन तस्या मद्व्यतिरेकेणाभावादिति
वदन् परं पुरुषमाह —— स्वाहमिति, अस्म-
दतिक्रमे किं कारणमित्याशङ्क्य युष्माकं वि-
षयवत् प्रकृतिकार्यत्वेन तस्यां कल्पितत्वा-
दित्याह —— यूयमिति ॥ तत्रागमक्रमाह ——
प्रवक्ष्यतीति ॥ २७॥

विवरणे

ननु प्रलयेपि तस्याः साधकं बुध्यादिकमभ्युपगन्तव्यमिति नैवेत्याह — सैवेति,, सैव परमा साक्षाल्लक्षणा परा प्रकृतिः पूर्वाक्रान्तवयं वेद्यस्वरूपेति, स्वां स्वरसम्बन्धिनीम परां शक्तिं वेत्ति। तस्या नान्यो बुध्यादिलक्षणो वेदितास्तीत्यर्थः। अथवा तस्याः पराया अन्यो वेदिता नास्तीत्यर्थः। अस्त्वेवं प्रलयकाले स्थितिकाले तु वैपरीत्येन तत्रापराया बुध्यादिविशिष्टतया बोधशक्तिमत्त्वादिति। नेत्याह — स्यात्विति, तुशब्दोऽपराया जडत्वलक्षणविशेषद्योतकः। कालात्मना ज्ञानात्मना ॥२८॥ सम्यक् साक्षितयाऽनवधानेन पूर्वं परकालस्यापि स्वरूपमभिध्यायापरं कालं प्रसूतेति लवेति। भिन्नैरिति। चतुरिन्द्रियैकसह-

स्त्रे॰ कृतादि युगकल्पना तेषां सन्धिसन्ध्यंशौ तावच्छतैरित्यर्थः॰। त्वमपीति" एतौ हरिहरावपीत्यर्थः॰। तेषां जीवनकालस्याल्पत्वमाह— वैराग्यार्थेत्वमायुरिति निश्वासादिमतस्तनापि तद्घुत्क्रमेण कालपरिच्छेदः॰स्यादिति न। कालस्य कालान्तरायोगादित्याह— कालेनेति। अथवा एवं विषममायुः कल्पयतः कालस्य वैषम्यनैर्घृण्ये स्यातामिति न, पुरुषकर्मानुसारेण तस्य प्रेरकत्वादित्याह— कालेनेति, वक्ष्यमाणप्रकारेण प्रचोद्यतइति वार्थः॰। प्रकृतिः॰पुरुषश्चेत्यादेरन्योर्थः॰ प्रकृतिपुरुषकाला अकारोकारमकाराः॰ हकाररेफमाया वा ते नित्याः॰ वक्ष्यमाणप्रयोगेषु नियमेन प्रयोज्या इत्यर्थः॰। सन्तमेति योगौ-

विवरणे

[illegible]चितेन बिन्द्वादियोगः सूचितः ॥ आणवं योगमाहाणोरणीयसीति मूलाधारगतत्रिकोणमध्ये परमाणोरप्यणीयसी प्रकृतिर्ध्येया- (V.1.33) काराकारेणेत्यर्थः । ततस्तस्याः प्रभारूपेणाकाशादेरपि व्यापकउकारश्चिन्त्य इत्याह— स्थूलादिरिति । ततः सर्वजगन्मकाराकारेण तत्र मज्जनीयमित्याह— व्याप्तेति, व्यामकमयोगमाह — आदित्येति, चिदग्निव्याप्तसौषुम्नमार्गमणीपूरकानाहतादौ ब्रह्मरन्ध्रेष्वग्निसूर्यसोमब्रह्मधामानि सञ्चिन्त्य सर्वानुगतां कुण्डलिनीं ध्यायन् क्रमेणाविद्याद्य बिन्दुनादादिना व्यापिन्यादिद्वारेण विभुर्भवेदित्यर्थः । गुणयोगं भूतयोगं चोत्तरस्मिन् श्लोके वदंस्तयोर्गुणभूतयोः वर्ण-

योः नामनियममाह — न श्वेतेति। गुणादियोगमाह — न गुणेष्विति। पूर्वोक्तमण्डलस्थानेषु खादिगुणगणमेकवर्णज्योतिर्लिङ्गवत् ध्यायन् पूर्ववत् स्वरूपस्थो भवेदिति गुणयोगः। हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रद्वादशान्तेषु मण्डलदीपाधिष्ठातृसहितान् पृथिव्यादिकारणान्तान् कुण्डलिनीप्रभावेनैकवर्णीं ध्यात्वा संयोजयेत्। अयं भूतयोगः। ॥२४॥ अस्यैव योगस्य स्वरूपपर्यन्तव्याप्तिक्रममाह — अन्तरेति। समस्तरन्ध्रद्वारेण सबाह्याभ्यन्तरं व्याप्योन्मन्यन्तं गत्वा देहिनां देहसंहर्त्रीत्यर्थः। एवं देशिकदर्शितैरुपायैः परमात्मस्वरूपेण स्वानुभवनीया न पृथक्केनेत्याह —

स्वसंवेद्ययेति, तदनुभवस्य परमपुरुषार्थत्वमाह — ययेति, अथ शक्तियोगमाह — पुंनपुंसकयोरिति, प्राणमनसो° वाचि चेच्छादिशक्तिरूपेण तुल्यापि प्रणवोच्चारणावसरे हि क्रमेणेच्छाक्रियाज्ञानशक्तिरूपाणां मनःप्राणवाचां निबिडतेजोध्वनिरूपमन्त्रात्मनैकत्वं तुल्यत्वं भवति, तस्मिन् साम्ये तेजसि स्थितास्वङ्गनास्व पर चराचरकुण्डलिनीषु विशिष्यते, सकलेच्छादिशक्तिरूपेण विशिष्टा भवतीत्यर्थ°। ततस्तासां संहारमाह — प्रध्यानमिति, प्रथितं त्रयमकारादित्रयेणाति, ततो बिन्दुकला। निरोधिका रूपमन आदिकं निबिडतेजोरूपमात्ति, ततो नादनादान्तस्थां

प्रभामत्तीति प्रध्यानम्। ततः परं यास्पर्शन्यापिनी समन्युन्मनीशक्तिरिति कथ्यतइत्यर्थः। अथ चतुर्मूर्त्यादिचतुर्दशयोनात् क्रमेणाह्वया युष्मानिति, युष्मान्मामपि ब्रह्मबिष्णुरुद्रसर्वेश्वरान् नाभिहृद्भ्रूमध्यद्वादशान्तस्थितममृतमयमवष्टभ्यातिवर्ततइत्यर्थः। इति चतुर्मूर्तियोगः सूचितः। ब्रह्मविष्णुरुद्रभेदाभेदलिङ्गचिदवष्टंभयोगा अप्यनेनैव सूचिताः। तत्र युष्मानतिवर्तेतइति ब्रह्मादियोगत्रयं चतुर्ष्वपि स्थानेषु सपरिवारं ब्रह्माणं सञ्चिन्त्य संपूज्य तेभ्यो रूपांस्तान् प्रणवेनैकीकृत्यामृतमास्रावयेदिति ब्रह्मयोगः। एवमेव बिष्ण्वादियोगा द्रष्टव्याः। भेदयोगे स्थानेषु भिन्न-

शरीरमूर्तित्रयं ध्येयम् । अभेदयोगेऽभिन्नरूपं लिङ्गयोगे लिङ्गरूपं भेदादियोगत्रयं चापि शब्देन सूचितम् । अतिवर्तत इति चिदवष्टम्भयोगः । तेप्यस्या बाह्यं स्थूलादिशरीरं व्याप्यातिक्रम्य वर्तनं इति वर्तनं, चिदवष्टम्भयोगानन्तरमध्यात्माधिदैवादिभेदं परित्यज्य स्थूलादिशरीरात्मकमेकमेकमेव पिण्डं सर्वं ध्येयमित्याह — साहमिति । सा पूर्वमध्यात्मं कुण्डलिनीरूपेण स्थिता अहं षोडशान्ते स्थितः यूयं नाभ्यादौ स्थिताः । अन्यच्च परिवारजातं वेद्यं बाह्यं च । तत्तु सा तत्त्वं सैव याहि न स्थूलादिशरीररूपिणी स्मृता ॥ ॥२५॥२६॥ विराट् हिरण्यगर्भकारणरूपे-

प्रथमः पटलः

णेत्यर्थः। इदानीं गुणसंहारोक्तानुशा[illegible]चतुष्टानि विकल्पकयोगानाह— प्रळयइति, प्रळये प्रणवे वाचके तस्यां च वाच्यात्मिकायां व्याप्यते संह्रियते चराचरमिदं जगत्, पूर्वं पूर्वं वाच्यवाचकरूपमुत्तरोत्तरवाच्यवाचकरूपिण्यां तस्यां विलाप्यत इत्यर्थः। अकारोकारमकारबिन्दुनादशक्तिशान्तानां विराड्हिरण्यगर्भकारणगुणसामान्यगुणबीजगुणाभावगुणसाक्षिणां च स्थूलत्वसूक्ष्मत्वकारणत्वसमत्वबीजत्वनिर्विशेषत्वशान्तत्वगुणैरेकत्वचिन्तनं गुणयोगः। संहारयोगः। तेषां क्रमेण संहारः। एवमधिष्ठानस्थस्यातिसूक्ष्मस्य जगतः तत्साक्षिचिद्रूपव्याप्तिचिन्तनमोतयोगः।

ततः स्वतः सत्ताद्यभावात् तस्यामाधीनत्वचिन्तनमनुसन्धायोगः। आत्मव्यतिरेकेणाभावचिन्तनमनुज्ञायोगः। तत आत्मनो निर्विशेषत्वचिन्तनं निर्विकल्पकयोगः। ॥२७॥ ततो वाक्यार्थप्रतिपत्तिमाह — सैवेति — २४॥ सा परावरशक्तिरविद्यया प्रपञ्चरूपतां प्राप्तोक्तविवेकप्रकारेण स्वां वेत्ति। ब्रह्मात्मरूपतां वेदनफलमाह — परमेति,, संसारनिवृत्तिं चाह — तस्याइति,, वेद्यवेदित्रवेदनादिकं नास्तीदस्ति, भविष्यतीत्यर्थः। अथ कालयोगमाह — साविति,, कालस्यापरस्य पञ्चदशधा भिन्नस्याप्यात्मा कालात्मा, तेनोन्मनीरूपेण कालेन मया पञ्चदशकालाभिमानिनी सम्यग्वे-

येन ज्ञायत इत्यर्थः। लवत्रुटिकलाकाष्ठा
निमेषमात्रा नाडिका मुहूर्ताहोरात्रमास
संवत्सरयुगकल्प महाकल्पपरार्धकाल-
पर्वाण्यकारोकार मकार बिन्दुकला निरो-
धिका नादनादान्तशक्तिव्यापिनी व्योम-
रूपान्ता नाथानाश्रिता समनीलक्षणप्रण-
वमात्रा समूलाधारमारभ्याषोडशान्तं
व्यवस्थितास्तु सान्निध्यक्रमेण संहृत्या
कालकलिकाख्यामुन्मन्यां व्यवतिष्ठते
इत्यर्थः॥ इदानीमुन्मन्यामवस्थितस्या प्रय- ॥२८॥
त्नेनैव जपादनन्तं जपफलं दर्शयितुं
लवादिकालपर्वकथनाय चोपक्रमते लवा- ।२९।
दिति। तदायुर्मम निश्वास इत्यहोरात्रपक्ष-
संवत्सरादियोगां श्वासोच्छ्वासस्थान दर्शि-

विवरणे

यति, श्वासस्याणुत्वेऽपि तद्रूपत्वात् कालेनैवं प्रचोद्यतइति अहोरात्रादियोगे साक्षितया सत्तामात्रेणात्मा प्रेरको ध्येयः। ननु कालमध्यवर्तित्वमुक्तम्। कालः कर्मापेक्षया प्रेरकएव केवलमित्युक्तम्। पूर्वस्मिन् व्याख्याने तत् कथं प्रलये सर्वसंहारादित्याशंक्य प्रलयेऽपि सूक्ष्मरूपेण कर्मणामवस्थितिमीश्वरस्य सर्वज्ञतां चाह स जानातीति. स अनन्तरपूर्वोक्तः सातु कालक्रमेनेति व्यवस्थितत्वेन उक्तो वाचकशब्दात् तां चेत्यर्थः। परिपक्कानि कर्माणि जात्यायुर्भोगांश्च विपाकांश्च सम्यगासां कार्येण सर्वदा प्रकृतौ कर्मणां सत्वे कथं कादाचित्की सृष्टिरित्याशंक्य

प्रथमः पटलः

ईश्वरापरकालादिवत्वादित्याह— प्रकृतेरिति। तत्त्वविकृतिक्रममाह— ॥२९-४०॥ सा तत्त्वेति, सा प्रकृतिस्तत्त्वस्य पारमार्थिकस्य संज्ञेव संज्ञा यस्याः तत्त्वविभक्तत्वात् सा तथोक्ता, सा तत्त्वात्मकतामन्तर्मुखतामपरित्यज्यैव क्वचिद्देशे बिन्दुतां किञ्चित् बहिर्मुखतया सृष्ट्युन्मुखकर्मविभक्त्या तरङ्गमूलभूतसूक्ष्मवायुव्यापारसमुद्रवलनवत् किञ्चित् स्थौल्यप्राप्तेत्यर्थः। परिपक्वकर्मभेदात् घनीभावस्तदर्थो व्यापारो बिचिकीर्षा बिन्दुः कर्मभिन्नं रूपम्। एवं परस्मादुत्पन्नस्य प्रकृ- ॥४१॥ तितत्त्वस्योत्तरसृष्टिनिर्वाहार्थमिच्छा सत्त्वादिरूपतामाह — कालेनेति, भिद्य-

मानः संबध्यमानः विभज्यमानश्च नीह चित्संबन्धं विना चिद्रूपस्य ज्ञानादिरूपत्वं संभवति। इच्छादीनामेकैकस्य माया तच्छक्तितद्गतप्राणिकर्मविषयभेदेन त्रिरूपतामाह — स्थूलेति, नवानामपि भेदानां तत्वमाह — मन्त्रादितात्वस्ताबिन्दूति, बिन्दुरीश्वरः। नादस्तस्याः निमिश्रं रूपं पुरुषाख्यं बीजमाचिदंशः। तन्मन्त्रावृत्तिसमये स्वानुभवेनानुगन्तव्यम्। स्वरूपस्थेन वक्ष्यति हि शब्दावगम्यमर्थमिति, एवमर्थरूपस्य प्रकृतितत्वस्य सृष्टिमभिध्यायैतामेवार्थसृष्टिं शब्दसृष्टित्वेनाप्याह — अत्र शब्दार्थभेदाभावात् बिन्दोरिति बिन्दुरुक्तः ॥

परमपुरुषात्, तस्माद्बीजस्वरूपयोक्तया प्रकृत्या संबध्यमानादुभयाभेदलक्षणो देदीप्यमानः परा पश्यन्त्यात्मको रवोऽभवत् स एव कुण्डल्यादिशब्दैरभिलप्यते ॥ ४२॥४३॥ कोऽसौ रव इति तदाह स रव इति त्रिभेदा इच्छासत्वादयः अहंकृतिस्तथेति इच्छासत्वादिरूपैर्वेत्यर्थः। अत्र महान् नाम ज्ञानसत्वप्रधानः परिणामः सर्वजगदाश्रयभूतं ईक्षणादिशब्दार्थः। ईक्षितुस्तदभिमानिनोऽहंकारस्तमःप्रधानः परिणामः कालप्रेरितयेति कालो द्विविधः गुणाः सत्वादयः। योऽयं पूर्वोक्तो रवश्शब्दब्रह्मशक्तिस्तत्वसंसेव्युक्ता। स्वतन्मात्ररूपा या भूता उत्पन्नाः। शब्दादीनामेवकान्त्येवस्था।

रूपत्वव्योमादीनां शब्दाव्योमेव्याख्याभि-
हितं त्रिभेदगहनात्मकं तथेति च मह-
दहंकारयोः स्वरूपस्योक्तत्वादाकाशा-
48 स्वरूपमाह —— खमपीति, न्यासप्रयोगा-
द्विशेषतयाकाशादीनां रूपमाहाक्षितेत्या-
49 दिना, वृत्तं ठकारव्योम्नो बिम्बं तदेव
षट्कं वृत्तम्। बिन्दुषट्कान्वितं वायोः
स्वस्तिकं चतुर्वक्रं परस्परवक्रं रेखा-
द्वयं कोणत्रयगतं भूताभिमानिनो बि-
न्दुतत्वनिर्गतांशशक्तिः ॥१९॥ ।प्रयोगाद्यर्थमेवाह —
निवृत्तीति। तासां स्थूलवाचकांशमाह —ना-
दकलादिभूता इति नादो हकारः के ऊर्ध्वे
येषां लादीनां ते तथोक्ताः कालस्यादीला-
दीरयौ लः आदिर्यस्य वकारस्य लक्ष्म्यादि-

ह्न त्रिधा योज्यम्। लवरयहा इत्यर्थः। कशब्देनैव बिन्दुयोगोऽप्येषां द्रष्टव्य इति तन्मात्राभिमानिनी बीजोद्धारः। अथापञ्चीकृतबीजोद्धारः नादः हकारः के येषां लादीनां सर्वेषामादीनां च ते तथोक्ताः लादिशब्दार्थः पूर्ववद्व्याख्येयः। अत्र ल आदिर्यस्येति व्युत्पत्त्या हकारोपि ग्राह्यः। नादशब्दोक्तस्य हकारस्य सर्वसम्बन्धात् आद्यः। आं ईं ऊं ऐं औं इत्येते ततः ह्लां ह्रीं ह्रूं हैं हौं इत्येतत्सिद्धं भवति। अथ पञ्चीकृतबीजान्युच्यन्ते। नादः के यस्य लकार इत्यर्थः। स नादकलः ह्ल इत्यर्थः। नादकलाक्रान्त लादिश्च नादकलादयः तेभ्यो भूतास्तदात्मतयाऽभिव्यक्ताः निवृत्त्याद्या इत्यर्थः। ततश्च ह्लां ह्लीं ह्रूं

~~स्त~~ 52.

विवरणे

ह्लैं ह्लौं इति सिद्धं भवति। भूतभौतिकत्वगति-
॥५०॥५१॥ कथनमपि, प्रयोगाद्यर्थमेव प्रासङ्गिकं पञ्ची-
(52) करणमाह —— व्योम्नि मरुदिति। व्योम्नीति तत्रे-
ति चाकाश इत्यर्थः। तस्मिन्निति तत्सम्बन्ध्यवका-
श इत्यर्थः। मरुदिति व्योमात्माग्निस्तत्रापस्तासु
संस्थिता पृथिवीत्याद्यपि द्रष्टव्यम्। अथवा
सूक्ष्मभूतानामेव लयाद्युपयोगितया व्याप्य-
व्यापकतामाह —— व्योम्नीति, ॥५२॥ एवं भूतादिका-
हङ्कारकार्यमभिधाय तैजसवैकारिका-
हङ्कारयोः भूतानुगतयोः क्रमेण कार्यमाह ——
श्रोत्रेति। तत्त्वपञ्चविंशतिक इति। अत्र त-
त्त्वकल्पनायाः कुत्सितत्वं सूचितम्। कुत्सि-
तोपासि भ्रान्त इत्यर्थः। तथा प्रोक्ता इति,
अत्र तथा शब्देनापि कुत्सितत्वं सूचितम्।

निरस्तं मन्यमानानामपि तत्त्वकल्पिता कुलितेत्यर्थः। तत्त्वान्युक्तानीति केवलमुक्तान्येव न तु तत्त्वानि तानि यदि चित्तशब्देन प्रकृतिः नोच्यत इत्यर्थः। ततः प्रकृत्यन्तानि चतुर्विंशतितत्त्वानि पुरुषान्तानि पञ्चविंशतितत्त्वानि ईश्वरान्तानि षड्विंशतितत्त्वानीति सिद्धं भवति। उत्तरत्र व्यवहारशेषतया केषाञ्चिन्मन्त्राणां वर्णतत्त्वन्यासयोगादिशेषतया षोडशविकारादिकथनमवगन्तव्यम्। तस्याश्चेति। मूलकारणभूतायाः प्रकृतेरित्यर्थः। तस्याः त्रिगुणात्मकत्वे प्रमाणमाह तत्संबन्धादिति। ततं व्याप्तं तदेव प्रपञ्चयति। न्यासयोगविशेषांश्च प्रणवादिषु कामनानुरूपेण दर्शयन् देवाश्चेति वृत्तयो

विवरणे

जाग्रमाद्या याज्ञनाद्या वा नाड्यो योगस्थानभूताः सुषुम्ना चित्रा वज्राख्याः प्रसिद्धा वा न्यासयोगादिकं मण्डलत्रयोपेतमेव कार्यमित्याह — संबध्येत्यादिना., चरन्ति नाभ्यादिस्थिताः संभूयोर्ध्वं गच्छन्ति, परमानन्दं भक्षयति चेत्यर्थः॥

ननु सर्वमन्त्रसमानत्वेन सर्वागमसारत्वादस्य ग्रन्थस्य शैवशाक्तादि तत्त्वान्यप्यत्र वक्तव्यानि, सत्यमुक्तानि तानि कथं शृणु सा तत्त्वसंख्येत्यत्र चिन्मात्रज्योतिश्शब्दाभ्यां अधिष्ठानसाक्षिलक्षणावनाहतशिवशक्ती अकारलक्षितार्थौ कथ्यते, तत्त्वसंख्येत्याहतशिवोकारवाच्यार्थः। अभ्येति बिन्दुतामित्यन्तेनाहतशक्तिः

श्रःकारवाच्या स बिन्दुर्भवति। त्रिधेति। इच्छाक्रियाज्ञानलक्षणानि इह स वाचकानि सदाशिवेश्वरशुद्धविद्यातत्वानि एतच्छुद्धतत्वपञ्चकं वैष्णवे तत्वे वासुदेवादिशब्दवाच्यमित्येव विशेषः। षोडशावकाश्च तत्र वर्णाः परमेष्ठिपुंनिवृत्तिसर्वामसहिताश्च विद्यातत्वानन्तरं शैवे मायातत्वं स्वरूपाच्छादनविक्षेपात्मकं शुद्धपञ्चके वाच्छादनं नास्ति। तस्येश्वररूपत्वात्क्रियाबलेन मायादिकं तु जीवोपकरणभूतं एकैव शक्तिरन्तर्मुखतया विकसन्ती विद्यादितत्वरूपिणी बहिर्मुखतया संकुचन्ती मायादितत्वरूपिणी तदुपहितः शिवएव जीवइति हि तेषां सिद्धान्तः॥

विवरणे

मायाविद्धोप कालपरिच्छेदे हेतुः कालतत्त्वं तत्तत्र देशकालकर्मफलादि नयति। हेतुरीश्वरेच्छैव हि यतितत्त्वं परिच्छिन्नस्य पशोः किञ्चित्कर्तृत्वशक्तिः। तस्यैव किञ्चिज्ज्ञत्वशक्तिः खलु विद्या। तस्याः पूर्णं मन्यतारागतत्त्वं एतत् षट्कञ्चुकविशिष्टः परमशिवो जीवः स पुरुषतत्त्वं अस्य च सप्तकस्य षादिमान्ता वर्णाः वैष्णवे तु जीवतत्त्वएवैतत् सर्वमन्तर्भूतम्। पुरुषात्परं शैवे, प्रकृतितत्त्वं पशोः सुखदुःखमोहलक्षणं भकारवाच्यम्। वैष्णवे प्राणतत्त्वेनैव गता प्रकृतिः बिन्दोः तस्माद्धि यमानादित्यनेनैतत् तत्त्वगणमुक्तम्। बिन्दुः शिवः तस्माद्याहृत शिवशिव शक्त्यादिरूपादेवमुक्तेन प्रकारेण मायादि-

रूपेण भिद्यमानात् परिणम्यमानादभिन्नो रवो वाचकांशः वाच्येन सहाव्यक्तात्मकः प्रकृतितत्त्वात्मको भवत् स रवः प्रकृतितत्त्वपर्यन्तः शब्दब्रह्मेति कथ्यत इति मट्टारिकं तु सर्वत्र समानमिति निवृत्तिसंज्ञा चेत्यत्र शाक्तमपि तत्त्वनिवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीतबिन्दुकला निरोधिका नादनादान्तशक्तिव्यापिनी व्योमरूपानन्तानाथानाश्रिता समन्युन्मनीलक्षणं सूचितम्। स्युः पञ्चाशत्कयः। नादकलादिभूतान्त त्रयोदश स्युरिति हि तस्यार्थः। नादो नादान्त कलाबिन्दुः। तावादिभूतौ येषामिति विग्रहः। एवं तत्त्वसृष्टिमभिध्यायो ॥५३-५४॥ पसंहरति —— एषइति, सृज्यत इति सर्गः। तत्त्वगणः। इत्थमुक्तेन प्रकारेण समुत्पन्नस्य-

पसंहार॰। सृष्टे॰ व्यवहारलक्षणमवान्तरप्रयोजनमाह — इत्थमिति, इत्थमेवं सृष्टौ सत्यां विश्वं प्रतीयते, प्रतीतिः क्रियाया अप्युपलक्षणार्था, ज्ञानक्रियात्मको हि व्यवहार॰। अथ सृष्टेः परमप्रयोजनमाह — विश्वेति। विश्वस्य कार्यस्य प्रतीतौ सत्यां हि यस्मायत॰ परब्रह्मण उक्तः प्रपञ्चः समुत्पन्नः तत् ब्रह्मावगम्यते। नान्यथा, तस्मात् सृष्टिरर्थवतीत्यर्थः। अथवा एषः सर्वप्रत्यक्षसिद्धः परमात्मा सर्गं सृजतीति स एव योऽसौ स्रष्टा परमात्मा स एवोक्तः तत्स्वरूपेण समुत्पन्न इत्यर्थ॰। कुतः यत इत्थं परमात्मस्वरूपेण घट॰ स न घट॰ प्रकाश इति च विश्वं सर्वं तन्मय॰ प्रतीयते, किमित्यस्यावेवमुत्पन्न इति स्वार्थे-

प्रकाशनायेत्याह — विश्वेति, विश्वप्रतीतौ घटाद्याकारबुद्धिवृत्तौ तत्साक्षितया हि यस्मादित्यादि समानम्। एतदेव पद्यं त्रिपुरतत्त्वपरत्वेन योज्यतेर्थं, इत्थं समुत्पन्न एष शैवतत्त्वलक्षणः सर्गः। विश्वं प्रमेयप्रमाणप्रमातृरूपात्म विद्या शिवतत्त्वरूपं प्रतीयते। प्रमा प्रमाता प्रमितं च विश्वमिति, हि लिङ्गसूत्रवाक्यं। तत्र मायान्तं मेयरूपमात्मतत्त्वं सदाशिवान्तं ज्ञानरूपं विद्यातत्त्वं आहतशिवान्तं प्रमातृरूपं शिवतत्त्वमिति द्रष्टव्यम्। अवशिष्टं सर्वतत्त्वमाह — विश्वेति ॥ ^विश्वस्य तत्त्रयात्मकस्य वैयस्य प्रतीतौ साक्षिणि सति यतः यस्माद्विद्यानादनाहतशिवात् प्रपञ्च उक्तो भवति। सः परमशिवः सर्वस्वत- ॥६०॥

रूपोऽवगम्यतइति एवमर्थसृष्टिं शब्दसृष्टिं च मध्यमान्तामभिधाय वैखरीसृष्टिकथनार्थमुक्तानुवादपूर्वकमुपक्रमते ——

शब्दब्रह्मेति, तत्र शिवतत्त्वं परा वाक् तदर्थरूपं ~~न~~ प्रकृतितत्त्वान्तं पश्यन्ती तदर्था तदर्थात्मकं इन्द्रियान्तमध्यमा तदर्थात्मकं पञ्चीकृतम्। वैखरी तदर्थात्मकमित्यवगन्तव्यम्। शब्दब्रह्मेति — यत्प्रोक्तं "स्वरवक्तुतिसंपन्नं„ रित्यत्र तदुद्देशः तस्य क्रमेण वैखरीरूपेणोद्देशः उपदेशः प्रवर्त्यते ॥

ननु वैन्दवतत्त्वरूपशब्दब्रह्मणोऽप्यूर्ध्वं परा वाग्रूपायास्तत्त्वसंज्ञायास्त ~~क्ष~~ साक्षिणः तत्त्वस्य चोद्देशनं याथार्थ्योपदेशनमकृत्वा किमिति शब्दब्रह्मोद्देशः

क्रियन्त इति तयोरुद्देष्टुमशक्तत्वादित्याह— अतः परमिति। अवाच्यत्वे हेतुः स्वसंवेद्येति। आत्मा स्वसंवेद्यत्वेनावाच्यः शास्त्रैरपि तद्विज्ञत्वात् तद्व्यतिरेकेणाभावाद्वा वाच्यत्वमेव। स्वयं प्रकाशत्वेन वचनापेक्षाभावादिति वार्थः॥ ६१॥

ननु शब्दब्रह्मेति श्रोत्रग्राह्यत्व सूक्ष्मो व्यापी शब्दः। न बैन्दवं तत्त्वमिति केचिदिति। नेत्याह— शब्दब्रह्मेति। शब्दोच्चारणकाले तत्साक्षितयान्तर त्वेनावगम्यमर्थं बिन्द्वात्मकमित्यर्थः। इतरस्य न प्रकाशकशब्दरहस्यत्वं ब्रह्मत्वं नेत्याह— स्वत इति। बिन्द्वात्मकप्रकाशात्मत्वं विनाऽनवबोध्यकत्वात्। तत्प्रोक्तो रवो

॥६३॥ न शब्दब्रह्मेत्यर्थः । स्वाभिप्रेतस्य शब्दस्य ॥६४॥ ब्रह्मत्वं प्रकाशत्वं चास्तीत्याह — सतीति, सः शब्दावगम्योऽर्थः पूर्वोक्तः सर्वेत्र संस्यूतः कारणत्वात् । तुशब्दो विशेषावधारणार्थः । अतस्तस्य ब्रह्मत्वं प्रकाशकत्वं च युक्तमित्याह — जात इति, प्राणिनां देहेषु वैखर्या त्वदभिमतया विनापि यावदर्थः व्याप्तः संकल्पविकल्पनिश्चय ॥६३॥ विमर्शनात्मनाविर्भवतीत्यर्थः । तस्यापि भावप्रकारप्रदर्शनार्थं देहोत्पत्तिप्रकारं दर्शयंस्तद्भेदं तावदाह — प्रकृताविति, गुणान्तःकरणात्मनीति सर्वतत्त्वात्मत्वोपलक्षणार्थं उत्पत्तिप्रकारभेदादेव देहानां भेदः न पञ्चभूतात्मकत्वेन इत्युक्तमुत्पत्ति-

।६४॥। भेदत्त्वइति, । उत्पत्तिभेदमाह — उद्भिद्येति॥
उद्भिज्जमप्यप्राणिदेहः पाषाणादिकं व्यावर्त-
यन्नुद्भिज्जस्य रूपमाह — स्थावरइति, स्था-
वरत्वमपि तेषामस्तीत्यतो विशिनष्टि, तद्धी-
ति। तेषां पृथिव्याश्रयत्वेन केवलपृथिव्यात्म-
त्वांशं व्यावर्तयति पञ्चेति, यद्यपि क्ष्माम-
भिद्य जायते, तथापि रसादिदर्शनात्
पञ्चभूतात्मकत्वमेवेत्यर्थः। अम्ब्वादीनामैक- ।६५॥६६।
कांशेन दर्शनादल्पप्रधानेभ्यो भूतेभ्य
एव स्वेदजोत्पत्तिरित्याह — ~~अम्ब~~ अम्बी- ।म्बु
ति चतुर्विधादित्युपलक्षणम्। सर्वसत्त्वानां
संभवशब्दार्थमाह — स इति। योषोत्थं
रक्तं तदसृङ्मांसं कारणत्वेन निस्सारेऽपि
शरीरे सारबुद्धिजनकत्वान्मायीयं पौ-

विवरणे

रुषं कुङ्कुमस्त्र्यादिकारणत्वेन दार्ढ्यहेतुत्वात् देहस्य व्यापारक्षमत्वकरीमिति कामुकं कर्म संस्कृतत्वाद्वा कर्मकं मिश्रितमनुशाय्यणुत्वहेतुत्वाद्वाणद्वयं संयुक्तयोरपि परस्परमेकत्वमप्राप्तयोर्नानुशाय्य- ॥६७-७२॥ णुत्वहेतुत्वमिति संयुक्तमिश्रितमित्युक्तम। ।६२- तस्य पूज्यत्वप्राप्तौ हेतुमाह — सूक्ष्मरूपाणीति, अनेन सर्वेषां सर्वोपाधित्वमुक्तं भवति, आद्यपूज्यभावात् प्रागेव लब्धवृत्तीनि भवन्तीत्यर्थः। किं तद्द्वयमुद्धृतमित्याह — बीजयुग्ममिति, उभयात्मकीति। अग्नीषोमात्मिकौ प्रकृतिपुरुषात्मिकौ चेत्यर्थः। भवाङ्कुरित्वमप्यस्तीत्यवाङ्कुरीत्युक्तम। वाममुष्केति, छेदे अदक्षिणामिति

२४-९

सा

म्यु

खेद०। दक्षिणमुष्कोर्ध्वेति खेदे अवामं धृत्वेति, खेद०। मातुर्भुकरसाम्मवदित्युक्तम्। तल्लक्ष्यमिति। तदाह — कानिटिति, वैराग्यार्थमाह — संक्षोत्रक्षमिति, 'बीजयुग्मं समुन्नमेदित्युक्तम्। न तत्र सार्वत्रिकमित्याशङ्क्याह — फलेति, अवशिष्टं नाडीचक्रं
१६-२ योगियोगाभिवृद्धये दर्शयति — मध्यस्थायाइति, मूलाधारनाभिहृदयगलमूलभ्रूमध्यानुसारिणी पञ्च पर्वाणि, पायुव्याप्तिफलमाह —
२४-२९। येनेति, ज्ञानयोगक्रियानिष्ठानां हितायदेह अ
रा होत्रादिक्रममाह — देहेपीति, अपिशब्दोऽ
म्यु न्युदयसमुच्चयार्थो वा बाह्योदयसमुच्चयार्थो वा इतररूपेणोदवे प्राणवृत्तिरह०इतररूपेणेतरात सङ्कोचरसं मलमित्युक्तम्॥

॥१३॥१३॥ तत्कथं क्षेत्रज्ञप्रवेश? इति, तत्र मतभेदं दर्शयति। ~~न~~ अत्रापीति, चेतनाधातुश्चिदेकरसः पुरुषः। अपिशब्देन विरोधार्थेन पक्षाणामनुपपत्तिः दर्शिता, नहि चिदेकरसस्य पुरुषस्यैवंविधाः प्रवेशा उपपद्यन्त इत्यर्थः। रेतश्शोणितजामिति, पञ्चाधिकरणानां मातुराहृतादाहाराद्यो रसः पाकजातद्द्वारेण गर्भशरीरं विशतीति वार्षगणाः। कर्मफलमिति अपत्यार्थिनां यथोक्ताहारविहारक्राद्यातिशयात् गर्भं प्रविशतीत्यापद्यादयः। परं धाम्नो व्याप्तेरिति विन्ध्यवासिपक्षः। सर्वगस्येन्द्रियाभिव्यक्तिनिमित्तं परिच्छेद इत्यर्थः। द्वीपात् द्वीपान्तरमिति पतञ्जलिधन्वन्तर्यादि

सं/

॥१४॥१५॥१६॥
पक्षः। तत्परं धाम, तस्य पितुरात्मा कश्चि-
देवं भूत इत्युत्तरत्रान्वयः। एकव्यतिकृता-
दिति, स्वात्मनोऽपि संक्रान्तिः दर्शिता। भौति-
कव्याप्त इति बहिरूपत्यःपक्षः। कुतश्चिदित्य-
निमित्तमेवेत्यर्थः। स्वसिद्धान्तमाह — बहुने ॥१७॥१८॥
ति। सान्निध्यं नाम चैतन्याभासोदयः तेन
प्रकृतेः प्रकर्षेण विविधजृंभणप्रकारमाह—
सं गुणाभिन्नेति। गुणसाम्यावस्थातोऽपि वि-
षयदशां प्राप्त इत्यादिनोक्तः संक्षेपः क्रियते,
सैव महीयसी महत्वं प्राप्ता। शरीरावस्थायां
वातादिरूपदोषरूपेण वर्तत इत्याह—
त्रिदोषेति। महत्वमेव दर्शयति पञ्चभूत ॥१९॥
मयीति। श्रोत्रादिपञ्चेन्द्रियरूपेण गच्छ-
तीति तथोक्ता। आपञ्चवाद्यामोदि (दी)

॥१००॥१०४॥ त्यर्थः। सैवान्तःकरणरूपेत्याह — परेणेति। साक्षितया कारणतयान्तर्यामितया च संबन्धः। समनुप्रोपसर्गाणामर्थः। महाप्रभावेति। परिणामसामर्थ्यमुक्तम्। अहमेव ज्ञातेत्यविवेकतया ज्ञातुः स्वात्मत्वमात्रवेदनमहंकारः। अन्तःसाक्षिणीत्यर्थः। एवं प्रकृतेः शरीरान्तःपरिणामक्रममेवं संग्रहेणाभिधाय शरीरे पूर्वोक्तस्य शब्दब्रह्मणो वैखरीरूपेणाभिव्यक्तिमपि संक्षेपेणाह — निर्धारितमर्थमित्यादिना। करणैः प्रयत्नविशेषेरितैः। क्रमेणेति। पश्यन्त्यादिक्रमेणेत्यर्थः। प्रविजृम्भणं वैखरीपर्यन्तस्थूलाभावः॥१०२॥१००॥१०४॥

इति प्रपञ्चसारविवरणे

प्रथमः पटलः

श्रीः

॥अथ द्वितीयः पटलः॥

उक्तमपि गर्भवासं सविशेषं विस्तरेण वैराग्यार्थं प्रपञ्चयितुं द्वितीयपटलारंभः ——

अथेति — एवं क्षेत्रज्ञप्रवेशोपव्यवस्थितैः गर्भो वर्धत इत्यर्थः। षडङ्गान्याह — शिरइति। विभुः वपुश्चलनादौ समर्थः। क्लेदो गर्भजलं। क्लिन्नेति, परोक्षत्वादिदानीं तदनुगुणप्रवृत्तिदर्शनाज्जोत्क्रम। स्वीयवायुप्रक्षोभं दर्शयति — परस्परमिति। भ्राजकरञ्जकक्लेदकस्नेहकधारकबन्धकद्रावकव्यातुगा वन्हयः। व्यापकपाचकशोषका वातादिदोषगाः। पित्तश्लेष्मवातविकारवि-

२६ शेषाः स्वेदादयः मरुतो दोषदूष्यसंयो-
जनस्वभावत्वे कथमदुष्टं जीवनमिति । २४
तत्राह — समवायीति, समं वयत इति सम-
वायी । तत्र हेतुर्विश्वात्मेति । तत्र हेतुद्वयं
विश्वग इत्यादि । वायोः समवयनस्वभा-
वत्वे कथं रोगाद्युद्भव इति विषमवय-
नादित्याह — स दोष इति । तत् कथं ज्ञातुं
शक्यत इति, कार्यत इत्याह — क्रियात इति,
२७ वायुप्रसङ्गेन प्राणादिधर्मानाह — बु-
भुक्षेति । धर्मेषु धर्मत्वेनेत्यर्थः । ऊर्मिप्रस- २८
२९ ङ्गेन कोशानाह — मज्जेति । धातुगतेनोक्ता-
नामग्नीनामप्रयोजनमाह — रसादित इति ।
३० स्वच्छमिति प्रधानमित्यर्थः । प्राधान्यमाह —
३२-३३ देहस्थस्येति, इन्द्रियाणामर्थविशेषनियम-

द्वितीयः पटलः

हेतुमाह — नभसीति। इत्थमिति, एतत्सम्बन्धा-
28 नुसारेणेत्यर्थः। कार्येतः संप्रधार्येइत्युक्तम्।
तदाह — यदेति। विलीनं द्रवीभावं प्राप्तम्।
ध्यातुन् प्र न्या विलापयेत्। व्यापयेत्।
लसीकां रक्तत्वचोरन्तरालस्थां प्रसेकं लालां
तस्यां ग्रहण्यां शाकृतीत्युक्तम्। कासेति। तत्रा- 25-28
ह — ग्रहिणीति॥ प्रधानाग्निर्जाठराग्निः॥२९॥
तत्कारणमाह — तस्याधस्तादिति। दोष- 30
त्रयं क्रमेण युक्त्या स्वादयति। अथाहृतमि-
ति। अब्बाधिक्ये माधुर्यं नारवाधिक्ये म्लः।
भूसारवाधिक्ये लवणः। वारवग्न्याधिक्ये ति-
क्तः। अग्न्याधिक्ये उष्णः। वायुरवाधि-
क्ये कषायः। "क्ष्माम्भोग्निक्ष्माम्बुतेजःखवा-
य्वग्न्यनिलगोऽनिलैः" इत्युक्तक्रमेण वा

४२।

३१-४१ रसनिष्पत्तिः। जूतिर्ज्वरः। यदर्थो गतः प्रयासः। तद्दर्शयति मूलाधारादिति॥ मूलं जगन्मूलभूता परिणामिनी मायाशक्तिः तस्या आधारभूतत्वात् सा मूलाधारः। सर्वगतस्यापि तस्याभिव्यक्तिस्थानत्वात् गुदमेढ्रमध्योऽपि मूलाधारः। तस्मात् प्रथममुदितश्चैतन्याभासाभावश्च यः परां द्रावयतीति मायाशक्तिभावः स पराख्यः। चैतन्याभासविशिष्टतया प्रकाशिका मायानिष्पन्दा परा वागित्यर्थः। सस्पन्दावस्थाः पश्यन्त्याख्याः तत्र सामान्यस्पन्दप्रकाशरूपिणीं नादात्मिकां मूलाधारादिनाभ्यन्तरमभिव्यज्यमानां पश्यन्तीमाह— पश्यात् पश्यन्तीति। सामान्य-

म्म

लि

क्रौ

ज्ञानात्मकत्वात् पश्यन्ती सा। अथ बाह्यान्तः-
करणात्मिकां हिरण्यगर्भरूपिणीं बि-
न्दुतत्त्वमयीं नाभ्यादिहृदयान्ताभिव्य-
क्तिस्थानां विशेषस्पन्दसंकल्पादिसत-
म्ना त्वान्मध्यमां वाचमाह — अथ हृदयग-
इति। मध्ये मा बुद्धिर्यस्याः सा मध्यमा।
भावएव विशेष्यः। अथ विराड्रूपिणीं बी-
लि जाण्डिकां हृदयादास्यान्तमभिव्यज्यमानां
शब्दसामान्यात्मिकां वैखरीमाह — व-
क्रा क्रेति। विशेषेण खरत्वाद्वैखरी। सामान्य-
शब्दात् विशेषशब्दनिष्पत्तिमाह —
तस्मादिति। तस्माद्वैखर्यात्मकात् भावादि-
त्यर्थः। पवनशब्देन प्रेरकवर्गः सर्वोऽप्यु-
क्तः। अथवा सूक्ष्मा परा पश्यन्ती मध्यमा

वैखरीति पञ्चपदीं वाचमाश्रित्याह— मूलाधारादिति। सप्तपद्यपि। नादेनैव सूचिता। शून्यसंवित् सूक्ष्मादीनि सप्तपदानि तत्रानुत्पन्नानि निष्पन्नानन्दा शून्या वागुत्पित्सुः संविदुत्पत्त्यवस्था सूक्ष्मा मूलाधारात् प्रथममुदिता परेति विभागः। जातेन शिशुना रोदनव्याजेनैवं किमप्युच्यते चेत् कथं वर्णानभिव्यक्तिरिति तत्राह— स्रोतसीति॥ अक्षराभिव्यक्तिस्थानस्येत्यर्थः। गर्भे विवेकवतोप्यस्य मायाप्रभाववशादविवेकपूर्वकं संसारक्रममाह— जातास्मीति। यदास्य भावो भवति। तदाहंकारपूर्वको भावइत्यर्थः। पितरं वीक्ष्य तत्रापि ममत्ववन्धइत्यर्थः। मया भावस्य विक्षेपशक्तिर्गिल-

स्थितमभिधाय आच्छादनशक्तेरप्याह — एकामिति। निनिध्यं स्मरणं विस्मरणं निगिध्यपश्चादिरूपेणावस्थानमित्यर्थः। सुषुम्नावेष्टनीति। सुषुम्नायामात्मानं निविध्यपश्चादिरूपेण वेष्टयति गुणयति स्थापयतीत्यर्थः। मुहुः वेष्टनमेव दर्शयति त्रिचतुरिति। एवमात्मानं गुणयन्ती कुण्डलिन्येव यन्त्रमन्त्रादेवतात्मकञ्जगन्मयीत्याह — येदेवारिना। त्रिगुणिता त्रिगुणितयन्त्रस्वरूपिणीत्यर्थः। त्रिकोणसंबन्धां स्त्रीबीजात्मकमन्त्रान्तस्था विभूतित्वेन कथयति। शक्तिरिति। गुरुमूर्तिः शक्तिस्तदा प्रतीयतइत्यन्वयः। गुरुमूर्तिः गुह्यमूर्तिः। मूर्तिं विशिनष्टि, कामाग्निनादात्मेति। कामः कामराजबीजं मध्यमबीजानीत्यर्थः। अग्निर्वा

ग्भगः प्रथमबीजानीत्यर्थः। नादः नादप्रधानानि तृतीयबीजानीत्यर्थः। कामाग्निनादात्मेति मूर्तिमच्छन्द्रोङ्कारो वा दर्शितः। कामः इकारः। अग्नी रेफो। नादो हकारः। आत्मा बिन्दुः। हूँ ~~ह~~ हरिहर इत्येवं तत्सिद्धं भवति। ओमात्मेति। अकारोकारमकारात्मेत्यर्थः। हरेमात्मेति। हकाररेफमात्मेत्यर्थः। ॥५४॥५५॥ विभूत्यन्तराण्युक्त विद्यार्थरूपाण्याह — त्रिगुणात्मेति। त्रिरेखात्रिकोणरेखाः। ५६। सूक्ष्मादीति। परादीत्यर्थः। ५७। पञ्चपञ्चेति पञ्चविंशतितत्त्वादिकमुक्तम्। ५८। वर्णानां पीतादिभूतवर्णानामित्यर्थः। मरुतां प्राणादीनाम्। लोका भूम्यादयः। मेरुनिषधहेमकूटहिमवन्नीलश्वेतशृङ्गिणः पर्वताः। जम्बूप्लक्षशाल्मलीकुशक्रौञ्च-

द्वितीयः पटलः

शाकपुष्करा द्वीपाः। अतलवितलसुतलगभस्तिमन्महातलनितलपाताळाः पाताळाः पाताळाः। क्षारेक्षुसुराघृतदधिक्षीरशुद्धोदाः सिन्धवः। ग्रहाः सूर्यादयः। भरद्वाजकाश्यपगौतमात्रिविश्वामित्रजमदग्निवसिष्ठा मुनयः। षड्जर्षभगान्धारदै (धै)वतमध्यमपञ्चमनिषध्याः स्वराः। ध्यानवः वगादयः। आननादिक्रमाद्विशब्दार्थः। अगस्त्यःप्तसकास्तारादेः सप्तविधजगदुत्पत्तिकथनं सर्वत्र तत्तद्गुणितसंख्यासमः तत्तदात्मकं जगदुत्पत्तेरुपलक्षणम्। प्रकृतयोष्टप्रकृतयः। अनन्तवासुकितक्षककर्कोटकपद्ममहापद्मशंखपालगुलिका अष्टयः। धरध्रुवसोमपाग्निवायुप्रत्यूषप्रभासा व-

सनः। मातरो ब्रह्माण्यादयः शर्वभवरुद्रोग्र-
भीमेशानमहादेवपशुपतयो मूर्त्तयः नाड्यः
सुषुम्नाद्याः हृद्गुह्यतालुवदनोदरनेत्र
कण्ठभ्रूमध्यशंखगुदां मर्म्माणि आदिशा-
ब्देन वाय्वग्निदशकादिकं ग्राह्यम्। अकी-
थ्याद्यादयः मूर्त्तयः केशवाद्याः स्वरापि न-
पुंसकाः त्रिगुणादिचवयमाशयाः। मूलाधा-
रस्वाधिष्ठानमणिपूरकानाहतविशुद्धि-
क लम्बिताज्ञा कला ब्रह्मरन्ध्रेषु त्रिचतुःप-
ञ्चषड्दलाष्टदशद्वादशपञ्चाशद्दलानि
पद्मानि सञ्चिन्त्य तेषु इन्मऐव ह्यथ
र हू वइ ल्यन्तान् सर्वांश्च वर्णान् स्मृत्वा
कर्णिकास्वकारोकारमकारबिन्दुनाद-
शक्तिवान्तशान्त्यतीतनिर्विकल्पानीष्ट-

देवताकारान् स्मृत्वा देहेषु तत्परिवारत्वेनोक्तां विभूतिं स्मृत्वा मृतमयैरुपहारैः संपूज्य संहृत्यामृतमास्त्रावर्त्येदिति । एवं ६७। शिशुवाक्यगताक्षरानुसारेण कुण्डल्यवस्थानविशेषमभिध्याय नित्यसिद्धमातृकाक्षररूपेणापि तदनुपसंहरति— पञ्चाशदंशेति ॥ कथं देवि ? त्वमिति तदाहात्मेति प्राप्तचिदानन्दरूपपुरुषभावेत्यर्थः । नादरूपः पश्यन्ती मध्यमा भावः॥

इति प्रपञ्चसारविवरणे
द्वितीयः पटलः ॥

श्रीः

॥अथ तृतीयः पटलः॥

एवं वर्णनिष्पत्तिप्रकारमभिध्याय तद्विभूतिकथनाय तृतीयपटलारंभः —

अथेति— अथशब्दो हेत्वर्थः। यस्मात् प्राक्चिदग्नीन्दुभावाच्छक्त्यमृतदीपितः जाता वर्णाः तस्मादित्यर्थः। सर्ववर्णेष्वकारोंशोऽग्न्यात्मकपुरुषांशः इतरः प्रकृत्यात्मकसोमांशः प्रकाशप्रकाश्यांशाभ्यां वाग्नीषोमात्मकत्वं स्वरव्यञ्जनभेदेन वा समविभागतो वा अनेन प्रपञ्चयागादिष्वग्नीषोममन्त्रौ सूचितौ, सतारशक्त्यादिपूर्वकमादिठान्तमुक्त्वा सोममण्डलाय नमः स्वाहा, इति वा सोममन्त्रः, इतरोऽवशिष्टः।

पुनरप्यक्षराणां व्याप्यन्तरमाह— तत्वेति॥ मिश्रं रूपमिन्नात्मकमिति द्रष्टव्यम्। अग्नीषोमात्मकत्वं पूर्ववदेव स्वरस्पर्शोव्यापकभेदेन वा सोमेनाग्न्यात्मकत्वं। अनेन प्रपञ्चयागादिषु मण्डलत्रयमन्त्राः सूचिताः। स्वरानुक्का सोममण्डलाय नमः स्वाहेति वा सोममण्डलमन्त्राः। इतरत्द्वयमूह्यम्। १ अष्टत्रिंशत्कलान्यासे तत्प्राणप्रतिष्ठामन्त्रांशप्रदर्शनार्थं तद्व्यापकमन्त्रांशोद्धारार्थं (०) कथन (चाह) स्वराख्याः षोडशेति॥ फ सोममण्डलाय षोडशकामकलात्मने सोममयमण्डलात्मने अन्तरात्मने परमात्मने नमः। ॐ सूर्यमण्डलाय द्वादशार्थेकलात्मने यजुर्मयेत्यादि समानम्। मं व-

न्हिमण्डलाय च धर्मकलात्मने नऽ ङ्म्य इत्या
दि समानम्। इत्येते मण्डलमन्त्राः। आवयुनी
2 तमंशान्तरमुत्तरत्र किञ्चित् सूचयिष्यति।
स्वराणामेव पृथग्व्याप्तिं दर्शयन् तेषा
मष्टमूर्तितच्छक्त्यादिवाचकत्वाय द्विप्रका
3 रत्वमाह — एष्विति। स्वराणां स्त्रीपुंन
पुंसकात्मकत्वमाह — आद्यन्तेति। अत्र
शिष्टह्रस्वपञ्चकस्य पुरुषत्वं दीर्घपञ्चक
स्य स्त्रीत्वं चावगन्तव्यम्। बिन्दुविसर्गौ
च स्त्रीपुरुषावनुगतौ। आगमध्वनेरित्यय
मर्थः। अनुत्तराकारपुरुषस्यानन्दाकार
शक्तीच्छेकारेशानकारोन्मेषोकारानन्तर
मूनतोकारावस्थायां पृथिव्यादितत्त्वयाद्यव
शिष्टानि तत्तावस्थारूपाण्यक्षराण्यकिञ्चि

कराणीति नपुंसकशब्देनागमेषूच्यन्त-
इति स्त्रीपुरुषभावयोर्मध्यस्थत्वं नपुंसक-
त्वे हेत्वन्तरत्वं पद्यम् । तेषां विनियोगमाह —
तच्चतुष्कमिति ॥ सुषुम्नास्थे सति प्राणेऽयन-
संक्रान्तिरूपां स्थितिं कुर्यादिति अर्थः । तदा-
नीं तेषामुदयस्तत्प्रध्यानानां च मन्त्राणां त-
त्रापि ह्रस्वद्वयस्य दक्षिणसंक्रमे दीर्घयो-
रितरसंक्रमण इत्यवगन्तव्यम् । अनयनेऽ-
ध्ययनकार्यसिध्यर्थमाध्यात्मिकमयनमाह —
दक्षोत्तरस्थ इति । बाह्यघटिकापन्नके-
नाध्यात्मिकमयनमुक्तं विध्यविकमवस्यापि
अनुपपत्तौ श्वासोच्छ्वासयोरेव कालाव-
यवसंपादनं द्रष्टव्यम् । तत्र श्वासोच्छ्वासा-
त्मकान्यहोरात्रपक्षमासायनानि द्रष्टव्या-

नि, अहोरात्रात्मकौ वा श्वासोच्छ्वासौ पक्षात्मकौ वा अयनात्मकौ वेच्छावशेन ज्ञातव्यौ ह्रस्वदीर्घाणां तत्प्रधानानामग्नीषोमस्त्रीपुरुषाद्यात्मकानां च मन्त्राणामयनयोरुदयं वदंस्तेषां वीर्योद्भवकालं सूचयति। दक्षसव्यास्थित इति, चशब्दस्तत्प्रधानमन्त्रग्रहनक्षत्राद्युदयसमुच्चयार्थः। तत्रक्षठरादिप्रधाना आग्नेया मन्त्राः वौषडादिप्रधानाः सौम्याः। हुंफडन्ताः पुरुषाः स्वाहान्ताः स्त्रियः। नमोन्ता नपुंसकाः। ते च वश्यशान्तिक्रूरकर्मसु प्रायेण प्रशस्ताः। भूतभूतकलाभिः सहोदयन्तीति संबन्धः। भूतकला निरूच्या~~क्ष~~च्याः तत्र राशिचक्रैकघटिकायां वाय्वग्निभूजलाकाशभूतानामुदयः के-

न प्रकारेणोदयइति पुटयोरित्यादिनोक्ताः
स इत्याह— तदुदयइति, स्वराणां सौम्य- ६
त्वे हेतुं वदन् बिन्दुसर्गयोस्तत्वं कालनि-
वर्तकत्वेनेतरस्वरवत् कालसंबन्धं चाह—
बिन्दुसर्गाविति। अनेनेतरस्वराणां काल-
रुपातिश्यात्मकत्वं कार्यानुसारेण विसर्गा-
दियोगश्च सूचितः। पुरस्तादिति, सर्गह्लोषि-
तद्रूपादिनेत्यर्थः। अथवा जपापटलेऽन्येषु
वा बिन्दुविसर्गान्वितेषु मन्त्रेष्वित्यर्थः। २।
एवं स्वराणां व्याप्तिसौम्यत्वं चाभिधाय
स्पर्शानां सौरत्वं व्याप्तिं च वदंस्तेषां भूते-
न्द्रियमात्रादिसंबन्धयोग्यत्वार्थं पाञ्चवि-
ध्यमप्याह —— स्पर्शाख्या इति, अन्त्योम-
कारः। सूर्यः जीवः आदयः। प्रकृतिबु-

ष्चहंकारमनांसि तन्मात्राश्रोत्रवागाकाशा-
दयइतरा वर्णा इति क्रमेण चतुर्विंशतितत्व-
योगः। स्पर्शा नामन्य आत्मा रविः स्वावय-
वेष्वनुगतो यस्मात् तेन स्पर्शाक्षराः सौरा-
इत्यर्थः। प्राणाग्नीलाम्बुखात्मका इति न च-
तुर्विंशतितत्वसंबन्धक्रमः। किन्तु स्पर्शा-
नामाध्यात्मं स्वरवत् भूतैः सृष्टेर्व्युत्क्रम-
८।९ उक्त इत्यवगन्तव्यम्। व्यापकानामप्यु-
त्क्रमं वदन् पञ्चशो वर्गद्वयत्वमाह—
व्यापका इति। तथेति प्राणाग्न्यादि क्रमः सू-
चितः। आग्नेयत्वं तु व्यापकानां नृसिंह-
स्य कालाग्निरूपक्षकारान्तत्वेन वक्ष्यति।
भुवनं कषत इत्यत्र पञ्चाशद्वर्णेभ्यः कथ-
मष्टत्रिंशत्कलोत्पत्तिरित्याशंक्याशाख्या-

दिशि कलारूपतिथिमासभ्राजकादिसं-
बन्धेन वर्णानामष्टत्रिंशत्संख्यत्वादिति
वदन् न्यासे मण्डलमन्त्रौ व्यापकं कलानां व-
र्णयोगं च सूचयति, शशीति॥ संबन्धविशे- १०
षमाह— स्वरैरित्यादिना, पञ्चाशत्कला- ११
न्यासे वर्णप्रणवांशभूततत्सम्बन्धिसर्व-
योगं च सूचयति — वर्णेभ्यइति॥ कामदा-
यिन्यइति मण्डलमन्त्रांशः सूचितः। उत्तरयोः
वसुधा धर्मदा इति पदाभ्यासः सूचितः। अ-
कारोद्या इत्यकारयोगस्तत्कलान्यासे ब्रह्म
जाता इत्यादिनापि तत्तद्योगः। बिन्दुजा ई-
शजानादजाः सदाशिवजा इति द्रष्टव्यम्॥
भुक्ति बिन्दुकलासु योज्या, ओषधिक-
थनप्रयोजनमाह — गुर्विकेति॥ भसितादि- 57

करणप्रकारास्तूत्तरत्र उच्यन्ते। पञ्चाशद्वं-
५७ शगुणितत्वात् पञ्चाशद्वीरयति। पङ्क्ती एव
वर्णानीत्युक्तानां निभूतिमभिध्याय तद्वीर-
णादिप्रकारं वक्तुमुपक्रमते। यथेति। स्वरूप-
तो यथा भवति स्वरमात्रा सन्धिस्थानप्रय-
त्नभूतषट्कर्मसु च येनयेन प्रकारेण भव-
५८ न्ति। तथाऽत्र वक्ष्यामीत्यर्थः। स्वरूपं निष्प-
५९ त्तिप्रकारमाह— समीरिताइति। वर्णानां पुरु-
षप्रकृत्युभयवाचकतया प्रयोगे स्वरविशेषं
विवक्षन्नाह— उच्चैरिति। उन्मार्गगइत्यु-
च्चैरित्यस्य व्याख्यानम्। तिर्यग्गः तिर्यग्गतः
६० मध्यतः प्रसरन्नित्यर्थः। पापक्षयमोक्षाप्त्याय-
नविनियोगे वर्णानां मात्राभेदं सूचयन्नाह—
६१ अर्चेति। सर्वेषामेव वर्णानां प्रकृतिपुरु-

षवान्तकत्वसिद्धयेऽध्यात्मकत्वमभिप्रेत्य केषाञ्चित्सन्धिं वदन् स्वात्मकतामाह— अकारेकारयोरिति, तेषां प्रकृतिपुरुषवाचकमन्त्रात्वमाह— सन्ध्यक्षराइति, प्रकृतिपुरुषात्मकोर्थः सर्वोर्थस्तस्य साध्यकास्तद्वाचकाइत्यर्थः। एषामृषिच्छन्दसी मातृकोक्ते देवता परमात्मा, तत्तद्वर्णाभिव्युतैः स्वरैरङ्गानि मुद्राभयशुकवरदकरो द्विभुजः शुक्लरक्तभागद्वयः प्रकृतिपुरुषात्मकः कोपि देवो ध्येयः। अवर्णस्तु वर्णयोरङ्गविशेषं वदन्नितरेष्वपि तं सूचयति, ऋवर्णवर्णयोरिति, ऋवर्णवर्णयोर्मन्त्रयोः व्यक्तिर्व्यज्यतेऽनेनेति व्यक्तिशब्देनाङ्गसामान्यमुच्यते—— लरोः लकाररेफयोः सम्यक् ६२।६२

विवरण

लां ली रां रीमित्यादिप्रकारेण प्रदर्श्यते।
मूलागमेष्वित्यर्थः। इ उ ए ऐ ओ औ वर्णा-
६४ नां यकारवकारयोः बिन्दुसर्गयोगो द्रष्टव्यः।६४
बिन्दुसर्गाङ्केषु हकारसकारयोगमाह —
बिन्दुसर्गामनोरिति। बिन्दुसर्गामनोरमयो-
रिति संबन्धः। हकारसकारयोः बिन्दुसर्गयो-
श्च क्रमेण पुरुषामलं प्रकृत्यामलं च संब-
न्धहेतुः स्थानसाम्यमकारयोगश्च। अतो
काराङ्केष्वपि हकारयोगो द्रष्टव्यः॥

ननु सर्वसमानबिन्दुविस-
र्गमन्त्रयोः स्थाने कथमकारोच्चारः। ततश्च
कथं तयोः हकारसकारसंयोगा इति? नैष दो-
षः। तयोरभिव्यक्त्यर्थत्वेनाकारसंबन्धोप-
पत्तेरित्याह — कण्ठादिरिति। तुशब्दः शंका-

व्यावृत्त्यर्थः। प्रायः सृष्टिरूप प्रकृति प्रतिभटः संहारात्मकः पुरुषः प्रायः तद्वाचको बिन्दुरित्यर्थः। सर्गस्तत्प्रतिभट बिन्दुद्वयात्मकतः प्रधानतः अकारात् पर इत्यर्थः। ६५ अतत्परत्वेऽनभिव्यक्तिदोषमाह — नश्वर इति, सर्गत्वे चेत् केवलः स्यात्। तर्हि नश्वरः स्यादित्यर्थः। बिन्दोरप्युपलक्षणार्थमेतत्। यद्येवं सहकारहकारौ प्रकृतिपुरुषवाचकौ कथं तर्हि हकारस्यैव पूर्वं सर्ववाचकत्वमुक्तमिति नायं दोषः। हकारस्याप्युभयात्मकत्वादित्याह — सोष्मा सप्राणकस्तु ह इति ऊष्मा बलं शक्तिः प्रकृतिः प्राणः प्राणस्य प्राणः एवं हकारस्य प्रकृतिपुरुषात्मकत्वमभिधाय तदेव प्रपञ्चयंस्तस्य प्रकृतिप्राधान्य-

माश्रित्य सर्ववर्णादिकारणत्वमाह — स्वर्गेइति। अकारादिवर्गमिति च्छेदः। तत्रैव वर्णविशेषाभिव्यञ्जकं प्रयत्नविशेषमाह — स्पर्शमात्रेणेति। सोष्मा साविनः। इश्च शश्चेति च्छेदः। उपसंहरति — तत्तदिति॥ ६९।

वर्णानामुत्क्रमेण भूतसम्बन्धं विशदयंस्तांस्तंभनादिषु विनियुङ्क्ते ह्रस्वाइति अ इ उ ऋ ऌ इति ह्रस्वाः परे च दीर्घाः आदयः पञ्च। ए ऐ ओ औ अं एते बिन्दूक्ताः सन्धिविकृताः ष क्ष ळ स ह स इत्यन्त्यो वर्गः (७२) स्तंभनादिप्रयोगप्रकारमाह — दशभिरिति। अं आं नमः। एं कं नमः। चं टं नमः। तं पं नमः। यं षं नमः। इत्यादि मन्त्रप्रयोगप्रकारः। योनिस्त्रिकोणं तस्य मध्ये प्रथमो मन्त्रः। द्वि-

तीयतृतीयं चतुर्थौ अग्न्यादिकोणेषु पञ्चमो मध्यमत्र ~~च~~ संयजेत्। संलिख्य सन्निन्य वा पूजयेत्। मन्त्रीति सिद्धमन्त्रस्यायं प्रयोगादिति सूचितः। मध्ये पञ्चीकृतभूतबीजं लिखित्वा तद्बिन्दूर्ध्वाधोभागादिषु साधकसाध्यकर्मयोगो यन्त्रजीवादियोगश्च सूचितः। एतच्च यन्त्रं पार्थिवमण्डलगतं स्तम्भने परिवर्षणादिष्वाप्यादिमण्डलगतानि यन्त्राणि ह्सौः इति यन्त्रजीवं मध्यबीजाधोभागे न्यसेत्। हंसः हंसं इति मध्यजीवबीजचतुर्दिक्षु मध्याभिमुखं यन्त्रप्राणं लिखेत्। “यन्त्रराजाय विद्महे वरप्रदाय धीमहि। तन्नो यन्त्रः प्रचोदयात्” इति गायत्री गुणकोष्ठदिक्षु पद्मवत्सु यन्त्रेषु दलेषु लेख्या।

तद्बीजैर्युक्तविन्दु लं रं ऊं क्षां वं डां सं हं ह्रीं अं इति यन्त्रहृदयं ततो यथावकाशं प्राणप्रतिष्ठामन्त्रा इति यन्त्रसामान्यमपि मन्त्रीत्यनेन सूचितम्। ०४ एवं पटलत्रयोक्तां सृष्टिं संक्षेपेणानुवदन् संहारमाह— पूर्वोक्तादिति। स्वयमिति। निस्तरङ्गा तत्त्वसंज्ञा प्रकृतिः सा स्वयमेव बिन्दुतत्त्वद्वारा रवतन्मात्रतां शब्दब्रह्मात्मकतामभ्युपेता प्राप्ता सती अकारादीन् षोडशस्वरान् कादीनपि पञ्चविंशस्वरानुगताभ्युपेता संयुक्तध्यातॄन्यादीन्यभ्युपेतेत्यर्थः। अर्थात्मकतामुक्तामाह— गुणसंहितैरिति। तन्मात्राभिः सह यादीनभ्युपेतेति संबन्धः। संहारमाह— व्यतीत्येति। कार्यजातमुक्तम्। स्वात्मन्येव संहृत्येत्यर्थः।

विश्वं सर्वं ब्रह्म तच्चाप्यते नाभिन्नतां प्राप्येत्यर्थः॥

इति प्रपञ्चसारविवरणे
॥तृतीयः पटलः॥

श्रीः

॥अथ चतुर्थः पटलः॥

एवं हकारस्य केवलस्य विश्वयोनित्वमभिध्यायादौ मूलवर्णशब्दोक्त हृल्लेखात्मकतां प्राप्तस्य विश्वयोनित्वं वक्तुं चतुर्थपटलारंभः——

अथेति—— अथशब्दो हेत्वर्थः हेतुत्वेन विवक्षितमर्थं स्वयमेव दर्शयति — जगत्येवं व्यवस्थितइति एवमुक्तेन प्रकारेण जगति

विवरणे

कार्ये कारणत्वेन व्यवस्थित इत्यर्थः, तुश-
१? शिव ब्दोऽवधारणार्थः। अस्य हकारस्य शक्ति-
त्वं शक्तिवाचकमन्त्रत्वमिष्यते, कथमेकरू-
पस्य हकारस्य गुणत्रयात्मकशक्तिवाच- स्व,
कत्वमिति, नैष दोषः। वर्णान्तरसंयोगः
कृतः। कर्तव्यो यस्य तस्यैव मन्त्रत्वेष्टेरित्या-
ह— कृतकृत्यस्येति, कर्तव्यमेव दर्शय-
न् हकारं विशिनष्टि, रुद्रसंस्थितेरिति,
अपृक्त, रेफोद्रो रुद्रः, संभूय स्थित इ यस्मिन् हका-
f रे संस्थिते: रुद्रनामानौ संस्थितोऽत्रेति वि-
ग्रहः। तस्य रुद्रसंस्थितौ ईकाररेफसंयुक्त-
स्येत्यर्थः। बिन्द्वादियोगार्थं रुद्रसंस्थि-
ति विशिनष्टि। स्वन्ततमिति — ततः स्वाहितं
यथा भवति तथा रुद्रसंस्थितेरित्यर्थः।

ततः । बिन्दुः । व्याप्तत्वात्तस्य अन्योर्थः । जातस्य शिशोः मुखान्निर्गतानां वर्णानां व्याप्त्यादिकमभिहितं तृतीये पटले । अथैवं वर्णानां त-
स्व, त्वे व्यवस्थितेऽस्य वर्णोच्चारकस्य पुरुषस्य
शक्ति
शक्तित्वं जगन्मूलकारणात्मकशक्त्यात्मकत्वमिष्यते । प्राकृतस्य परिच्छिन्नस्यास्योक्तशक्त्यात्मकत्वमनुपपन्नमिति चेन्न । न्यासध्यानयोगादिभिर्योगयत्नस्य संपाद्यमानत्वात् संपादितत्वाच्चेत्याह —— कृतकृत्यस्य जगतीति । जगति सर्वतत्त्वात्मके शरीरे यन्न्यासादिकं कर्तव्यं तत् कृतं यस्य साधकस्य स तथोक्तः । अत एव सततं स्वरूपसंस्थिते सदा प्रतिबद्धा संविद्रूपप्रकृत्यात्मकत्वेन स्थितिर्यस्य स तथोक्तः । उक्तस्याक्षरत्रयस्य व्याप्ति १/

॥ २, वदन् साधकस्य प्रकृत्यात्मकत्वसिद्ध्ये षोडशाङ्गन्यासमाह — प्राणात्मकमिति ॥ प्राणे सत्येव मनोदेहयोः शोकज्वरादि धर्मवत्त्वदर्शनात् तदात्मकहकारधर्मत्वं षडूर्मिणामुक्तम्। गुणचतुष्टयमाह — पवनाद्याइति॥ तेषां गुणशब्दवाच्यत्वे हेतुस्त्वक्स्पर्शाद्यैरिति, पारतन्त्र्याद्वा गुणशब्दस्तेषु करणानि मनआदीनि श्रु

वि संघातोऽवशिष्टं कार्यकरणसंघातः, वि दचेत्ता चेता

अ चैतन्याभ्यासः। चेतना लक्षणा बुद्धिवृत्ति-

यं न्ते र्वा। अयमष्टा न्यासक्रमः। प्राणात्मकं प्राणशारीरं हकाराख्यं बीजं बिन्दुसहितं हं प्राणात्मने नम इति प्राणबुद्ध्या व्यापयेदित्यर्थः। तेन प्राणात्मकेन हकारेण सह तद्भवाः षडूर्मयः स्वाधारेषु न्यस्तव्याः। हं बुभुक्षायै नमः।

हं पिपासायै नमः। हं शोकाय नमः। हं मोहाय नमः।
हं जरायै नमः। हं मृत्यवे नमः। इति प्राणबुद्धि-
देहेषु यथायोग्यं न्यसेदित्यर्थः। रेफोत्था
गुणा इति च शब्दाद्याका~~कै~~शशब्दौ गृह्येते। रं
आकाशशब्दाभ्यां नम इति मूर्ध्नि। न्यस्य रं गा-
युस्पर्शाभ्यां नमः। रं तेजोरूपाभ्यां नमः। रं
अब्रसाभ्यां नमः। रं पृथिवीगन्धाभ्यां नमः॥ स्र
इति वक्त्रहृद्गुह्यपादेषु न्यसेदित्यर्थः। कर-
णान्यपीति। ईं ज्ञानशक्तये नम इति व्यापय्य
ईं मनसे नमः। ईं बुद्ध्यै नमः। ईं अहंकारा-
य नमः। ईं चित्ताय नमः। ईं संघाताय नमः। मने
ईं चेतनायै नमः। इति मनआदिषु न्यसेदित्य-
र्थः। बुद्ध्यैरिति। प्रणवशक्तिभ्यां व्यापकं सू-
चितम्। अस्यैव न्यासस्य षोडशस्वरयोग-

शप्राराग

विवरणे

माह — उकारान्ताइति । तुर्योऽदरस्तत्तद्धकार-
युक्तस्वरयोगं सूचयति — हं बुभुक्षायै नमः
नमः हां पिपासायै इत्यादि रं वायुसखीभ्यां
यैं महस्से यैं कुक्ष्ये नमइत्यादयो मन्त्राः हकार-
स्य महात्मन इति तत्तद्वर्गन्यासानन्तरं तैस्तै-
हां र्वर्गैः सहितेन तेनतेन वर्णेन व्यापकं सूचितम् ।
हं हां हिं हीं हुं हूं हकारात्मने नमइत्यादयो
व्यापकमन्त्राः इति ॥ ~~इम~~ इदं षोडशांगवदिति
नु तत्र द्वीपप्लुतषोडशस्वरानि लृकाऽन्ते ह्री
इत्युच्चार्य व्यापकं सूचितमिति । एतैरुक्तैः
स्वरैरिदं बीजं साध्यकशरीरं च षोडशांग-
ह वदित्यर्थः पुनरप्यस्यैव न्यासस्य विश-
शेषमाह — एभ्य इति । एभ्यः उक्तेभ्यो हका-
रादिविशिष्टेभ्यः स्वरेभ्यो बुभुक्षादिभ्यः

चतुर्थः पटलः

चाङ्गेभ्यः। सर्वगाः सर्ववर्णानुगताः स्वराः अकखादिक्षान्ताक्षराः संयुक्ताः स्वराः संज्ञिरइत्यर्थः। अयमत्र प्रयोगक्रमः हं अं बुभुक्षायै नमः। हां आं पिपासायै नमः। हिं इं शोकाय नमः। इत्यादि स्थानं व्यापकादिकं पूर्ववदेव, अथवा पूर्वोक्तस्वरपारायणन्यासवदेवं न्यासः कार्यइति। षट्त्रिंशन्न्यासभेदा गताः। पुनरप्यस्यैव न्यासस्य भेदं सूचयति, तेभ्योवर्णान्तराः स्वर्वइति, तेभ्यः हकारादिविशिष्टा कखगघादि संयुक्त षोडशस्वरेभ्यः बुभुक्षादिभ्यस्त्व वर्णान्तराः अकखादि षट्त्रिंशद्वर्णाः संज्ञाज्ञिरइत्यर्थः। अयमत्र प्रयोगक्रमः। अं अं बुभुक्षायै नमः। हं अं कं बुभुक्षायै नमः। हं कं खं बुभुक्षायै नमः॥

इत्यादि क्षान्तं स्यमानम्। हं आं अं बुभुक्षायै नमः। हं औं कं बुभुक्षायै नमः। इत्यादि क्षान्तमेवमेव हं अः अं बुभुक्षायै नमः। हं अः कं बुभुक्षायै नमः। हं अः खं बुभुक्षायै नमः। इत्यन्तं द्रष्टव्यम्। अकारपद्मदलेषु वृत्ताकारेणैषां न्यासः। हं कं अं बुभुक्षायै नमः। हं कं कं बुभुक्षायै नमः इत्यादि षोडशपर्यायाः कांबुजदलेषु वृत्ताकारेण न्यस्तव्याः। पुनः हं खं अं बुभुक्षायै नमः। हं खं कं बुभुक्षायै नमः। हं खं खं बुभुक्षायै नमः। इत्यादिका ब्रह्मपारायणवत् खाद्यम्बुजदलेषु न्यस्तव्या इति बुभुक्षान्यासभेदाः। अथ पिपासादिन्यासभेदाअप्याद्यौ हों हीमादियुता ब्रह्मब्रह्म पारायणपादादि ह्र-

स्वरैरेव संयोज्याकाराद्यम्बुजदलेषु न्यस्तव्याः। ह्रां अं अं पिपासायै नमः। तथा ह्रां अं कं पिपासायै नमइत्यादि क्षान्तं ह्रां आं अं पिपासायै, ह्रां आं कं पिपासायै इत्यादि विसर्गान्तमूह्यम्। ह्रां अं कं (अं) पिपासायै। ह्रां कं कं पिपासायै ह्रां कं खं पिपासायै इत्याद्यूह्यम्। पुनः ह्रां खं अं पिपासायै, ह्रां खं कं पिपासायै, ह्रां खं खं पिपासायै इत्याद्यूह्यम्। सर्वं ततो मूलमिदं विदुरिति प्रतिपर्यायं मूलेन व्यापकन्यासाः सूचिताः। गतो वो बीजतामित्यादिना षडङ्गन्यासः सूचितः। वो युष्माकं ब्रह्मविष्णुरुद्राणां बीजं तां वाचकतामीश्वरसदाशिवयोरप्युपलक्षणमेतत्। अप्राणिष्वङ्गषट्कविशिष्टेषु जीवेष्वेवमुक्तेन

प्रकारेण पञ्चमूर्त्यात्मकत्वे सति अध्वाभिमानित्वेन व्यवस्थितः। अथवोपाधिक प्राणिनियामक पञ्चमूर्त्यात्मना व्यवस्थित इत्यर्थः। तत्राध्वानः संग्रहेणोच्यन्ते। विस्तरस्याशक्यत्वात् अध्वानो द्विविधाः वाच्यवाचकभेदेन वाचको वर्णपदमन्त्रभेदेन त्रिविधः। वाच्यं च तत्वभुवनकलाभेदात्। हं हिं हुं हें होमिति वर्णाः ओं ह्रीं हौं नमः शिवाय शिवायै इति वा पदपञ्चकं सद्योजातादयो मन्त्राः पृथिव्यादीनि तत्वानि ब्रह्मलोकादीनि भुवनानि ब्रह्माद्याः मूर्तयः। कला इति मूर्तिस्थाने तु न्यासः। अक्षरतत्वपदभुवनमन्त्रकलाक्रमेण न्यासः। हं नमः। पृथिव्यै नमः। ओं न-

चतुर्थः पटलः

मो ब्रह्मलोकाय नमः। सद्योजाताय नमः। ब्रह्मणे नमः इत्यादिक्रमेण मन्त्रप्रयोगो द्रष्टव्यः। प्रणवेनैतान् क्रमेण संहृत्य योगः कार्य इत्याह — ब्रह्माण्डमिति, ब्रह्माण्डमित्युपलक्षणम्। सर्वस्याध्वजातस्य व्याप्तं स्थावरजंगममिति मूलाधिष्ठेयतया ध्यातस्य तत्तत्त्वाविर्वर्तिनः प्राणिजातस्यापि लय इत्युक्त॰। नाद इत्यादिना मूर्तिलयानन्तरं मात्रान्यासप्रयोगमाह — हों नादात्मने। हां प्राणात्मने, एवं घोषजीवबिन्दुकला निरोधिका नादनादान्तादयोऽपि वाराबारभ्य व्यापकत्वेन न्यस्तव्याः। लिङ्गन्यासमाह — एष इति, रं पुरुषात्मने नमः। ईं स्त्र्यात्मने नमः। हं नपुंसकात्मने नमः। ह्रीं अलिङ्गात्मने नमः।

इत्येते मन्त्राः सूचिताः। दक्षिणोत्तरमध्यभागव्यापकेषु न्यासः। एष इत्यनेन व्यापकमन्त्रः सूचितः। शक्त्यादिन्यासं सूचयन् व्याप्तिमाह — शक्तिश्रीरिति। इत्याद्यैरिति। इत्येताभिः शक्तिभिः आद्यैश्चकारादिक्षकारान्तैर्वर्णैः सह मातृकास्थाने न्यसेदित्यर्थः। ॐ शक्त्यै नमः। ॐ शक्त्यै नमः। इत्यादयो मन्त्राः। एवं ॐ श्रियै नमः। इत्यादिरूपा पर्याया ऊह्याः। एतेषामेव न्यासानां विशेषमाह — स्वार्थवाचकैरिति। स्वार्थशब्देन कुण्डलिन्युच्यते। तस्या वाचकास्त्र्यक्षराः त्रिबीजात्मकाश्च मन्त्राः। विद्याश्च तैश्च सह शक्त्यादिन्यासं कुर्यात्। प्रथममेकं बीजं संयोज्य शक्त्यैकादशकं ~~कुर्यात्~~ न्यसेत्। पुनः द्वितीयसम-

९

स्तरसंयोगेनापि तथा न्यसेदित्यर्थः। उक्तबीजसंयुक्त एव न्यासे मन्त्रान्तरसंयोगमाह— नानाविकारतां प्राप्तैरिति। उक्तत्रिबीजमन्त्राणां विकारत्वं नानाविधत्वं प्राप्ता ये ब्रह्मसरस्वती विष्णुलक्ष्मीरुद्रोमागणेशदुर्गादयस्तेषां मन्त्रैरित्यर्थः। तैश्च सहोक्तमेव न्यासं कुर्यादिति। सर्वमन्त्राणां शक्त्यादिन्यासः सूचितः। ओं अं ऐं नमो ब्रह्मणे शक्त्यै नमः। ओं अं ऐं नमः। सरस्वत्यै शक्त्यै नमः। ऐं नमो विष्णवे शक्त्यै नमः। ओं अं ऐं नमो लक्ष्म्यै शक्त्यै नमः। ओं अं ऐं ~~नम~~नमः शिवाय शक्त्यै नमः। ओं अं ऐं नमः उमायै नमः। ओं ~~ह~~ अं ऐं गं क्षिप्रप्रसादाय नमः शक्त्यै नमः। ओं अं ऐं ओं ह्रीं दुं दुर्गायै नमः शक्त्यै नमः इत्यादिप्रकारेण सर्वमूलमौलि-

विवरणे

क्रमन्त्रेषु प्रयोगा द्रष्टव्याः। अथैवं विधानामेवैषां सर्वेषां स्वरपारायणन्यासमाह — स्वैस्स्वैर्भावैरिति॥ ~~स~~ स्वैस्स्वैरकारककारसंबन्धिभिः भावैः षोडशस्वरैः सह न्यसेदित्यर्थः। न्यासस्तु षोडशदलेषु कार्यः। व्यञ्जनपारायणन्यासमाह — विकल्पितैरिति। पूर्वोक्तविरचनावत् विकल्पोऽवगन्तव्यः।

अ।१२ कुण्डलीन्यासं वक्तुं स्थानं सूचयति। तामेनामिति। अन्ये मूलाधारनाभिभ्रूमध्यद्वादशान्तेषु विदुरिति स्थानसूचनमेतत्। सारैति सर्वस्थानानुगतनादज्योतिश्चिन्तनमुक्तम्।

१३ कुण्डलिन्यासमाह — आकृतिरिति स्वेन भावेन कुण्डलिनी वाचकहकारेण कुण्डलिनीबीजेन च पिण्डिता-

चतुर्थः पटलः

माकृति ब्रह्मकलादिरूपेण सर्वस्थानेषु बहुध्या बिन्दुरित्यर्थः। तयोर्भावः। ह्रां ह्रीमिति कुण्डलिनीबीजाभ्यां त्रिकोणमध्ये न्यसेत्। ब्रह्माणं सरस्वतीं च साक्षिणञ्च हं परब्रह्मणे परशक्त्यै नमः। हं साक्षिणे साक्षिण्यै नमः। इत्यपि मध्यतया व्यापकत्वेन विन्यसेत्। ह्रैं चतुर्मूर्तये चतुर्मूर्त्यै नमः। इत्यपि व्याप्य ह्रों सर्वेश्वराय मूलप्रकृत्यै हों रुद्रसर्वेश्वराय उमामूलप्रकृत्यै हें विष्णुसर्वेश्वराय लक्ष्मीमूलप्रकृत्यै ह्रूं ब्रह्मसर्वेश्वराय सरस्वतीमूलप्रकृत्यै नमइति द्वादशान्तभ्रूमध्यहृदयनाभिषु त्रिकोणमध्ये कोणत्रयेषु चान्यस्मिला तेषां परिवारत्वेन वक्ष्यमाणान् मन्त्रान् न्यसेत्। ह्रूं रुद्ररुद्राण्यो मो मायै ह्रूं रुद्राविष्णवे

उमालक्ष्म्यै ह्रूं रुद्रब्रह्मणे उमासरस्वत्यै नमइति रुद्रसर्वेश्वरपरितः हूं विष्णुरुद्राय लक्ष्म्युमायै हुं विष्णुविष्णवे लक्ष्मीलक्ष्म्यै ह्रूं विष्णुब्रह्मणे लक्ष्मीसरस्वत्यै नमइति विष्णुसर्वेश्वरपरितः हिं ब्रह्मरुद्राय सरस्वत्युमायै हं ब्रह्मविष्णवे सरस्वतीलक्ष्म्यै हें ब्रह्मब्रह्मणे सरस्वतीसरस्वत्यै नमइति ब्रह्मसर्वेश्वरपरितइति ॥

एवं नाभौ न्यसेद्वा हृदयादिषु मध्ये विष्ण्वादीन् स्वामिन्युक्तप्रकारेण षोडशमूर्तिन्यासं कुर्यात्। कुण्डली सर्वध्या ज्ञेयेति चतुर्मूर्तियोगादि निर्विकल्पयोगान्तान् योगान् उक्ता सूचयति। तेन मन्त्रेण एवं कुण्डली ~~ह~~ ध्येयेति होमिति सङ्कारेण वेनेत्या-

चतुर्थः पटलः

ह — चराचरस्येति। न केवलं प्रणवएव बीजं यतस्तद्यपि शब्दब्रह्म हकारो बीजमेवेत्यर्थः॰। बीजत्वमेव प्रपञ्चयन् मूर्तित्रयासमाह — मूलतस्येति। रेफान्वितेन इकारेण योगाद्विष्णोरुत्पत्तिः॰। रेफान्वितेनाकारेण योगाद्रुद्रस्य उक्तेर्थे गमकमाह — अंहंकारान्त्यइति॥ सर्वात्मत्वं मम सर्वसंयोगादित्यर्थः। हं ब्रह्मणे नमः। ह्रीः विष्णवे नमः। ह्रः रुद्राय नमः॰। ह्रीं सर्वेश्वराय नम इति नाभ्यादिषु न्यसेदित्यर्थः। एतदेव मन्त्रचतुष्टयं प्रणवसंयुक्तं पिण्डीकृतं प्रणवचतुष्टयं भवति। हों ह्रौं ह्रूं ह्रोमिति विभूत्यन्तरं दर्शयन् जपापरमात्मप्रणवन्यासानाह — अस्येति। अस्य हंस्य बिन्दुनादाभिव्यक्तेस्तदन्त-

स्ताच्चिद्रस्केवलौ सौ ह॰ हमित्युच्यन्ते। इत्यजपाप्रथमबीजोद्धारः। द्वितीयबीजस्वरूपमाह—स इति, उद्धृतयोर्बीजयोस्तत्त्वं वदन् न्यासमन्त्रावाह—अहंकार इति॥ हं पुरुषात्मने नमः। सः प्रकृत्यात्मने नमः। इति मन्त्रौ सूचितौ, देवतात्वेन शक्तिरेव ध्येयेत्याह—जपेति, न्यासस्थानमाह—तथा दक्षिणवामत इति। यथा मूलशिरसोर्न्यासः प्रसिद्धः। तथा दक्षिणवामयोरपि न्यस्तव्यावित्यर्थः। न्यासे नियममाह—बिन्दुरिति। बिन्दुविसर्गयुक्तौ हकारसकारौ बिन्दुविसर्गशब्दाभ्यां भागानियमे गमकमाह—ते ते निदेवस्य सर्वेषां चेत्यर्थः। तेन कथं पुंस्त्रीविशेषितत्वमिति ~~तत्राह~~ बिन्दुरिति। अतोर्ध्वनारीश्व-

१५ १६ ८ १२

रदेवत्यो हंसमन्त्रः तथा ध्येयइत्याह — पुंप्रकृतीति। तस्य सर्वात्मकत्वं पदन्यासफलमाह — तदात्मकमिति। अयमत्र द्वितीयो न्यासप्रकारः ——— उक्तमन्त्राभ्यां शिरोललाटभ्रूनेत्रश्रोत्रनासागण्डगलांसबाहुमूलोपबाहुकूर्परप्रकोष्ठमणिबन्धतलाङ्गुल्युरःकक्षस्तनोदरपार्श्वनाभिजठर[illegible]स्फिग्वृषणपादमूलोरुजानुजङ्घागुल्फप्रपदाङ्गुलिद्वयेषु न्यसित्वा हंसः प्रकृतिपुरुषात्मने नमइति व्यापयेदिति पुंप्रकृत्यात्मको हंसइत्यनेनैव सूचितो व्यापकमन्त्रः। एवं प्रत्यगात्मनो ब्रह्मणैकत्वप्रतिपादकं मनुमभिध्याय तस्यानेन तत्प्रतिपादकं परमात्ममन्त्रमुच्चरति। १९।

पुंरूपमिति — स्यात्तदुपाधिको जीवइत्यर्थः।

अस्यापि मन्त्रस्य न्यासादिकमुक्तप्रायं पु-
नरेकत्वानुभवसाधनं प्रणवमुद्धरति।
२२ अस्य महामनोरिति। उद्धृतस्य तारस्य
न्यासयोगादिकं वदन् विभूतिमाह —
तारादिति। मं आकाशात्मने नमः। मं तेजआ-
त्मने नमः। मं अबात्मने नमः। मं पृथिव्यात्मने
नमः इति मूर्धादिषु न्यसेदिति मकारन्या-
सः। उं सूर्याय नमः। उं सोमाय नमः। उं अग्नये
नमः। इति हृन्मूर्धमूलाधारेषु उकारन्यासः।
अं शब्दब्रह्मणे नमइति व्यापयेदित्यकार-
२२ न्यासः। गायत्रीतत्वन्यासं सूचयन् गायत्री
देवताप्येषैव शक्तिरिति सहेतुकमाह —
तत्वमिति। तत्वन्यासं सूचयति, यद्वातद्वेति।
२३ तत्वन्यासे गायत्रीवर्णसान्निध्यमाह — त-

पूर्णेति। तच्छब्दस्तत्त्ववाचकः। तत्त्वसंख्य-
वर्णसंयुक्तेत्यर्थः। सप्रग्रहामकलं वदन् स-
ग्रहन्यासं सूचयति, — सप्रग्रहामिकेति।
हकारादिक्षान्तान्तान्तैः यद्वा सप्रमोदिनीत-
द्वा सप्रग्रहामिकेति न्यासमन्त्रेषु हकारा-
त्मने ~~नमः~~ नम इत्यादियोगः सूचितः। मन्त्रशेषं २४।
सूचयति — तद्वा स्वरैरा इति, अं आं इं ईं
उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं, अः। स्वरा- अ।
धिपतये सूर्याय भगवते हकारात्मने नमः।
कं खं गं घं ङं कवर्गाधिपतये अङ्गारकाय
भगवते रेफात्मने नमः। चं छं जं झं ञं चव-
र्गाधिपतये शुक्राय भगवते ईकारात्मने नमः।
टं ठं डं ढं णं टवर्गाधिपतये बुधाय भगव-
ते बिश्वात्मने नमः॥ तं थं दं धं नं तवर्गाधि-

विवरणे

पतये बृहस्पतये भगवते नादात्मने नमः॥ पं फं बं भं मं पवर्गाधिपतये शनैश्चराय भगवते शाक्त्यात्मने नमः। यं रं लं वं शं षं सं हं ळं क्षं यवर्गाधिपतये सोमाय भगवते शान्तात्मने नम इति मन्त्राः सूचिता इति, सहगुणा त्रियमिति ह्रीं अं क्षं सर्वाधिपतये सर्वेश्वर्यै संविदे नमः। इति व्यापकमन्त्रः सूचितः। तस्या व्यापकत्वं सूचयन् ग्रहाणां सूर्यात्मकसंविद्व्याप्यत्वमाह — यथेति, २५ उक्तं हि स्वरकार्यत्वं वर्णान्तराणां तेभ्यो वर्णान्तराद्युत्पत्त्या सह ग्रहन्यासार्थः। षड्गुणितयन्त्रं सूचयति — यन्त्रमिति, स्मृतिकोविदैरिति स्मृतिप्रकारः सूचितः। हृदयमध्यगुह्य

२८ जान्वंसमूर्धांसजानुकोणं स्मरन्तीत्यर्थः।

चतुर्थः पटलः

अस्य न्यासस्य ध्यानं देवताव्याप्तिं च दर्शि-
यति — सर्वेति । अहोरात्र~~क~~ न्यासमाहास्या- २९
दित्विति । रेफकार हकार रल आदयः रं
अन्हे नमः । ईं रात्र्यै नमः । हं मेरवे नमः । ह्रीं भा-
स्कराय नमः । इति मन्त्रा मूर्ध्वमूलाधारसुषु-
म्ना हृत्सु न्यस्तव्या इत्यर्थः । राशिव्याप्तिं व- ३०
दन् राशिन्यासे वर्णयोगं सूचयति — अस्या
इति । ~~का~~ कालचक्रमध्ये लवादिन्यासं रा-
शिन्यासं च सूचयति । लवादिचक्रसंहारे- ३१
ण स्वरूपास्थिति सूचयति ऋद्धेति । चक्रस्य
गतिः संहारः जगतः परमात्मस्वरूपेण स्थिति-
रित्यर्थः । वक्ष्यामीति सुबोध्यम् । अन्तर्बहि- ३२
रित्ययमर्थः । चतुरस्राद्यात्मकं सकोणसूत्रं
राशिमण्डलं मूर्ध्वाधारे मनसा लिखित्वा त-

विवरणे

न्मध्ये षट्कोणं देव्यधिष्ठितमध्यं लवत्रुटिकलाकाष्ठानिमेषमात्राधिष्ठितषट्कोणं स्मृत्वा राशिचक्रे प्रतित्रिकोणं चतुरस्रं लिखित्वा तेषां मध्ये त्रिकोणानि लिखेत्। तत्र चतुरस्रकोणेषु त्रिकोणकोणेषु च षट्कोन्यास॰। राशिव्यापकमन्त्रै॰ वक्ष्यमाणैस्तस्मिंस्तस्मिन् राशौ व्यापकस्तत्र त्रिकोणमध्ये राशिवर्णै॰ सह ध्यात्वा चादित्यन्यास॰। ततो वक्ष्यमाणमन्त्रैराशिवेधन्यास॰। ततस्तदधिपतिवेधन्यास॰। पुना राशिचक्रात् बहिर्वृत्तं लिखित्वा ~~त~~ तत्र परितः सप्तविंशतित्रिकोणान्यपि लिखित्वा तेषु नक्षत्रन्यासं नक्षत्रदेवतान्यासं नक्षत्रवेधन्यासं च कृत्वा तद्बहिरपि वृत्तं विधाय तत्र

चतुर्थः पटलः

त्रिंशत्त्रिकोणात्मकं तिथिचक्रं लिखित्वा तेषु तिथिन्यासं तिथिदेवतान्यासं च कृत्वा मेषमीनान्तराके तिथिचक्रे वा करणन्यासं कृत्वा समष्टिमन्त्रेण व्यापयेत्। अथवा राशिचक्र एव नक्षत्रतिथिन्यासोऽपि तथा चेत् राशिमण्डलमेव नक्षत्रमण्डलं तिथिमण्डलं च कार्यमित्युक्तं बैद्विर्विभेदेन राश्यादिमण्डलरचनाप्रकारो न्यासप्रकारश्चोक्तः ॥

अथ मन्त्रविशेषप्रदर्शनार्थं ग्रन्थे व्याख्यायते। भूचक्र इति, समष्टिमन्त्रो भूचक्राय नमः। इति योगो दर्शितः। मेषादिरिति न्यासोपक्रमव्याख्यानं दर्शितम्। मानुष इति, राशिव्यापकमन्त्रेषु लग्नादे॰ पूर्वं मानु-

३९। मपदयोगो दर्शितः। तेषामेव प्रथमतोऽक्षरयोगक्रमं दर्शयति — आद्यैरिति। वर्णानामुपरि राशिनाडिकासंख्यायोगं दर्शयति — ख्यातामिति॥ अनेनैव नाडिकान्यासोऽपि दर्शितः। संख्यायाः परस्तात् त्रिरश्मिरोऽव्ययपदं पीतादिपदं च दर्शयति — चापइति॥ ४०। चरादिपीताद्योर्मध्ये ब्राह्मणादिपदं दर्शयति — स्युरिति — ४१। राश्यधिपतिन्यासं दर्शयति — अङ्गारादिति। ४२। राशिनाम्नः पूर्वं लग्नादियोगं दर्शयति — लग्नइति। अयमत्र प्रयोगक्रमः। ह्रीं समस्तकालसाक्षिण्यै संविदे नमइति षट्कोणमध्ये न्यसेत्। ह्रीं लवाय नमः। ह्रीं त्रुट्यै नमः। ह्रीं कलायै नमः। ह्रीं काष्ठायै नमः।

चतुर्थः पटलः

ह्रीं निमेषाय नमः। ह्रीं मात्रायै नमः। इति षट्कोणेषु ह्रीं मेषराशिप्रथमघटिकायै नम॰। ह्रीं मेषराशिद्वितीयघटिकायै नमः। एवं तृतीयचतुर्थघटिकायै नमइति राशिमध्यचतुरस्रकोष्ठेषु न्यसित्वा मेषराशिपादाय नम इति चतुरस्रमध्यगतत्रिकोणाग्रकोणे न्यसेत्। एवं सर्वत्र घटिकान्यासो द्रष्टव्य॰। घटिकान्यासानन्तरं राशिमन्त्रैस्तं राशिं व्यापयेत्। ह्रीं अं आं इं ईं सपादचतुर्घटिकात्मने चरात्मने नृपवर्णात्मने रक्तवर्णाय मनुष्यलग्नाय मेषराशये नमः। उं ऊं ऋं पादोनपञ्चघटिकात्मने स्थिरात्मने शूद्रवर्णात्मने श्वेतवर्णाय मनुष्यध्वनाय ऋषभराशये नम॰। ॠं लृं ॡं पादाधिकप-

ञ्चघटिकात्मने उभयात्मने वैश्यवर्णात्मने पीतवर्णाय मनुष्यभ्रात्रे मिथुनराशये नमः। एं ऐं अर्धाधिक पञ्चघटिकात्मने चरात्मने ब्राह्मणवर्णात्मने रक्तवर्णाय मनुष्यबन्धवे कर्कटकराशये नमः। ओं औं पादाधिकपञ्चघटिकात्मने स्थिरात्मने नृपवर्णात्मने श्वेतवर्णाय मनुष्यपुत्राय सिंहराशये नमः। अं अः शं षं सं हं ळं पञ्चघटिकात्मने उभयात्मने शूद्रवर्णात्मने पीतवर्णाय मनुष्यशत्रवे कन्याराशये नमः। कं खं गं घं ङं. पञ्चघटिकात्मने चरात्मने वैश्यवर्णात्मने रक्तवर्णाय मनुष्यकलत्राय तुलाराशये नमः। चं छं जं झं ञं पादाधिकपञ्चघटिकात्मने स्थिरात्मने ब्राह्मण-

चतुर्थः पटलः

वर्णात्मने श्वेतवर्णाय मनुष्यमरणाय वृश्चिकराशये नमः। टं ठं डं ढं णं अर्धाधिकपञ्चघटिकात्मने उभयात्मने नृपवर्णात्मने पीतवर्णाय मनुष्यधर्माय धनूराशये नमः। तं थं दं धं नं पादाधिकपञ्चघटिकात्मने चरात्मने शूद्रवर्णात्मने रक्तवर्णाय मनुष्यकर्मणे मकरराशये नमः॥ पं फं बं भं मं पादोनपञ्चघटिकात्मने स्थिरात्मने वैश्यवर्णात्मने श्वेतवर्णाय मनुष्याय कुंभराशये नमः। यं रं लं वं क्षं त्रिपादोनपञ्चघटिकात्मने उभयात्मने ब्राह्मणवर्णात्मने पीतवर्णाय मनुष्यव्ययाय मीनराशये नमः इति व्यापकमन्त्राः॥

अथ ध्यानादिन्यासः॥

मेषराशये नमइत्यादिषु मेषराश्यधिपतये धात्रे नमइत्यादि योऽयं धात्रादिन्यासे ॥

॥ अथ राशिवेधंन्यासः ॥

· राशी॰ व्यापकमन्त्रैरेव वध्युर्धेनुर्मेषसिंहाइति वक्ष्यमाणप्रकारेण न्यासः ॥

॥ अथ राश्यधिपग्रहन्यासः ॥

तत्र मेषराश्यधिपतये धात्रे नमइत्यादि स्थानेषु मेषराश्यधिपतये अङ्गारकाय नमः। इत्यादिकं प्रक्षिप्य न्यासः कार्यः। आधिपत्यक्रमाङ्गारावलम्बिका इत्यादिनोक्तः॰ मू- ४१
४२ लाधारचक्रवदेव हृच्चक्रेऽपि न्यासः कर्तव्यः इत्याह — ततस्तद्वर्गे इति तत्र न्यासः सिंहादिक इत्याह — सतीति। लग्नादश्य-

चतुर्थः पटलः

ऽत्र पितृलग्नाय सिंहराशये नम॰। इत्येवं क्रमे-
ण योज्य इत्याह — यस्मिन्निति, मूर्धस्थ- ८४
चक्रगेऽपि समो न्यास इत्याह — तदूर्ध्व इति।
तत्र चापादिको न्यास इत्याह सौरीति॥ चक्रत्रय-
न्यासानन्तरं त्रैनाभिकाय कालचक्राय नम
इति व्यापकमाह — चक्रत्रैनाभिक इति। ध- ८५
नुर्मासाय देवलग्नाय धनूराशये नम इत्यादि
क्रमेण मन्त्राः प्रयोक्तव्य इत्याह — धनुस्त्विति।
मासादूर्ध्वं लग्नादिकमुच्यत इत्यर्थ॰। वे-
धन्यासप्रकारमुत्क्रमाह — वध्वुरिति। ८६
नक्षत्रन्यासं वदन् वेधसाम्यात् प्रथमं न-
क्षत्रवेधन्यासमाह — मूलेति। न्यास-
क्रमस्तूच्यते। ह्रीं अं आं अश्विन्यै नमः। इं भ-
रण्यै नमः। ईं उं ऊं कृत्तिकायै नमः। ऋं ॠं ऌं

रोहिण्यै नमः। एं मृगशीर्षायै नमः। ऐं आर्द्रायै नमः। ओं औं पुनर्वसवे नमः। कं पुष्यायै नमः। खं गं आश्लेषायै नमः। घं ङं मघायै नमः। चं पूर्वायै नमः। छं जं उत्तरायै नमः। झं ञं हस्तायै नमः। टं ठं चित्रायै नमः। डं स्वात्यै नमः। ढं णं विशाखायै नमः। तं थं दं अनुराधायै नमः। धं ज्येष्ठायै नमः। नं पं फं मूलायै बं पूर्वाषाढायै नमः। भं उत्तराषाढायै नमः। मं श्रवणायै नमः। यं रं श्रविष्ठायै नमः। लं शतभिषजे नमः। वं शं प्रोष्ठपदे नमः। षं सं हं क्षं उत्तराभाद्रपदायै नमः। अं अः लं रैं रेवत्यै नमः। इति नक्षत्राणि न्यसेत्। पुनस्तत्रैव नक्षत्रदेवतान्यासं कुर्यात्। अं आं अश्विन्यधिपतिभ्यामश्विभ्यां नम इत्यादि क्रमेण मन्त्राः द्रष्टव्याः। पुनरेभिरेव

चतुर्थः पटलः

मन्त्रैः नक्षत्रेष्वन्यासं। स च मूलाश्विन्यादि क्रमेण न्यस्तव्यं। राशि चक्रएवचे नक्षत्रान्यासस्तदा राश्यर्णै राशिभिश्च सह न्यासं कार्यं। ॐ आं इं ईं अश्विनी भरणी कृत्तिकापादात्मने मेषराशये नमइत्यादि क्रमेण मन्त्रा द्रष्टव्यां। एवं कृत्तिकापादत्रयरोहिणी मृगशीर्षा पूर्वार्धात्मने वृषभराशये मृगशीर्षोत्तरार्धार्द्रा पुनर्वसुत्रिपादात्मने मिथुनराशये। पुनर्वसूपाद पुष्याश्लेषात्मने कर्कटकराशये मखापूर्वोत्तर पादात्मने सिंहराशये उत्तरात्रिपादहस्तचित्रापूर्वार्धात्मने कन्याराशये चित्रोत्तरार्धस्वाती विशाखात्रिपादात्मने तुलाराशये विशाखापादानुराधाज्येष्ठात्मने वृश्चिकराशये मूलपूर्वाषाढोत्तराषाढपा-

दालने धनुराशये उत्तराषाढा त्रिपाद्यश्रव-
णाश्रविष्ठा पूर्वार्धालने मकरराशये श्रविष्ठोत्त- ६६^
रार्धशतभिषक् पूर्वाभाद्रा त्रिपादालने
कुंभराशये। पूर्वभद्रापाद्योत्तराभद्रा रेवत्या-
लने मीनराशये इति मन्त्रांशाः। प्रथमं राशिगत-
पूर्वपाद त्रिपाद्यर्धत्रिकोणेषु नक्षत्रन्यासं कृत्वो-
क्तैः मन्त्रैः व्यापयेद्बुधः। नक्षत्रावेधन्यासक्रमं
दर्शयति — मूलाश्विनीति। मूलाश्विनी मघा
४९^ द्युः। एवं ज्येष्ठा रेवत्याश्लेषाद्याः। पूर्वो-
चे क्तराशिव्यापकमन्त्रक्रमं सूचयति — पूर्वे-
ति। राश्यधिपन्यासे राशिवेधन्यासे
नोक्तमेव मन्त्रं सद्विशेषं सूचयति। राश्य-
५०^ धिपादिष्विति। नक्षत्रन्यासेऽक्षरयोगक्रम-
६३^ माह — एभ्यएवेति। नक्षत्रवृक्षाकथन-

मुत्तरत्र प्रयोगार्थं नक्षत्रदेवतान्यासं सूचयति।
६६। अश्वीति। तिथिन्यासं सूचयति पञ्चदशेति —
हं शुक्लपक्षाय नमः। सः कृष्णपक्षाय नमः। इति
तिथिमण्डले दक्षिणवामभागयोः न्यसेदिति
पक्षन्यासः। हं अं शुक्लप्रथमाकलायै नमः।
इत्यादि। हं अं शुक्लपञ्चदशीकलायै नम इ-
त्यन्तं तिथिमण्डले वामभागे विन्यस्य सः कं खं
कृष्णप्रथमाकलायै नमः। सः गं घं कृष्णद्विती-
याकलायै नमः। एवं सः ङं चं कृष्णतृतीया
कलायै नम इत्यारभ्य सः वं शं षं कृष्णपञ्च-
दशीकलायै नम इत्यन्तं दक्षिणभागे न्यसे-
त्। पुनः तिथ्यधिपतिन्यासं कुर्यात्। हं अं
शुक्लप्रथमाकलाधिपतयेऽग्नये नम इत्यादि-
मन्त्रैस्तिथ्यधिपतिन्यासः। पक्षद्वयेऽप्यन्या-

विवरणे

ध्यात्र वक्ष्यमाणा देवता॰। राशिचक्रएव वा
पूर्णोर्ध्वेषि कोणेषु तिथ्यादिन्यास॰। अथवा
तिथिचक्रे तिथिन्यासं कृत्वा राशिचक्रे तिथि-
न्यासं कुर्यात्। ॐ आं इ ई शुक्लप्रथमा द्विती-
या तृतीयार्धकलात्मने मेषराशये नमः इ-
त्यादिमन्त्रैः॰ तत्तद्राशिस्थानेषु न्यापयेदि-
ति न्यासप्रकार॰। ताभ्योऽमावास्यान्ता व-
र्तन्त इत्यनेन राशिचक्रे तिथिन्यासो दर्शितः। ६८
६९ वर्णभेदतो भिन्नाकृति, तिथिचक्रन्यासे वर्ण-
विशेषयोगमाह — ताएवेति। पञ्चान्यास॰
सूचितः। प्रतिपदादिकः शुक्ल इति न्यासम-
७० न्त्रांशाः सूचिताः। अग्न्यश्वीति, तिथ्यधिपति
७१ न्यासः उक्तः। करणन्यासं सूचयति — राशि-
भ्य इति। करणपञ्चकन्यासे गते तिथिषु-

चतुर्थः पटलः

के राशिमन्त्रेण व्यापकं सूचितम् — सौरेभ्यइति, प्रतिपर्यायं सप्तग्रहयोगः सूचित॰ — न्यासस्थानं च सतिथिभ्यइति तत्तत्तिथ्यवयोगः सूचित॰। न्यासस्थानं च तिथिमण्डलसूचितम्। शक्तिजृंभणसमुत्थादित्यादिना शक्तिसहितानां षष्ठीसंख्यानां वर्णानां योगश्च सूचित॰। ह्रीं सूर्यात्मने सिंहकरणाय शुक्लप्रतिपदपरार्ध्यात्मने नम इति प्रतिपच्चक्रापरार्धे विन्यस्य ह्रीं अं सोमात्मने व्याघ्रकरणाय शुक्लद्वितीयाप्रथमार्धात्मने नम इति द्वितीयाचक्रप्रथमार्धे न्यसेत्। इत्यादिक्रमेण न्यासमन्त्रा ऊह्याः। पक्षिमृगसर्पकीटकरणान्यवशिष्टानि केतुराहुग्रहौ कालसमष्टिमन्त्रं व्यापकं सूचयति। तानीति — ह्रीं रविग्रहः- ७३

नक्षत्रतिथिकरणात्मने पृथिव्यप्तेजोवाय्वाकाशात्मने त्रैनाभिकाय कालचक्राय नम इति मन्त्रः सर्वमन्त्रेषु शक्तियोगं सूचयति- २५। इतीति, व्याप्तिन्यासकथन फलमुपसंहरन्नवसाने हृल्लेखया व्यापकमाह——

सचराचरस्येति, अवयवाध्यकस्यैव न्यस्तविग्रहस्य बीजस्य च मन्त्रस्य मूलकारणात्मत्वं सिद्धेत्यर्थः। कालचक्रयोगं दर्शयन्परममुपसंहरति—— न्यासानन्तरं जपादिकं चानेनैव सूचितम्। त्रिजगति चक्रात्मके जगत्रये ये जन्तवः तेषां जीवभूतां तेषु प्रविश्य जीवात्मतां प्राप्तां परां चिन्मात्रस्वरूपामिति कालचक्रयोगः सूचितः। सकलं हृल्लेखां ज्ञात्वा जपतीति हृद्यम्। अत्रलग्न-

इत्यादिना राश्यानुकूल्यस्य सूचितत्वात्
राशिनक्षत्रनामानुकूल्यं संक्षेपत उच्यते —
यस्मिन् राश्यक्षरसमूहे साधकस्य नामा-
द्यक्षरं दृष्टान्तम्। राशिमारभ्य मन्त्रस्याद्य-
क्षरसंबन्धराश्यन्तं लग्नादिभिर्गणयेत्।
तत्र धन भ्रातृ बन्धु पुत्र कलत्र धर्मायानाम-
न्यतमस्वरूपा ये मन्त्राक्षरयुक्तराशिवर्णास्ते
ग्राह्याः। इति। राश्यानुकूल्यमन्यथाप्युच्य-
ते। प्रथमपञ्चमनवमा बन्धवः। द्वितीयषष्ठ-
दशमाः सेवकाः। तृतीयसप्तमैकादशाः पोष-
काः। द्वादशाष्टमचतुर्था घातकाः। स्वराशि-
मारभ्य गणनं त्रिनवखण्डं मण्डनं कृत्वा तेष्व-
श्विन्याद्यक्षरात्र्यग्रकोष्ठादारभ्य त्रिरिखि-
त्वा ,,

।श्री।

विवरणे

जन्मसंपत् विपत्क्षेमः प्रत्यरं साधको वधः।
मैत्रं परममैत्रं च. जन्मादिषु ~~[illegible]~~ पुनः पुनः॥

इत्युक्तप्रकारेण स्वनामाक्षरादारभ्य मन्त्राक्षरपर्यन्तं गणिते संपत्क्षेमसाधकमैत्रपरममैत्राणामन्यतमं चेत् भवति। तर्हि शोभनम्॥

अथ नामानुकूल्यं षोडशकोष्ठमण्डलमालिख्य ईशानकोष्ठमारभ्य एकान्तरितमकारादिक्षान्तान्यक्षराणि तत्र लिखित्वा नामाद्यक्षरयुक्तं खण्डचतुष्टयमारभ्य सिद्धसाध्यसुसिद्धारित्वेन जानीयात्। सिद्धसिद्धो यथोक्तजपादिना सिध्यति, सिद्धसाध्यो द्विगुणात् सिद्धसुसिद्धोऽर्धेन, सिद्धारिर्बान्धवान् हन्ति। साध्यसिद्धास्यो विद्ध-

चतुर्थः पटलः

नैरृत्यश्च स्त्रीनाशगोत्रनाशान् प्रयच्छति।
सुसिद्धसिद्धोऽर्ध्यजपात् तत्साध्यस्त्रिगुणजपात् तत्सुसिद्धो ग्रहणादेव सिद्धिदः। तदरिस्ताति हनिद॰। अरिसिद्धादयः पुत्रपुत्रीषु पत्न्यात्महानिदाः।
नृसिंहार्कवराहाणां प्रासादप्रणवस्य च।
वैदिके पिण्डमन्त्रे च न सिद्धादिपरीक्षणमावश्यकम्॥

अथ कुलाकुलविभागः॥

मन्त्राणामाद्यक्षरयोरेकभूतसंबन्धित्वे एककुलता पार्थिवानामाप्यानि मन्त्राणि आग्नेयानां मारुतानि मन्त्राणि पार्थिवाप्यानां मारुतानि शत्रवः। आग्नेयानामाप्यानि शत्रवः। आप्यानां तैजसानि

च शान्तव०। नाभस्थानि सर्वो विरुद्धानीति अथर्णस्य धनविभागः साधकनामाक्षराणि मन्त्राक्षराणि च । त्रिभागेन गणितच्छेषाः परित्यक्ते यस्याक्षरमधिकं भवति। सोऽधमर्णः अन्य उत्तमर्णः साधकस्योत्तमर्णत्वे शोभनं शत्रुमरणादि शब्देन मन्त्रदोषाणामपि सूचितत्वात् तच्छुद्धये प्रयोगा० कथ्यते। योनि बन्ध्यपूर्वोक्तबीजादुन्द्वादिक्रमेणोन्मन्यन्तं गत्वा तत्रस्थाय मन्त्रं मन्त्रं सहस्रवारमावर्तयेत्। स शुद्धो निर्दोषो भवति। मातृकापद्मं लिखित्वा स्वष्टमन्त्रं ततउद्धरेत्। इदं जननं प्रणवान्तरितान् मन्त्रवर्णान् जपेत् शतावृत्त्यै तज्जीवनं भूर्जे मन्त्रवर्णानालिख्य वायुबीजेन प्रत्येकं शतं

जातं ताडयेत्। एतत्ताडनं तथैव लिखित्वा मन्त्रार्णसंख्यया करवीरपुष्पैरग्निबीजेन ताडयेत्। एतत् बोधनं स्वतन्त्रोक्तप्रकारेणाश्वत्थपल्लवेनाष्टजातमभिषिञ्चेत्। अयमभिषेकः स्वचित्तेन मनसा मन्त्रान् ज्योतिर्मन्त्रेण मूलत्रयं दहेत्। एतद्विमलीकरणं ओं ह्रौं नम इति ज्योतिर्मन्त्रः स्वल्पेन कुशोदकेन प्रतिवर्णं प्रोक्षणमाप्यायनं नाम्ना स्वेन तर्पणं तर्पणम्। तारमायारमायोगो दीपनं। अन्येषामप्रकाशनं गोपनम्॥ इत्थं दशधा शोधिते छिन्ना रुद्धा इत्यादयो दोषाः नश्यन्ति॥

इति प्रपञ्चसारविवरणे

॥ चतुर्थः पटलः॥

श्रीः

॥ अथ पञ्चमः पटलः ॥

अदीक्षितानामुक्तन्यासादिष्वनधिकारात्तत्सिद्धये साङ्गोपाङ्ग दीक्षाकथनाय पञ्चमषष्ठपटलारंभः.——

अतोऽथशब्दो हेत्वर्थः। विधिवदिति वेदाविरुद्धत्वमुक्तम्। जगतो हितार्थत्वमेव दर्शयति——येनेति। न केवलं दीक्षालाभमात्रेण ऐहिकामुष्मिकपुरुषार्थलाभः। किन्तु तत्पूर्वकमन्त्रसाधनादेवे-
२१ त्याह——साधकेशा इति। दीक्षाशब्दनिर्वचनेन दीक्षायाः सिद्धिदानसामर्थ्यं दर्शयति——दद्यादिति॥ दाञ् दाने। क्षि क्षये। इति धातुद्वयनिष्पन्नत्वात् दीक्षाशब्दस्येत्यर्थः।

पञ्चमः पटलः

दीक्षायामपि मन्त्रयोगः सामर्थ्यात्तुरिति
वदन् मनुशब्दपर्यायं मन्त्रपदं निर्दिशति, म- ४
२ ननादिति, दीक्षाकालं नियमयन्नाचार्यस्य
नियममाह — दैवादिकस्येति। देवशब्दादय
आदौ येषां वत्सराणां ते तथोक्ताः आदिपू-
र्वपक्षमित्यर्थः। देवा ब्रह्माद्याः पञ्चमूर्तयो हृ-
दयादिस्थानगताः। मानुषः साधकः पिता आचा-
र्यः। तेषामादिभूतस्य वत्सरस्य वत्सान् देवा-
दीन् व्याप्य रातीति वत्सरः। दानः तस्यादि-
स्पर्शो व्यापिन्यादिशक्तिं समालभ्य समः शि-
वात्मनः अग्रसंपत्तिपरमपदप्राप्तिस्तत्सा-
ध्यकेन यत्नविशेषेण युक्तः सन्नाचार्यो
दीक्षाविधिमारभेतेत्याचार्यस्य नियम उ-
६ क्तः। उच्यत पञ्चाम्येति चकारेण कोणत्र- v.7.

विवरणे

तुष्के कोष्ठचतुष्कमपरं गुरुगणेशदुर्गाक्षेत्रेशयजनार्थं सूचितम्। ब्रह्माविति, तस्य सरस्वती सा नित्यमुक्तम्। साधकवरेणेति। मध्ये ब्राह्मपीठादिपूजनमुक्तम्। अणिमादिसर्वसिद्ध्यन्ता ब्रह्मोपशक्तयः। ओं सर्वज्ञानक्रियाव्यक्तकमलासनाय योगपीठाय नमइति पीठमन्त्रः। ओं नमो ब्रह्मणइतिमूलमन्त्रः। प्रजापतिरृषिः। पंक्तिश्छन्दः। ब्रह्मा देवता। अक्षैरङ्गानि स्रुक्स्रुवदण्डकमण्डलुधरो ब्रह्मा ध्येयः। कोणेषु स्थितमर्धकोष्ठद्वयं कोणद्वयार्धकोष्ठं तेष्वित्यर्थः। मन्त्रेणेति। ब्रह्मणः पार्श्वयोः विष्णुरुद्रयोः स्वं स्वं मन्त्रेण पूजनमुक्तम्——विधिनेति—— v.7.

२५, पीठादिपूजापूर्वकमित्यर्थः। ,इतीरितानामपी-

पञ्चमः पटलः

त्र्यधिश० इ० होमः क्षीरादिसूचनार्थः। क्षिपेदिति मुष्टिमात्रैः दर्भाग्रैः सकूर्चैः पद्मान्यास्तीर्य तां तां देवतामावाह्य जलादिभिः संपूज्य प्रणवशक्तिपूर्वैर्नमोन्तैः नामभिः बलिर्देय इत्यर्थः। द्रव्यैकेन वा। तन्त्रेति, दध्याज्यगुडमिश्रमन्नं ब्राह्मणः पायसकृसरमाषान्नमुद्गान्नगुडान्नघृतान्नदध्यन्नैरेकैकस्य वर्गस्य बलिरित्यर्थः। होमादिकमुक्त्वा पुण्याहं वाचयित्वा शुभनक्षत्रादियुते काले मण्टपं विधातव्यम्। एककलशपक्षे पञ्चहस्तमण्टपं नवकलशपक्षे सप्तहस्तम्। अष्टोत्तरशतपक्षे नवहस्तम्। सहस्रपक्षे सप्तपञ्चकमितम्। पञ्चत्रिंशद्धस्तमानमित्यर्थः। सच षोडशस्तंभयुतमध्ये चत्वारः प्रान्तेऽवशिष्टाः। म-

ध्वजा अष्टहस्तप्रमाणाः। अन्ये पञ्चहस्तप्रमाणाः तेषां पञ्चमोंऽशो भूमौ खातव्यः। तोरणस्तम्भाः सप्तहस्ताः तदर्द्धाः फलकाः। शूलानि हस्तमानानि ध्वजाष्टकं लोकपालप्रभं मध्ये रत्निमात्रोन्नतं मण्डलार्थं स्थानं कल्पयेत्।

दिवं दीक्षान्वेसाप्यथावीविति, पुण्याहादिपुरस्कारमित्यर्थः। २८ अन्यस्मिन् भवने दीक्षामण्डपोत्तरभागस्थ इत्यर्थः। पदचतुष्केति। पञ्चहस्तप्रमाणानि द्वादशान्तराङ्गुलान्तराणि पूर्वापरायतानि पञ्चसूत्राणि निपात्य दक्षिणोत्तरसूत्राण्येकादशापि दत्त्वा पङ्क्त्या सर्वतो वीथ्यो विध्यातव्याः। ततश्चोद्धरजसा पूर्वं वीथ्याः श्यामेन पूरणीयाः इत्यर्थः॥ २९

२२

मह

अपि चतुर्विंशोङ्गुलोच्छ्रायता इति तदपि-

पञ्चमः पटलः

मुखविस्तारः सूचितः। मुखार्ध्वौर्ध्वो विस्तारश्च। घटिकास्त्विति। षडङ्गुलमुखपरिमाणत्वं तावत् परिमाणपृष्ठत्वं चोक्तम्। द्विषडङ्गुला अपीति। द्वादशाङ्गुलमुखत्वं तदर्ध्वार्ध्वोभागत्वं चोक्तं पङ्क्तिषु चेति पङ्क्तिमादि विन्यसेदित्यर्थः। प्रोक्तक्रमो वह्न्यादिशावा-
22^ न्तिकः बाधकवदिति प्रक्षाळनायामृतवीपं सूचितम्। दुन्दुभ्यादयस्तालादयो वीणादयो मुखवाद्यादयः शंखादयश्च पञ्चा-
महाशब्दैः शब्दां विश्विवत् प्रतिपाद्यमानेति। उचिततात्ळशब्द विशेषणेत्यर्थ°। तदूर्ध्वे स्याध्येकेशाइति। प्रागादिदानं * सूचितम्। प्रागेवेति २९^
मण्डलनिर्माणादित्यर्थ°। ताभिश्च प्रखन- ३२^
विति। मेखलो चत्रयेण स्यार्ध्येमिति द्रष्टव्यम्।

विवरणे

तावतीभिः मेखलाश्च कार्या इति । मेखलाविस्तारः समुन्नीत्योक्तः । तत्राद्यो मेखलाविस्तारो द्वादशाङ्गुलः । मध्यमेखलायाश्चाष्टाङ्गुलः ऊर्ध्वमेखलायाश्चतुरङ्गुल इति, मिलित्वा चतुर्विंशाङ्गुलविस्तारत्वं विवक्षि-
३३१ तम् । उच्छ्रयश्चैवमेव द्रष्टव्यः । चतुरस्रस्थलेति पृथिवीस्थानारन्ध्रनालेत्यर्थः । तन्मध्योल्लासिरन्ध्र इति, तस्य नालस्य मध्यमेखलाया वा मध्ये विलसितरन्ध्रेत्यर्थः । उत्सेधायामकाभ्यामिति, उत्सेधेन आयामेन च प्रकृतिविकृतिसंज्ञाङ्गुलाष्टाङ्गुला च प्रत्येकं पञ्चदशाङ्गुलेत्यर्थः । द्वादशार्धाङ्गुलेति । उपक्रमे द्व्यङ्गुला । ततो दशाङ्गुला । मध्ये पञ्चाङ्गुला । अवसानेऽङ्गु-

लविस्तृतेत्यर्थः। शतार्धे होमे मुष्टिमितानि कुण्डलानि शतहोमे रत्निमितानि सहस्रहोमे पञ्चाङ्गुलाधिकारत्निमितानि। अयुतहोमे दशाङ्गुलाधिकारत्निमितानि अर्धलक्षहोमे पञ्चदशाङ्गुलाधिकारत्निमितानि। लक्षहोमे विंशत्यङ्गुलाधिकारत्निमितानि, पञ्चाशल्लक्षहोमे कोटिहोमे चारत्न्यष्टकमितानि ~~न~~ सर्वेष्वपि कुण्डेषु प्रथममेखलोच्छ्रयेण तुल्यं स्यात्कण्ठोच्छ्रयवै हस्तमात्रे अरत्निमात्रे षड्भिर्मुष्टिमात्रे चतुर्भिरन्येष्वङ्गुलिद्वयवृद्ध्या कण्ठः कर्तव्यः। मुष्टिमिते प्रथमा मेखला दशाङ्गुला द्वितीयतृतीयेति त्र्यंशे अरत्निमिते प्रथमा द्वादशाङ्गुला द्वितीयतृतीये त्र्यंशे। हस्तमानेऽपि

प्रथमा मेखला द्वादशांगुला। अन्ये पूर्ववत्। अ-
न्येषां कुण्डानामङ्गुलि द्वयवृद्धितः प्रथमा
मेखला। अन्ये कोशे कार्ये सर्वत्र कण्ठमानेना-
३५।^ न्तः प्रविष्टा योनिः कार्या। ^ यथान्यायमिति।
ईशानकोणावस्थानत्वमभ्युक्षणादिकं च सूचि-
३६^ तम्। ^ गुणितेनेति। सूत्रद्विगुणितं कृत्वा तेन गु-
णितेन सूत्रेण प्राक् प्रसृतसूत्रस्यान्तौ मध्या
द्विगुणितस्याप्युभयतो मध्याद्वार उभ-
४८^ यतो मध्ये न विन्यसेदित्यर्थः। ^ मण्डलम-
ध्यार्धे इति। मण्डलस्य मध्यं मण्डलमध्यं। राशि-
५१^ मण्डलान्तं तस्याप्यर्धे मध्ये इत्यर्थः। ^ षड्भिः
नवभिरेव वेति। वृत्तराशिपक्षे षड्भिः त्र्यस्र-
राशिपक्षे नवभिरित्यर्थः। द्वात्रिंशदङ्गुल-
६८^ मिति। त्रिंशाद्व्याङ्गुलं षष्ट्यङ्गुलमित्यर्थः।^

राशिचक्राविशिष्टानीति वृत्तराशिपक्षे द्रष्ट०व्यम्। अथ वारुणनीति वैष्णवादौ विशेषोऽभिहितः॥

इति प्रपञ्चसारविवरणे
॥पञ्चमः पटलः॥

॥अथ षष्ठः पटलः॥

अथ पुनरिति. एवं साधनसंपत्त्यानन्तर्यम शब्दार्थः। पुनराचम्येति. नित्याचमन०व्यतिरेकेण पुनराचमनाभिधानात् स्नानपूजादिकमपि नित्यानन्तरं पृथक् कर्त०व्यमिति सूचितम्। अतस्तदुच्यते। ब्राह्मे मुहूर्ते उत्थाय देवतां ध्यात्वा कर्मसमर्पणं विध्या-

य हंसपूजां संकल्प्य स्वसूत्रोक्तः स्नानान्तः सकलीकृत्यास्त्रेण मृदं खनित्वा हृदयेनादाय शिरसा जलतीरेऽस्त्रशोधिते कृत्वा शिखया शर्करादिकमुद्धृत्यास्त्रेण संप्रोक्ष्य नेत्रेण संवीक्ष्य कवचेन त्रिधा विभज्य मूलेनाभिमन्त्र्य भागेनास्त्रमन्त्रेणाङ्गानि प्रक्षाल्य भागान्तरमापादमस्तकमालिप्य तीर्थमवगाह्य निमज्यास्त्रमन्त्रं शतधावर्त्योन्मज्याचम्यापरं मृद्भागं त्रिधा विभज्यास्त्राङ्गमूलैरेकैकमभिमन्त्र्य अस्त्रजप्तदिक्षु रक्षार्थं निक्षिप्याङ्गजप्तेनात्मानमालभ्यापरं हृन्मन्त्रानीते तीर्थे मूलेन विलोड्य निमज्य मूलं शक्तितोऽनुसन्धाय साङ्गेन मूलेनाभिषिच्य तीरमागत्याचम्य अस्त्र-

षष्ठः पटलः

प्रोक्षितं वासः परिधायाचम्य सकलीकृत्य पूजाचक्रेण सन्तर्प्य द्वारस्थं सूर्यमुपस्थाय यागमण्डपं गत्वा देवमन्त्रैराचम्याथवाङ्गाग्निभिः संमृज्य चक्षुरादिकं तत्तद्देवतामन्त्रैरुपस्पृशेत्। पुनः सवित्रेऽर्घ्यं दत्वा सामान्यार्घ्येण द्वारपूजां कुर्यात्। अस्त्राम्भसोदकेन द्वारं संप्रोक्ष्य गं गणपतये श्रीं लक्ष्म्यै· सं सरस्वत्यै· नम इत्यूर्ध्वे भागेन संपूज्य· गं गणपतये· क्षं क्षेत्रपालाय· गं गंगायै· यं यमुनायै नम इति दक्षसव्यभागयोः ततो देहल्या मन्त्रं संपूज्यास्त्रदृष्ट्यस्त्रा[illegible]वस्त्र· पार्ष्णिघातैर्दिव्यादिव्यविघ्नानुत्सार्य वामाशाखाश्रयेण देहलीं लंघयित्वा निरृतिकोणे वास्तीशं ब्रह्माणं च संपूज्य पञ्च-

गन्धार्घ्यतोयाभ्यामस्त्रेण मण्डलमभ्युक्ष्य मूलमन्त्रेण संवीक्ष्यास्त्रेण संप्रोक्ष्य तेनैव दर्भैः सन्ताड्य वर्मणाभ्युक्ष्य तेनैव चन्दनागरुकर्पूरैः सन्धूप्य लाजचन्दनसिद्धार्थभस्मदूर्वाकुशाक्षतानस्त्रेण सम्प्रजप्य प्रान्मण्डपे विकीर्यास्त्रजप्तदर्भमुष्टिना तान् संमार्ज्य ईशानकोणे वर्धन्यासनत्वेन तानि संकल्पयेत्। पुण्याहं वाचयित्वात्र ब्राह्मणान् भोजयित्वा तत्र मण्डलमुक्तलक्षणं कर्तव्यमित्येतत् सर्वमुक्तम्—गुरुरिति। पुनरस्त्रप्रोक्षिते शुद्धे विष्टरे लिपिमध्य प्रणवबिन्दौ प्राङ्मुख उदङ्मुखो वा बद्धासनउपविशेदित्याह—प्राग्वदनं इत्यादिना—विष्टरोपविष्ट इत्यनेनैव गुर्वादिवन्दनस्या-

षष्ठः पटलः

ङ्गुलिकरशोधनस्यापरिच्छिन्नताया जीवरक्षायाश्च सूचितत्वात् तदुच्यते — विस्तरे परमात्मनि समष्ट्यात्मनि अन्तर्गतेष्वपि गुर्वादिषु च मनसोपवेशो हि विष्टरोपवेशः। ओं ह्रीं परमात्माद्यशेषपारंपर्यक्रमेण स्वगुरुपादाम्बुजं यावत्तावत् प्रणौमीति शिरसि गुरुपरंपरां नत्वा गुं अस्मद्गुरुभ्यो नमः। गं गणपतये नमः। दुं दुर्गायै नमः। सां सरस्वत्यै नमः। क्षां क्षेत्रपालाय नमः। पं परमात्मने नमः। इत्यादि स्वाविश्रहृत्सु नत्वास्त्रेण अङ्गुलिकरशोधन तालत्रयादिग्बन्धनाग्निप्राकारवेष्टनानि विधिवत् विधायाकारादिमन्त्रैः पादादिमस्तकान्तं व्यापकं कुर्वन् अपरिच्छिन्नतनुर्भूत्वा जीवरक्षां

कुर्य्यात्। लृं व्रं रृं य्रं हृं इति पादगुह्यहृन्मुखमस्तकेषु न्यस्यन् भूतपारवश्यं छित्वा ह्रीं स्त्रं ओं इति पादादिमस्तकान्तं कुर्वन् कारणबन्धत्यागं चिद्रूपत्वोद्भावनं ब्रह्मलक्षणलक्षितत्वं च स्मृत्वा हंसः सोऽहमिति ~~स~~ मूलादिमस्तकान्तं मस्तकादिमूलान्तं च व्यापयन् ब्रह्मात्मनोरैक्यं भावयेदिति जीवरक्षाप्रकारः॥

अथ प्राणायामः कर्त्तव्य इत्याह—

प्राणायामं सलिपिन्यासमिति प्रथमं तावत् परिच्छिन्नं वायुं दक्षिणनासापुटेन विरेच्य वामनासापुटे नाभौ च सूर्यमण्डलस्थं वायुमण्डलं सबीजं धूम्रवर्णं सञ्चिन्त्य सूर्यमण्डले स्पर्शवर्णान् विन्यस्य पूरक-

काले तयोर्नोभावे वायुं सञ्चिन्त्य कुंभककाले शोषयित्वा दक्षिणनासया विरेच्य तस्यामेव स्ववायुमण्डलमग्निमण्डलं सञ्चिन्त्याग्निमण्डले व्यापकाक्षराणि विन्यस्य हृदयस्थेनाग्निमण्डलेन पूरयन्नेकीकृत्य कुंभककाले सन्दह्य वामनासिकया विरेच्य तस्याममृतमण्डलं सञ्चिन्त्य तत्र स्वरान्विन्यस्य तन्मूर्धस्थेनामृतमण्डलेनैकीकृत्य प्लावनं कुर्यादिति प्राणायामप्रकारः। अथवा यावद्दशकं सप्तधातुप्राणशक्त्यात्मसु न्यस्तंस्तान् पञ्चीकृतभूतेषु संहरेत्॥

अत्र प्राणशब्देनेन्द्रियादि प्रवृत्तिकारणमक्षमुच्यते — शक्तिशब्देन ज्ञानवृ-

बिन्दुकारमन्त्रम्। आत्मशब्देन जीवविद्येति कारणमन्त्रमिति विभागः। यादिन्यासेन तान् सन्निन्य क्षौमिति उत्कृष्य पञ्चीकृतबीजानि मूर्धादिषु न्यसंस्तांस्तेषु संयोज्य ह्रीमिति आप्याय्य पञ्चीकृत्य पृथिव्यादिसंहाराय प्राणायामपञ्चकं विधाय समानयनं ध्याने करणकाश्रोत्रपञ्चकेषु मनणञङादिपञ्चकान् न्यसंस्तान् सन्निन्य क्ष्रौमिति उत्कृष्य पञ्चीकृतबीजानि मूर्धादिषु न्यसंस्तेषु संयोज्य ह्रीमित्याप्याय्य पञ्चीकृतभूतलयार्थं प्राणायामपञ्चकं विधायाकारादिविसर्गान्तं नाभ्यादिगतब्रह्मब्रह्मादिषु न्यसित्वा क्षौमिति तानुत्कृष्य ह्रीमित्याप्यायनं कुर्वन् कारणे

षष्ठः पटलः

संयोज्य सतरलवर्त्तम° लकाम्य बीजतद्धारस्य
ना° संहरन् प्राणायामत्रयं कृत्वा कल्पिता-
त्मं स्वात्मन्यवस्थाप्य निरवद्यादिमन्त्रैः व्यापय-
न् सर्वं स्पृष्ट्वा मातृकान्यासं विधाय वक्ष्यमाण-
क्रमेण पीठन्यासं कृत्वा तत्तन्मूर्तिमन्त्रेण मूर्ति
सं कल्प्यावाहनं स्थापनासन प्रतिष्ठासन्निध्यान-
सन्निरोधस्थैर्य स्वागत सुस्वागताभिमुख्यावकु-
ण्ठनानि विधाय करन्यासाङ्गुलिन्यासव्या-
पकवर्णन्यासादिना न्यासान्विधायर्ष्यादि-
कं न्यसेदित्यभिप्राय°। ऋषु गतौ, षिड् प्राप- २१२
णे, इति धातौ ऋषिवर्णादिकौ धातू गत्याप्रा-
पणेन चार्थेन युक्तौ आभ्यां निष्पन्नऋषिश-
ब्द° अथावयवार्थमभिधाय समुदायार्थमा-
ह — यत्स्वरूपं याति। स गुरुः स्यादृषिर्वा

चक्र इति यस्य परमात्मनः स्वरूपं याति। शिष्यो
गुरुश्च सः परमात्मैव गुरुरूपेण स्थितस्तदृषिवा-
चकः ऋषिशब्दो वाचको यस्यास्तयोक्त इति
3 देवतागुर्वात्मनामैक्यमुक्तम्। ~~छ~~दु इच्छायां दा-
णदाने इतीच्छाद्यर्थौ धातू तयोरूपं छन्दःशब्दः।
4 समुदायार्थमाह — इच्छामीति। दिवु क्रीडा-
विजिगीषा व्यवहार द्युति स्तुति कान्ति गति षु
हनुकरणे, इति धातुद्वयनिष्पन्नो देवता-
5 शब्दः। हृदयमिति परमात्मोच्यते —
कथं हृत्स्थबुद्धिगम्यत्वादिति योज्यम्। समु-
दायार्थमाह — क्रियत इति। हृदयमन्त्रेणा-
न्वयव्यतिरेकैरनात्मनो विविच्यात्मप्रतिप-
2 त्तिः क्रियत इत्यर्थः। तुङ्गार्थमुक्त्वाह परमात्मा-
र्थं स्यात्। शिरः शिरश्शब्दस्तस्मै सर्ववि-

षष्ठ: पटल:

व्याहरणे स्वाहाशब्दो वर्तते, समुदायार्थमाह — शिरइति. उत्तुङ्गे परमात्मनि विषयस्य हृन्मन्त्रेण चित्तस्याहृतिविलापनमुक्तं शिरोमन्त्रेणेत्यर्थः। एवमपवादं कृत्वाध्यारोपाय ८,
शिखामन्त्र इत्याह — शिखेति. तेषामिच्छात्मकं शिखेत्युपदिष्टं अङ्गं कार्यकरणात्मकं शरीरं वषडित्युच्यते — समुदायार्थमाह — तदिति, अस्य मन्त्रिणः स्वरूपभूतं तेषस्तनुः प्रोक्तं, तनोस्तत्राध्यस्तत्वादित्यर्थः। आत्मन्यनात्मा- ९,
ध्यासमभिध्याय आत्मनोऽनात्मन्यध्यासमाह कवचेन. कवग्रहण इति चेतसा चैतन्येन देहः. पूर्वोक्तो गृह्यते व्याप्यते, यतस्तन॰ कवचमित्युच्यत इत्यर्थः। अथाध्यासनिव- १०,
र्तकं ज्ञानमाह — नेत्रमन्त्रेण. नेत्रमिति, दृष्टिः

विवरणे

द्रष्टुः द्रष्टुः परमात्मा दर्शनं तदाकारं ज्ञानं, समुदायार्थमाह — दर्शनमिति। द्रष्टृरूपे परमा-
११ त्मनीत्यर्थः। उत्पन्नज्ञानस्य संसारनिवृत्तिमाह — अस्त्रेण, असुत्रासादी, असुक्षोपणे त्रासचलन इति व्यातूस्तः। मन्त्रिभिरिति सर्वज्ञादिपदयोगः सूचितः। तैश्च ज्ञानानन्त्यादिमात्रं लक्ष्यं निष्कलनिष्ठस्य, सकलनिष्ठस्य तु सर्वज्ञत्वादिशक्त्यात्मकत्वं तैरुच्यते। हृदयादिशब्दैरपि परिच्छिन्नापरिच्छिन्नसर्वज्ञत्वादिशक्तैक्यमुच्यते, सकलनिष्ठस्य तदैक्यमेवोच्यत इति विभागः। मन्त्रिण इति नेत्रमन्त्रलोपेऽपि न मन्त्रित्वहानिरित्यर्थः। सुधीरिति। करन्यासे तु कनिष्ठादिक्रमत्वं नमस्कारान्तत्वमङ्गुलीनामसंयोजनन्यासक्रमं च

सूचितवान् । विष्णो दशक्रमादिति च क्रमोऽन्य
22-24 इति सूचितम्॰। बाह्यपूजार्थं शंखपूरणक्रममा-
ह —— शंखमिति॥ न्यासानन्तरं ध्यात्वाऽर्घ्या-
दिभिरुपचारैः॰ मनसा संपूज्य क्षिति स्थापिता
वामहस्तासाग्रतोऽर्घ्यमण्डलं सामान्यार्घ्यज-
लेन निर्मायास्त्रेणार्घ्यपात्राधारं प्रक्षाल्य
रमित्यर्घ्यमण्डले प्रतिष्ठाप्य तत्र व्यापककला
न्यसित्वाग्निमण्डलमन्त्रेणाभिमन्त्र्यार्घ्यपा-
त्रमस्त्रेण प्रक्षाल्य छमिति सूर्यमण्डलं
बुद्ध्याधारे संस्थाप्य तत्र स्पर्शकला न्य-
सित्वा सूर्यमण्डलमन्त्रेणाभिमृश्य मूलेन
गन्धाक्षतादिकं निक्षिप्य समूलेन हृन्म-
न्त्रेण सामान्यार्घ्यजलैरापूर्य गामिति गा-
लिनीं प्रदर्श्य ॐ अमृतीभव निर्विषी भव

क्लौं सुं इति अमृतीकरणनिर्विषीकरणगरुडसुरभिमुद्राः प्रदर्श्य,

गंगे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ।

इति तीर्थमावाह्य तत्र स्वरकला न्यस्त्वा सोममण्डलमन्त्रेणाभिमृश्य हृदयेन गन्धादिकं निक्षिप्य शिरसा धेनुमुद्रां बध्वा शिखयालोडिन्यालोड्य नेत्रेणावलोक्य कवचेनावकुण्ठ्यास्त्रेण सतालत्रयं दिशो बध्वा आधारादिकमग्न्यादिमण्डलमन्त्रैः जलादिभिरभ्यर्च्य पीठमन्त्रेण पुष्पाञ्जलिं कृत्वा जलमध्ये देवमावाह्य सकलीकृत्य जलादिभिः संपूज्याङ्गमन्त्रैरपि जलादिभिरर्चयित्वा भगवन्तं मूलेन व्यापय्य-

षष्ठः पटलः

निष्कलीकृत्यानन्दरूपेणार्घ्यजलमात्मनोऽवस्थितं भावयित्वा समूलेन दक्षिणकरतलेन पात्रमुखमाच्छादयेत्। अष्टवारं मूलं जपित्वा तदर्घ्यं करकोदके प्रक्षिप्य ततः किञ्चिदादाय समूलेन वामतलेन पिधित्वाष्टवारं जपित्वान्ते पूजोपकरणमात्मानं च त्रिधाम प्रोक्षयित्वा सर्वं सदानन्दरूपं भावयेदित्युक्तम्। गुरूपदेशेनेति। गन्धाक्षतादिकं मन्त्रीति मूलहृद्भ्यां तेषामभिमर्शो नमुक्तम्। १२।२८ निजसव्यतो यथा वदिति — प्रथमन्यासस्थानेषु जलादिभिरात्मपूजां कृत्वात्मानमलंकृत्य स्वासनमूर्तिपूजापूर्वकं गुरुगणेशावर्चयेदित्यर्थः। देवमध्यानीति गुरुध्यानमुक्तम्। गुं परमगुरुभ्यो नमः। गुं परापरगुरुभ्यो

नमः। गुं अपरगुरुभ्यो नमः। गुं अस्मद्गुरुभ्यो नमः। इति मन्त्रा माद्या गुर्वादिपदसूचिताः। तत आधारशक्तिमूलप्रकृत्यनन्तपृथिवीकल्पकवृक्षारत्नमण्टपमन्त्रैः मध्ये संपूज्य धर्मादिकमुक्तस्थानेषु पूजयेत्। मध्ये संपूज्येति शब्दः। पीठसमष्टिमन्त्रा पुष्पाञ्-जलिसूत्रनार्थः। शक्तिविन्यसनादिकं पीठपूजायाः पूर्वमेव सहकषादिकान्तैरिति त्रिशः प्रतिलोमपठितेन मन्त्रेण सहेत्यर्थः। संयतधीः शुभोदकैर्वेति विनाप्यौषधैस्तज्जन्यसामर्थ्यापादनक्षम इत्यर्थः। विलोड्य सम्यग्विधिनेति। समूलेन हृदयेनापूर्य हृदयेनाष्टगन्धं निक्षिप्य शिरसा धेनुमुद्रां प्रदर्श्येत्यादिकं सूचितम्। मन्त्रिणा कृतेऽनन्ते-

ति गन्धद्वारामिति मन्त्रस्य जपः सूचितः। ~~कलाः~~ कलाः
समावाह्येत्येतत् विवृणोति। अष्टत्रिंशदिति।
गुरूपदेशक्रमशा इति आग्नेयसौरसौम्य
क्रमेणेत्यर्थः। विद्वानिति। मण्डलमन्त्राणां जा-
तवेदसे तत्सवितृ त्र्यम्बकइत्यृचां च क्रमेण
संयोगं जानन्नित्यर्थः। तारपञ्चभेदसमुत्थिता ३२।
इत्यकारादिकलान्यासानन्तरं अं ब्रह्मणे
नमः। उं विष्णवे नमः। मं रुद्राय नमः। ओं बिन्द्वा-
त्मने ईश्वराय नमः। ओं नादात्मने सदाशिवाय
नम इति मन्त्राणामावाहनं सूचितम्। पञ्च-
पञ्चकसम्भिन्ना इति लं पृथिव्यात्मने गन्ध-
तन्मात्रात्मने घ्राणात्मने उपस्थानन्दात्मने
निवृत्त्यात्मने नमः। तथा वं अबात्मने रस-
तन्मात्रात्मने रसनात्मने वायुविसर्गात्मने प्रति-

ष्ठात्मने । तथा रं अग्न्यात्मने रूपतन्मात्रात्मने चक्षुरात्मने पादगमनात्मने विद्यात्मने नमः। तथा यं वाय्वात्मने स्पर्शतन्मात्रात्मने स्पर्शनात्मने पाण्यादानात्मने शान्त्यात्मने नमः। तथा हं आकाशात्मने नमः। शब्दतन्मात्रात्मने श्रोत्रात्मने वाग्वचनात्मने शान्त्यतीतात्मने नमइति पञ्चपञ्चकावाहनमुक्तम्। शक्तिशान्तिकलावाहनं सूचयति — समात्मकस्येति। नादकलान्यासानन्तरमिच्छाशक्त्यै नमः। क्रियाशक्त्यै नमः। ज्ञानशक्त्यै नमः। इति शक्तिकला आवाह्य चिदात्मने नमः। आनन्दात्मने नमः। इति शान्तिकलावाहनं. एवं चतुर्नवतिकलावाहनमपि सिद्धं भवति। विनापि मन्त्रैरिति अर्थः। न पठ्येते परैः सेहति,

तत्र पञ्चकादिसंभेदो नास्तीत्यर्थः। ओं शक्त्यात्मने शान्तात्मने नमइति नु योज्यम्। चतुर्नवतीति षिन्नवतिकलावाहनानन्तरं मूलमन्त्रमपि सकृज्जप्त्वा पूरयेदित्यर्थः। कलाप्रभेदेन मिथइति पञ्चककलावाहनानन्तरं युज्यन्तइत्यर्थः। क्रमादिति — हंसइति. अकारकलादिषु प्रतादिषुरिति उकारकलादिष्वित्यादिक्रमेण योगइत्यर्थः। 33-30 प्रोक्तो पूर्वमिति। अपूर्वं प्रोक्ता औं ह्रीं क्रों यं रं लं वं शं षं सं हों क्षं सं हंसः ह्रीं होमिति प्रोक्तेत्यर्थः। अमुष्येति साध्यनामग्रहणमुक्तम्। तद्वज्जीवइति। पूर्ववदापूर्वमेवेत्यर्थः। चशब्दो जीवपदात्पूर्वं तत्तत्पदद्योतनार्थः। तथा सर्वेन्द्रियाणीत्यपि तथा तद्वदित्यपि

तथा वाङ्मनसग्रहणं चक्षुश्रोत्रघ्राणानामुपलक्षणार्थः। निशितधीरिति। पाशेन देवताः सर्वेगा व्याप्य ह्रींकारेणोपस्थाय क्रोमित्याभिमुख्यं संभाव्य यामिभिर्देवतां सकलां स्वात्मन्याविशिष्टेन तदनुज्ञया सान्निध्यमापादयेदित्यर्थः। सुधा वल्लरी कल्पलतारूपा ध्येया। तण्डुलानि फलपुष्परूपाणि वासः छायारूपं सकलीकृत्येति आवाहनादिन्यासान्तं कृत्वा विघ्नपूजां च कृत्वानुज्ञामादाय उपचारान् कल्पयेदित्यर्थः। गुरुरिति शंखपूरणवदर्घ्यादिक्रमो द्रव्यदेवतासंबन्धश्चैकात्म्यलक्षणः सूचितः। मन्त्री नीचैरिति धूपे मन्त्रविशेषं सूचयन् गन्धादिष्वपि सूचयति। ओं ऐं ह्रीं

ओं नमः पराय गन्धतन्मात्रप्रकृत्यानन्दात्मकं गन्धं कल्पयामि नम इत्यादयो मन्त्राः । देवस्य गन्धादिदाने । आवरणानां तु तत्तन्नाममन्त्रैरेव देयम् । अथवा आगमोक्तैः श्लोकैरेवावाहनादयः कर्तव्या इति सूचितो "मन्त्रीनीचै"रिति स्वात्मसंस्थमजं शुद्धं त्वामद्य परमेश्वर। अरण्यामिव हव्याशं मूर्तौ वाऽवाहयामि अहं नमः।

तवेयं महिमा मूर्तिस्तस्यां त्वां सर्वगं प्रभो ।
भक्तिस्नेहसमाकृष्टं दीपवत्स्थापयाम्यहं नमः।
सर्वान्तर्यामिणे देव सर्वबीजमयं शुभम्।
स्वात्मस्थाय परं शुद्धमासनं कल्पयाम्यहं नमः।
अस्मिन् वरासने देव सुखमास्वाक्षरात्मके।
प्रतिष्ठितो भवास्मिंस्त्वं प्रसीद परमेश्वर। नमः।

विवरणे

अनन्या तव देवेश मूर्तिः शक्तिरियं प्रभो ।
सान्निध्यं कुरु तस्यां त्वं भक्तानुग्रहतत्पर । नमः ।
आज्ञया तव देवेश कृपां रोध्ये गुणाम्बुधे ।
स्वात्मानन्दैकतृप्तं त्वां निरुणद्धि पितृगुरो । नमः ।
दृष्ट्या पीयूषवर्षिण्या पूरयन्यज्ञविप्लवः ।
मूर्तौ वा यज्ञसंपूर्तेः स्थिरो भव महेश्वर । नमः ।
यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये ।
तस्य ते परमेशाय स्वागतं स्वागतं च मे । नमः
कृतार्थोऽस्म्यनुगृहीतोऽस्मि सफलं जीवितं मम ।
यदागतोऽसि देवेश सुस्वागतमिदं पुनः ॥ नमः
अज्ञानाद्वा प्रमादाद्वा वैकल्यात्साधनस्य वा ।
यदपूर्णं भवेत्कृत्यं तदाप्यभिमुखो भव । नमः
अभक्तवाङ्मनश्चक्षुःश्रोत्रदूरामितद्युते ।
त्वत्तेजः पञ्जरेणेश वेष्टितो भव सर्वतः । नमः ।

षष्ठः पटलः

तापत्रयहरं दिव्यं परमानन्दलक्षणम् ।
तापत्रयविनिर्मुक्त तवार्घ्यं कल्पयाम्यहम् ।
यद्भक्तिलेशसंपर्कात् परमानन्दसंभवः ।
तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये । नमः ।
वेदानामपि वेद्याय देवता देवतात्मने ।
आचामं कल्पयामीश शुद्धानां शुद्धिहेतवे । नमः ।
सर्वकालुष्यहीनाय परिपूर्णसुखात्मकम् ।
मधुपर्कमिदं देव कल्पयामि प्रसीद मे ॥ नमः

वेदानामपि वेद्येत्यादि देव पुनराचमनमन्त्रः ॥

परमानन्दबोधाब्धिनिमग्ननिजमूर्तये ।
साङ्गोपाङ्गमिदं स्नानं कल्पयामीश ते पुनः । नमः ॥

अथमत्र स्नानक्रमः ॥

उत्तरभागे स्नानशालां निर्माय याने -

सन सोपचारं देवं तत्र नीत्वा यानादवरोप्य पादुकाभ्यामन्तः नीत्वा पीठं समर्प्यार्घ्यादिकं दत्वा केशप्रसाधनाङ्गमर्द्दनाभ्यङ्गामलकपूर्णकं कुमानुल्लेपकषायोदकस्नानपञ्चगव्यपञ्चामृतस्नानगन्धानुल्लेपनगन्धोदकस्नानाष्टगन्धानुल्लेपाष्टगन्धोदकस्नानदिव्यगन्धानुल्लेपदिव्यगन्धोदकस्नानपुष्पाविल स्वर्णरत्नमन्त्रोदकस्नानान्यर्घ्यादिपूर्वकं प्रयच्छेदिति ॥

मायाछिद्रपटाच्छिन्न निजगुह्योरुतेजसे ।
निरावरणविज्ञानवस्त्रं ते कल्पयाम्यहम् ॥ नमः ।
यमाश्रित्य महामाया जगत्संमोहनी सदा ।
तस्मै ते परमेशाय कल्पयाम्युत्तरीयकम् । नमः ।
यस्य शक्तित्रयेणेदं संप्रोक्तमखिलं जगत् ।

षष्ठः पटलः

यज्ञसूत्राय तस्मै ते यज्ञसूत्रं प्रकल्पये। नमः।
स्वभावसुन्दराङ्गाय नानाशक्त्याश्रयाय ते।
भूषणानि विचित्राणि कल्पयाम्यमरार्चित॥ नमः।
इति भूषणन्यासानन्तरं,
समस्तदेवदेवेश सर्वतृप्तिकरं परम्।
अखण्डानन्दसंपूर्णं गृहाण जलमुत्तमम्। नमः।
परमानन्दसौरभ्य पूरापूर्णदिगन्तरम्।
गृहाण परमं गन्धं कृपया परमेश्वर।
तुरीयवनसंभूतं नानागुणमनोहरम्।
आनन्दसौरभं पुष्पं गृह्यतामिदमुत्तमम्। नमः।
वनस्पतिरसोपेतो गन्धाढ्यो गन्धउत्तमः।
आघ्रेयः सर्वदेवानां धूपोऽयं परिगृह्यताम्।
सुप्रकाशो महादीपः सर्वतस्तिमिरापहः।
सबाह्याभ्यन्तरज्योतिः दीपोयं परिगृह्यताम्। नमः।
५४-५६

विवरणे

पुनः पुष्पाञ्जलिं विधाय प्रसरपुष्पाञ्जलिमेकादशवर्णादिमन्त्रैः कुर्यादि व्याहृ— वर्णैर्मनुप्रपुटितैरिति। क्रमश इति परादिक्रमः सूचितः। सकलास्विति परादिकलायोगः। मन्त्रा इति एकाक्षरादिमन्त्रयोगः प्रथमतरस्यावरणपूजायाः पूर्वमित्यर्थः। अयमत्र प्रयोगः। ओं नमः। अहं नमः। विश्वयोन्यै नमः। इति परा पुष्पाञ्जलिः। महासत्तायै नमः। महाचित्तै नमः। महानन्दायै नमः। महैश्वर्यै नमः। अं नमः। वामायै ज्येष्ठायै रौद्र्यै अम्बिकायै नम इति मूर्ध्ववामदक्षिणभागमूलाधारेषु पूजयेत्। हं नमः। इच्छायै नमः। क्रियायै ज्ञानायै शान्तायै नमइत्यपि। तथेति पश्यन्ती पुष्पाञ्जलिः। शून्यासने स्पर्शासनेनादासने ध्वन्यासने बिन्द्वासने शान्त्यास-

ने वीजासने नमः इति मध्यमा पुष्पाञ्जलिः। ततो मनुप्रपुरिते वर्णैः वर्णस्थाने वैखरी पुष्पाञ्जलिः। ओं नमः। मं नमः। उं नमः। इत्येकाक्षरमन्त्रैः मूर्ध्यादिषु अर्हं हरिहर नमः। हर नमः। हरि नमः। अर्हं नमः। इति द्व्यक्षरैरपि तेष्वपि ओं नमो ब्रह्मणे विष्णवे शिवाय नमः। ओं नमः शिवाय नमो विष्णवे ओं नमो ब्रह्मणे इति षडक्षरैरपि तेष्वेव ओं ह्रीं हंसस्सोहं स्वाहा। ओं नमो नारायणाय ओं ह्रीं ~~हौं नमः~~ हौं नमः शिवाय नमः। ओं ह्रीं हौं नमः शिवाय ओं नमो नारायणाय ओं ह्रीं हंसः सोहं स्वाहा। इत्यपि तेष्वेव ओं तत्सन्नमो ब्रह्मणे तत्सन्नमः ओं नमो भगवते वासुदेवाय ह्रीं हां नमः शिवाय। हंसस्सोहं नमः। ओं ह्रीं हौं नमश्शिवाय हंसः सोऽहं ओं नमो भगवते वासुदेवाय ओं तत्सन्नमो

ब्रह्मणे तत्सद्ब्रह्म इत्यपि। तथा पुनः समवन्त०स्वरन्तगायत्र्यनुष्टुप्त्रयेण च तेष्वेव –

“नारायणाय विद्महे वासुदेवाय धीमहि।
तन्नो विष्णुः प्रचोदयात् „

इति विष्णुगायत्री। तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयादिति रौद्री। हंसांसतोयमपामग्ने स्तेप्सरा दीप्यमानः स नो मृत्योस्त्रायतां नमो ब्रह्मणे विश्वनाभिरिति ब्रह्मानुष्टुबितरत्तु द्वयं वक्ष्यति। तत आवरणस्थाने तत्सामान्यमन्त्रैः पुष्पाञ्जलिं कुर्य्यादिति प्रसरपुष्पाञ्जलिं प्रध्यानतनवद्ति पद्मान्तरम्। आवरणपूजानन्तरं प्रसरपुष्पाञ्जलिवैलोम्येन संकोचपुष्पाञ्जलिं कृत्वा अर्घ्याद्यष्टकं दत्वा निवेद्य पात्रमन्त्राम-

न्त्रेण संशोध्य तस्मिन् मूलमन्त्रे तत्पात्रे निवेद्य-
जातं संपाद्यामृतीकरणं निर्विषीकरणं द्रव्यं
निध्याय मूलेनाभिमन्त्र्य कवचास्त्राभ्यां संर-
क्ष्य परिषेकादिकं कृत्वा नेत्रेण नेत्रयोः पुष्पा-
ञ्जलिं निधाय तत्पात्रं हविस्सौवर्ण्यकिविध्या-
नेकभक्षणं निवेदयामि, देवेश सानुगाय गृ-
हाण तत्। नमःइति निवेद्य सुरभिःसंहारग्रा-
सप्राणादिसुरभिसंहारमुद्राः प्रदर्श्य मूलं
किञ्चित् जपेत्। मध्ये परितः क्रमादिति ६३
अंकुरार्पणगतं क्रमेणेत्यर्थः। मन्त्रेणेति वि-
ष्णवे नमइत्यादिमन्त्रैरित्यर्थः। उपलिप्य कु- ६४
ण्डमत्र चेति चकारेण कुण्डसंस्काराः सू-
चिताः। प्रथमं मूलेन वीक्षणं कुर्यात् ततोऽ-
स्त्रेण प्रोक्षणं तेनैव दर्भैः ~~संमार्जनं~~ संमार्जनं

वर्मणाभ्युक्षणं अस्त्रेण खननोद्धारौ पूरणं हृदा समीकरणमस्त्रेण वर्मणा सेचनमस्त्रेण कुट्टनं वर्मणा मार्जनं विलेपनं कलारूपत्वकल्पनं त्रिसूत्रवेष्टनं च हृदयेनार्चनमस्त्रेण वज्रीकरणं हृदयेन चतुष्पथीकरणं कवचेनाक्षपाटनमिति कुण्डसंस्कारः ॥

अथ वीक्षणप्रोक्षणताडनाभ्युक्षणैरेव संस्कुर्यात्। योगविष्टरंमन्त्रीति, ओं ह्रीं वागीश्वरी वागीश्वरासनाय नमइति मन्त्रेण पूजयेदित्यर्थः। गुरुजनोपदेशेनेति गुरुप्रोक्तविधिना महागणपतिपटलोक्तविधिना वा त्रिकोणत्रयं मन्त्रविशेषानुसारेण लिखेदित्यर्थः। मूलाधारेऽपि त्रिकोणमध्याग्नौ योगविष्टरं कल्पनीयमित्याह— प्राणाग्नीति, उभयत्रा-

पि वागीश्वरौ कल्पनीयावित्याह— तत्रेति॥ सद्दृतुमती बाह्या वागीश्वरी अतीन्द्रियवाभ्यां मूलाधारइतिविशेषः। चशब्दः शक्तिमतसमुच्चयार्थः। मण्याग्निं द्विजमग्निं पात्रेणानीयास्त्रेण क्रव्यादांशं परित्यज्य वीक्षणादिभिः संस्कृत्य तमग्निं नासिकाद्वारेण मूलाधारं नीत्वाध्विपञ्चाशत्यात्मककुण्डलिन्या एकीकृत्य तत्र प्राणाग्निहोत्रविधिना सकृत् वर्णहोमं विधाय तमग्निं प्रणवेन बैन्दवाग्नीनेकीकृत्यामृतमाप्लाव्य तं तमग्निं रं अग्निचैतन्याय नमः। इति पात्राग्नौ संस्थाप्य तारेणाभिमन्त्र्य सुरभ्या अमृतीकृत्यास्त्रेण संरक्ष्य कवचेनावकुण्ठ्य रं अग्नये नम इत्यभ्यर्च्य कुण्डोपरि त्रिः प्रणवेन परिभ्राम्य तारेण वी-

विवरणे

वह्नीन् बुध्या देव्या योनौ क्षिपवित्यर्थः। मन्त्री प्रविन्यसेदिति जानि सर्वज्ञादिः सूचितः। पीठमूर्तिपूजादिकं चाङ्गन्यासात् पूर्वं यथा- ८१ वत् देशिकोत्तम इति अग्न्यादिपाद्याष्टकयोगः ८४ शक्तियोगश्च सूचितः। संपरिस्तीर्य्य सम्यगिति परिषेकपूर्वकं परिस्तरणानन्तरं परिधिनि ध्यानं तेषु प्रागादिक्रमेण ब्रह्मादिचतुष्टयपूजाश्च सूचिताः। पुनः वैश्वानरमन्त्रेणाग्निं संपूज्य जिह्वाव्यावरणपूजा कार्या। मूर्तिबाह्ये मातृभैरवावृतिरपि पूज्येति केचित्। तद्बहिर्लोकपालाः पूज्याः। मनुना तेन मन्त्रीति प्रणवशक्तियोगः सूचितः। समृद्धिमन्त्रोक्ता ऋष्यादयः ह्रीं बीजं स्वाहा शक्तिः आवरणपूजानन्तरं स्रुक्स्रुवौ

षष्ठः पटलः

पाणिभ्यामादायाधोमुखं त्रिधाः प्रताप्य दर्भैरग्रादिक्रमेण संमार्ज्य सव्यहस्तेन गृहीत्वा दक्षिणेन प्रोक्षयित्वाऽस्त्रेण पुनः प्रताप्य दर्भानग्नौ प्रक्षिप्यामध्यभागे कुशास्तरे संस्थाप्याज्यस्थालीं मन्त्रेण संप्रोक्ष्य वीक्षणादि संस्कृतं तस्मिन्निक्षिप्य निरुद्धबाह्यवायःयेङ्गारान् हृदा तेषु संस्थापयेत् इदं तापनं नाम आज्यसंस्कारः दर्भद्वयं संदीप्याज्ये क्षिप्त्वा वन्हौ क्षिपेत्। हृदयेनेदं पवित्रीकरणं दीप्तेन दर्भद्वयेन नीराज्यकवचेनाग्नौ क्षिपेत्। इदमभिद्योतनम्। घृते प्रज्वलितान् दर्भान् प्रदर्श्य अस्त्रमन्त्रेणाग्नौ प्रक्षिपेत्। इदमुद्योतनम्। आहृत्याज्यं बहिर्वन्ह्यावङ्गारान् संयोज्य

इदं वह्न्यैक्यीकरणं सुधीरित्यग्निदेवतैक्यं जानन्नित्यर्थः। आत्मनि देवतैक्यं भावयन् मूलेनैकादश जुहुयादिति नाडीसन्धानमेतत्। अथ जिह्वाङ्गादिमन्त्रैरपि हुत्वा कुण्डान्तरेष्वग्निं पूर्वादितो निहृत्य स्थावराणां देवतां तेषु संपूज्य मूलेनाष्टनवपञ्चविंशतिसंख्यं हुत्वाज्येन साध्यञ्चरुणा वा पुनः साध्येन मनुना हुनेदित्यादि सकलकुण्डेषु समानम्। द्रव्यैर्विधानप्रोक्तैरित्यत्रायं द्रव्यपरिमाणविधिः। कर्षमानं घृतं शुक्तिमात्रं पयः पञ्चगव्यमधूनि तत्समानानि दुग्धान्नमक्षमात्रं दधि प्रसृतं मुष्टिर्लाजाः पृथुकसक्तवः गुडशर्करे पलार्धे। ग्रासार्धं चरवः इक्षुः पर्वान्तः नालिकेर-

मष्टखण्डं बिल्वं त्रिखण्डं द्विखण्डं कपित्थमुर्वारुकं त्रिखण्डं फलान्यन्यानि अखण्डानि समिधो दशाङ्गुलाः दूर्वात्रियुतद्व्यङ्कुरी चतुरङ्गुला व्रीहिमुद्गमाषयवकोद्रवगोधूमाः मुष्टिमात्रास्तण्डुलास्तदर्धास्तिलसर्षपाः चुलुकमानाः शुक्तिमात्रं लवणं मरिचां केविवो गिवातिः। पुरं बदरमात्रं। चन्दनागरुकर्पूरकस्तूरी कुङ्कुमानि तिन्त्रिणीफलमानानि समिद्धोमेऽग्नि स्थितं ध्यायेत्। शयानमाज्यहोमेषु निषण्णमशेषहोमेषु अग्नेरास्यात्र होतव्यम्। स्वर्णसिन्दूरबालार्ककुङ्कुमक्षौद्रवर्णोऽग्निः शुभदः। भेरीवारिदहस्तिध्वनिः शुभदः। नागचम्पकपुन्नागपाटली यूथिकापद्मेन्दीवरकह्लारसर्पिर्गुल्गुलु-

विवरणे

गन्धोऽग्निः शुभः। प्रदक्षिणाग्निर्निष्कम्पः शुभः। कुन्देन्दुधवलो धूमः शुभदः। कृष्णवर्णोऽग्निर्यजमानं नाशयेत्। श्वेतो वायसस्वरो राष्ट्रं नाशयेत्। झर्झरस्वरः सर्वनाशकृत्। पूतिगन्धो होतृदुःखप्रदः। छिन्ना कृत्ता शिखा धनक्षयं मृत्युं च कुर्यात्। शुकपारावतनिभोऽग्निस्तुरङ्ग गो हानि कृत्। एवंविधेषु दोषेषु मूलेनाज्येन प्रायश्चित्ताय पञ्चविंशतिवारं जुहुयात्। मेषादिमुक्तेति बलिमन्त्रोद्धारः। नक्षत्रसंज्ञापूर्वमुक्त्वा मेषादिराशिसंज्ञामनन्तरमुक्त्वा देवताभ्य इत्यादि वदेदित्यन्वयः। अश्विनी भरणीकृत्तिकापादनक्षत्रमेषराशिदेवताभ्यो दिवानक्तंचारिभ्यः सर्वेभ्यो भूतेभ्यो नम इत्यादयो मन्त्राः।

षष्ठः पटलः

राज्याधिपबलिमन्त्रेषु तत्तद्राज्याधिपतिनामसंयोग एव विशेषः। पुनर्निवेद्य मुक्तेति पानीयं समर्प्य यथाविध्यानं जलं दत्वा गण्डूषदन्तधावनादिकं समर्प्यार्घ्यं चषकं दत्वा प्रसरपुष्पाञ्जलिं विधाय दर्पणादिकमेतैः मन्त्रैः प्रयच्छेत्॥

बुद्धिः सवासना क्लृप्ता दर्पणं मङ्गलानि च।
मनोवृत्तिर्विचित्रा ते नृत्तरूपेण कल्पिता।
ध्वनयो गीतिरूपेण शब्दा वाद्यप्रभेदतः।
चित्राणि नव पद्मानि कल्पितानि मया प्रभो।
सुषुम्ना ध्वजरूपेण प्राणाद्याश्चामरात्मना।
अहंकारो गजत्वेन क्लृप्तो देहो रथात्मना।
इन्द्रियाण्यश्वरूपाणि शब्दादिरथवर्त्मना।
मनः प्रग्रहरूपेण बुद्धिः सारथिरूपतः।

सर्वमन्यन्मयाक्लृप्तं तवोपकरणात्मना ।

इति राजोपचारात् दत्वा पुष्पाञ्जलिं विधाय प्रसन्नार्घ्यं दत्वा मूलमन्त्रं शक्त्यनुसारेण दत्वा जप्त्वा समर्प्य प्रदक्षिणास्तुतिनमस्कारादिकं विधाय देवतानुज्ञया तूत्तरतः कर्करीं स्थापयेत्। ईशानकोणे पूर्वसञ्चिते विकिरे हेमवस्त्रादिसंयुक्तां तोयपूर्णां कर्करीं स्थाप्य रक्तां सिंहस्थां खड्गखेटकधारिणीं घोररूपां त्रिमास्यामस्त्रदेवतां संपूज्य चक्रासनेन प्रदक्षिणं नालमुक्तवारिणा सार्धं नयन्नक्षतेति लोकपालानां देवानां श्रामणिवास्त्रमन्त्रेण यथापूर्वं स्थापयेत्। पूजयेच्च पुनस्सर्वं स्थण्डिलेऽग्नौ पुनश्चरुं पाचयेत्। पात्रमन्त्रेण प्र-

षष्ठः पटलः

क्षाल्य मूलजप्तानां तण्डुलानां प्रसृतिपञ्चदशकं तत्रास्त्रेण निक्षिप्य प्रक्षाल्य गव्यपयसा संपूर्य कवलेन तन्मुखं पिधाय प्राङ्मुखो मूलमन्त्रं जपन् पचेत्। मूलेन तद्वाभिघारं दत्वा कवलेनावतार्यास्त्रजप्ते कुशास्तीर्णे मण्डले संस्थाप्य त्रिधा विभज्य देवायाग्नये च भागद्वयं दत्वा परं शिष्येण सार्धं भुक्त्वा चाम्याचान्तं शिष्यमानीय सकलीकृत्य तालप्रमाणं हृज्ञहं दन्तकाष्ठं तस्मै दद्यात्। स तेन दन्तान् संशोध्य प्रक्षाल्य विसृज्याचम्यागच्छेत्। तं शिखाबन्धाभिरक्षितं कृत्वा वेद्यां दर्भास्तरे तनसार्थं शयीतेत्यधिवासः। ततः प्रातरुत्थाय कृतनित्यपूजो नैमित्तिकीमपि जपादितम-

पेणान्तं विधाय शुद्धं शिष्यमानीय पञ्चगव्यं प्राशयित्वा तं कुण्डसमीपे ऽभिवेश्य तं दिव्यदृष्ट्या विलोक्य तच्चैतन्यं स्वहृदये संयोज्य संक्षेपतो विस्तरतो वाऽध्वशोधनं कुर्यात्। मन्त्रवर्णपदभुवनतत्त्वकलाध्वनः पदान्धुनाभिहृत्तालुफालमूर्धसु स्मृत्वा तार्यैकुण्डैः सघृतैस्तिलैरमुकमध्वानं शोधयामि स्वाहेति प्रत्येकमध्वनामाहुत्यष्टकं शुध्यर्थं हुत्वा क्रमेण विलाप्य सृष्टिक्रमेणोत्पाद्य स्वहृत्स्थं चैतन्यं तत्र नियोज्य मूलेन पूर्णां हुत्वा देवतां कलशाउद्वास्य पुनर्व्याहृतिभिह्वांगादीनां हुत्वा परिषिच्यात्मन्यग्निमुद्वास्य नेत्रमन्त्रेण शिष्यनेत्रे बध्वा तन्मण्डलमानीय तेन कलशस्थे देवे

षष्ठः पटलः

पुष्पाञ्जलिं कारयित्वा नेत्रबन्धं विसृज्य सर्वतत्वादिक्रमेण दत्तदीक्षिणं तं दर्भसंस्तरे स्थापयित्वा मव्यावाक्रमेण तं संहृत्य उत्पाद्य साध्यमन्त्रान्न्यासादिकं तच्छरीरे विधाय कलशस्थदेवाय पुष्पाञ्जलिं विधाय तत निष्कलीकृत्योद्धृत्य ध्यात्वाभिषिञ्चतो गुरोर्भावनाप्रकारमाह —— अथ पटुरवेति, पटुरवाणां मुखे भवा या उन्मनी साक्षि रूपिणी तेन वाच्या समनी तव्या घोषैः द्वारभूतैः शिष्यशरीरं प्रविश्य तद्विलमुखात् कुण्डलीमुखाद्विष्यततामाशिषामिच्छाशरीराणां ब्रह्मादिपञ्चमूर्तीनां कारणभूतेन रवेण द्वारभूतेन संस्पर्शो॰व्यापिनी समनी द्वारेण परमपदं प्राप्य सुनियतमपि शिष्यं देवतारूपेण

सुस्थितं व्या ला कलशजले कलशं यस्मिन् शेरेत परमात्मनि तद्रूपैः जलैः यथावदभेदेनाभिषेचयेत् इत्यर्थः। अभिषेककाले मातृकामनस्यानुलोमेन जपन्येत्याह— यथा पुरेति। मन्त्रिवर इति। मातृकानन्तरं मूलं त्रिरुच्चरन् अभिषेचयेत्। तदनन्तरं न्यासादिकं च कुर्यादित्युक्तम्। शिशो गुरुरिति, शिष्यहृत्पुण्डरीकस्थां देवतां संपूज्य तस्य दक्षिणकर्णे सर्षिच्छन्दोदैवतं शिशा उच्चार्य सोदकं दत्वा स्वयं च निजशक्तिहानानवाप्तये जपेदित्यर्थः॥

११८५

इति प्रपञ्चसारविवरणे ॥षष्ठः पटलः॥

श्रीः॥

॥अथ सप्तमः पटलः॥

सर्वमन्त्रजपादेर्लिपिन्यासादिपूर्वकत्वात् सर्वमन्त्रमयज्ञानशक्तिरूपत्वेन प्राधान्याच्च प्रथमतो मातृकाभिधानं वक्तुमारभते —— अथेति, सर्वमन्त्रसामान्यदीक्षाकथनानन्तर्यमथशब्दार्थः समस्तबोध्यस्थितिदीपिकाया इत्यक्षराब्धिदेवतालोपपादनं बोध्यानां ज्ञानशक्तिप्रसरात्मकानां शब्दानां स्थितयः वैखरी मध्यमा पश्यन्ती परा लक्षणाः तासां दीपिका उन्मनीशक्तिरित्यर्थः। अथवा समस्तानां बोध्यानां स्थितिः पर्यवसानं यस्मिन् परमात्मनि तस्य प्रकाशिकाया इत्यर्थः। अस्ति हि सर्ववर्णानां

वाच्यरूपत्वेन ब्रह्मात्मबोधकत्वं अथवा समस्ता बोध्यास्तिष्ठन्ति। येषु विषयेषु तस्य सर्वस्य दीपिकायाइत्यर्थः। शब्दानुविद्धं हि सर्वं विज्ञानजातमशेषदुःखप्रशमायेति विनियोगोक्तिः। बिन्दुविसर्गौ बीजशक्ती हंसावित्यन्ये ततोहमिति बीजं सहेतिशक्तिः। इत्युभयाविरोधेन सिद्धं भवति। अथानन्तरमक्षराणां जपादेः प्रपरिविध्यानं वक्ष्य इत्यन्वयः। कस्यानन्तरमिति आह— आधिदेवताख्याइति भुवनाधिपत्नेरित्यर्थः। वाग्भवानन्तर्यमप्याह— समस्तेति॥ प्रणवानन्तर्यमप्याह—जपादेरिति। प्रणववाग्भवशक्त्यनन्तरं नमोन्ता वर्णा जपादौ प्रयोक्तव्याइत्यर्थः। ।१॥ सुमतिभिरिति। विधिपद-

सप्तमः पटलः

योगः सूचितः। उक्तं चेति। दैवीपदयोगः सूचितः। मातृका सरस्वती देवता क्रमेण कथिता न्यस्या इति ध्यामादियोग उक्तः। भुवनेश्वर्यादियोगे चायं विशेषः। ।२॥ भारतीमिति। नादात्मकं सूक्ष्मरूपं कथितम्। तामिति परं चिदात्मकं भारतीं तां भुवनेश्वरीरूपिणीमिति स्थूलध्यानेऽपि पाशांकुशपुस्तकाक्षवलययोगः सूचितः। ।३-५॥ विमलधीरिति तत्तदक्षरन्यासे तत्परायणव्याप्यविस्मरणं सूचितम्। गुरुणानुशिष्ट इति करन्यासादिकं सूचितम्। आदिषट्कं तलादिषुन्यस्य मकारादिदशकं दक्षकनिष्ठाद्यंगुलीषु व्यापकादिक्रमङ्गुलीपर्वसु न्यस्याङ्गमन्त्रैरपि न्यसेदिति करन्यासः। सामान्य-

पटलोक्ता न्यासाः सर्वत्र कार्याः। सुनियतइति ब्रह्मचर्यस्थानासनादिनियमाः सूचिताः। अपि यजेदिति तर्पणाभिषेकस्थानादिकमुक्तम्। व्योमाविरसेति। हकाररकारावुक्तौ। प्रतिदलं प्रार० ध्येति। पारायणाक्षराणां शास्त्रानुसारेण लेखनं सूचितम्। ऋग्वेदादिगतवर्गप्रश्नादीनां च सप्तमार्णः ठकारः। विषध्वंसे गरुडयोगः। गदध्वंसे नरसिंहयोगः मृत्युंजये तद्योगः। विधिनाभियजेदिति पृथिव्यनन्तरं विद्याविध्ययोगः सूचितः। प्रविध्यायेति यन्त्रजीवादियोगः जमुत्रेति। ओं ह्रीं वर्णाब्जाय सरस्वत्यासननाय नमः इति पीठमन्त्रः सूचितः। वर्णतनुमिति मातृकाया पूर्तिपूजा चाष्टवर्गानिति

सप्तमः पटलः

चशब्देन व्यापिन्यादिशक्तिभिश्चतुर्थमा-
वरणं सूचितम्। व्यापिनी पालिनी शान्ति-
नी क्लेदिनी धारिणी मालिनी हंसिनी शा-
न्दिन्यः शक्तयः ताश्च श्वेताः अक्षवलयपु-
स्तकधारिण्यः ब्रह्माणी कनकवर्णा अक्षसू-
त्रकमण्डलुवराभयधरा शूलपरशुदु-
न्दुभिकपालधरा माहेश्वरी अंकुशदण्ड-
खट्वाङ्गपाशधरा कौमारी चक्रघण्टाक-
पालशंखधरा वैष्णवी मुसलखड्गखेटकाभ-
यधरा वाराही अंकुशतोमरपाशधरा इन्द्रा-
णी शूलकृपाणनृशिरःकपालधरा चामुण्डा
रत्नाक्षस्रक्बीजापूरकपालपंकजधरा
महालक्ष्मीः शतमखमुखाद्यानिति शतम-
खमुखाः लं रं टं क्षं वं यं सं हं ह्रीं ओमिति

विवरण

बीजानित्यान्यादौ येषांल्लोकपालानां ते न तथोक्ताः। वर्णजापीति, वर्णजापी वेत्यर्थः। १२। अपि विद्यायेति। कर्णिकाबीजयोगः सूचितः। अथवा अपिशब्देन दशाक्षरीयोगः विद्याशब्देन त्रैपुराणामन्यतमयोः वां सुषीरित्याधारेषु पञ्चवर्णादिचिन्तनं। अयमत्र प्रयोगक्रमः। स्वयं देवताविग्रहो भूत्वा लिपिपद्मे हस्ते संकल्प्य तस्मिन् जलमादाय ऐं क्लीं सौः वदवद वाग्वादिनि स्वाहा। अः सौः क्लीं ऐं एवं क्षकारान्तं जपित्वा क्षाद्याकारान्तमेव सबिन्दुकं जपित्वा एवमेव सबिन्दुविसर्गमकारादिक्षान्तं जपिपि वन्मूलाधाराद्याधारेषु चतुः षट् दश द्वादश षोडशदलपद्मेषु वर्णानां वादि-

सप्तम: पटल:

आदि ठादि कादि आदिहादीनां दीपशिखावच्छायापीं ध्यायेत्। पुनरप्येवं द्विवारं षिवन वर्णानामास्यान्तरमुद्गमनं वास्याच्छांस्त्रांग्राकारेण निर्गमनं च ध्यायेत्। सप्तवैकवर्गैर्वा त्रिवार जपन्ति अप्यसुत्वा ओप्यधीमिति पूजादिकमुक्तम्। ।१३।।१४।। कल्डशमसल्धीरिति। कामनामुणवीजस्योवादिकं सूचितम्। मेधाकामस्य क्लैर्योग:। इन्दिराकामस्य तद्योग:। आयुर्षपुंसंयोग:। प्रद्याम्ने प्रणवयोग:। कविंते वाग्भवयोग:। सद्यास्य जपायोग:। विश्वासंवादे शक्तियोग:। नानागुणाश्रयमुद्राकामे सर्वयोगा इति।।

अथवा भानुवारे मध्यप्रागादि दिक्षु नवकलशान्मुक्तामाणिक्यवैदूर्यगोमेद-

वज्रविद्रुमपुष्यरागमरतकनीलन्द्रलयुता-
न्न संपूज्याभिषिञ्चेत् । तत्र मध्ये सर्वैः बीजैः
देवीं संपूज्य दशकुंभेषु ह्रौः इत्यादिभिः व्या-
पिन्याद्याः पूज्याः । शान्तिर्न्या दुर्गा बीजेन
पूज्या त्रिलोहमुद्रिका नवनलमुद्रिका वा काल्लि-
तसंवता कार्या, कलशाज्यपूजाहोमनीहिता ॥२५
वन्हिसोमप्रोतानीति, अग्नीषोमात्मकानि-
लार्णैः । मन्त्रीति । ओं ह्रीं क्षां क्षं नमः । ओं ह्रीं
क्ष्रं क्ष्रुं नमः ओं ह्रीं ह्रं ह्रुं इत्यादिक्रमेण पांत-
येदित्यर्थः । विन्यासैरिति, हल्लसविस-
र्गसबिन्दुविसर्गसबिन्दुसकलसकेशवादि
सश्रीकण्ठादिसशक्तिकमलामात्समातृक-
मलाशक्तिसकमलसमारम्यावैनन्यैरन्त्य-
र्णैः । जपाद्यैर्नवविध्याः जपाद्यैर्नवविध्याः हता-

सप्तमः पटलः

चैनामाद्यकोटौ शुक्लन्यासे ऋषिन्यासध्यानादिकं मातृकायामुक्तप्रकारेण द्रष्टव्यम्। सरस्वती एव देवता। विसर्गन्यासे विसर्गान्तान्यङ्गानीत्येव विशेषः। ध्यानपूजादिकं समानम्। सृष्टिसरस्वती देवता। विन्दुविसर्गयोगे तथाविधान्यङ्गानि स्थितिसरस्वती देवता। ध्याने तु विशेषः। सिन्दूरवर्णवराक्षसूत्रमृगपुस्तकधरं देवं ध्यात्वा तदङ्के काञ्चनाभां पुस्तकाक्षमालाधरां देवीं ध्यायेदिति। सविन्दुन्यासे संहारसरस्वती देवता। रक्तवर्णाक्षमालाटंकमृगपुस्तकधरां ध्यायेत्। सकलन्यासे प्रजापतिऋषिः गायत्री छन्दः कलासरस्वती देवता। ह्रस्वदीर्घान्तरस्थैः प्रणवैरङ्गानि पञ्चनाकशूलमृगाक्ष-

विवरणे

सूत्रपुस्तकटंककणाङ्कुशांकरवककलशाधरा मुक्ताविद्युत्पयोदस्फटिकजपावर्णपञ्चवदना शुक्लवर्णा ध्येया। केशवादियुतन्यासे प्रजापतिर्ऋषिः। गायत्रीछन्दः। अर्धलक्ष्मीनारायणो देवता। दीर्घषट्कयुक्तेयुक्तेन कामेनाङ्गानि, अथवा ओं नमो ह्रीं नमो नारायणाय हंसः सोऽहं कं खं गं घं ङं आं श्रीं नमो नारायणाय हंसः सोऽहं देव्यै हृदयाय नमः। इत्यादि मन्त्रैरङ्गानि कुर्यात्। पद्मिनी विष्णुपत्नी वरदा कमलरूपा शक्तिन्योऽवशिष्टाः शक्तयः। पद्मगदाशंखचक्रपुस्तकप[illegible]दादर्शीरत्नकलशधरो विद्युत्पयोदवर्णो ध्येयः। श्रीकण्ठादियुतन्यासेऽम्बरीषऋषिः। अनुष्टुप् छन्दः। अर्धनारीश्वरो देवता।

दक्षिणामूर्तिगायत्र्यौ ऋषिच्छन्दसी इत्यन्ये, षट् दीर्घयुजा ह्रस्वाङ्गानि, अथवा ओं नमो भगवति ब्रह्माणि, रक्षरक्ष पद्महस्ते, मां रक्षरक्ष अं कं खं गं घं ङं आं ह्रीं ह्सौः सञ्जीवनि सञ्जीवनि हृदयाय नमः। ओं नमो भगवति, माहेश्वरि, रक्षरक्ष त्रिशूलहस्ते रक्षरक्ष इं चं छं जं झं ञं ईं ह्रीं ह्सौः ऊर्ध्वकेशिनि शिरसे स्वाहा। ओं नमो भगवति कौमारि, रक्षरक्ष शक्तिहस्ते मां रक्षरक्ष उं टं ठं डं ढं णं ऊं ह्रीं ह्सौः जटिलकेशिनि, शिखायै वषट्। ओं नमो भगवति वैष्णवि, रक्षरक्ष चक्रहस्ते मां रक्षरक्ष, एं तं थं दं धं नं ऐं ह्रीं ह्सौः मायात्रैलोक्यरूपिणि, सहस्रपरिवर्ति कवचाय हुं। ओं नमो भगवति वाराहि रक्षरक्ष दंष्ट्रहस्ते मां रक्षरक्ष,

विवरणे

ओं पं फं बं भं मं औं ह्रीं ह्रैः ताराक्षिणि, नेत्रत्रयाय वौषट् ओं नमो भगवति, इन्द्राणि ? रक्षरक्ष (त्त). वज्रहस्ते मां रक्षरक्ष अं यं रं लं वं शं षं सं हं ळं क्षं अः ह्रीं ह्रैः मारयमारय अस्त्राय फट् ओं नमो भगवति चामुण्डे रक्षरक्ष पाशहस्ते मां रक्षरक्ष अं इत्यादि ह्रस्वान्तं कादिक्षान्तं दीर्घान्तं चोक्त्वा सर्वाङ्गं रक्षरक्ष सर्वाङ्गव्यापिनि स्वाहा इति मन्त्रैरङ्गानि व्यापकं च कुर्यात्। बन्धूककान्तिनिभोऽक्षमालाङ्कुशपाशवरदधरो ध्येयः। शक्तिकमलामारयोगे शक्तेस्तुष्यारिकं न्यसेत्। द्विरुक्ते बीजैरङ्गानि। अक्षस्त्रक्पञ्चशरपद्माँकुशपाशपेक्षुधनुः पुस्तकधरारुणा ध्येया। समारकमला-

शक्तिन्यासे रं मोहनगायत्रीजगज्जनन्यृष्यादयः ह्रिक्लैब्लैस्रैरङ्गानि पञ्चमा पञ्चबाणपद्मांकुशाक्षमाला पुस्तकपाशपञ्चधनुर्धरा ध्येया। शक्तिन्यासे शक्तिवदङ्गर्ष्यादिकं अक्षस्रगंकुशपाशपुस्तकधरा ध्येया। सश्रीन्यासे श्रीबीजवदङ्गर्ष्यादिकं अक्षस्रक्कमलद्वयपुस्तकधरा ध्येया। सकामन्यासे कामबीजवदङ्गादिकं अक्षस्रक्कह्लारचापपुस्तकधरा ध्येया सश्रीमानिति, क्ष्वागादियोगे श्रीबीजयोगेन श्रीरेव फलं। कलायोगे कान्यकर्षणं श्रीकण्ठादियोगे क्ष्वेडादिजयः जरापमृत्युरोगादिजयोऽन्येषां, स्वनं सर्वदा वा फलं॰ कलाशीति कलान्यासे वर्णयोगक्रममाह—

विवरणे

प्रसङ्गान्न्यत्र मन्त्रीति, कलान्यासे पा-
शांकुशाक्षरादियोगः सूचितः। विशेषै-
रिति, उद्धारस्य मन्त्रसं ह्यावद्रूपवं ज्ञानर्द्धि-
२०। रित्यर्थः।^ केशवादिन्यासे विशेषमाह —
अष्टाक्षरैरिति, अष्टाक्षरपटलोक्तो योम-
नुर्वर्यो तेन विशिष्टमूर्तिं विष्णुमिति, वर्णोर्ध्व-
भागेऽष्टाक्षरयोगोऽप्युक्तः। विष्णुमपीति,
श्रियमपीत्यर्थः। मन्त्रितमिति वर्णादौ त्रि-
पुटादियोगः सूचितः। यथावदित्यर्थल-
क्ष्मीनारायणलक्ष्ये यस्य न्यसेदपीति
२१। पूजादिकमपि कुर्यादित्यर्थः।^ रुद्राद्यैरि-
ति, रुद्राणां श्रीकण्ठादिमूर्तीनामादौ स्थि-
तान् वर्णान् शक्तियुतान् मूर्त्यन्ते पूर्णो-
दर्यादिशक्तियुतान् यायेत्स्वस्व~~स्वा~~गादिध्यातु-

योगः सर्वन्यासेषु समानः। श्रीकण्ठादौ विद्वानिति। श्रीकण्ठादिमूर्तीनामादौ वर्णानामुपरि पञ्चाक्षरीविद्यायोगः उक्तः। प्राक्
ति बीजसंयुतानि वर्णादौ प्रणवशक्तिप्रासादव्योगा उक्ताः। अपीत्यजपादि योगः पञ्चवि- २२-२८
भेदभिन्नयेति। पञ्चाशत्सप्तत्रिद्व्येकमन्त्रसंबद्धयेत्यर्थः। शक्तिकमलामारसमारसमारकमलाशक्तिसकमलासमार पञ्चन्यासभेदयुतयेति चार्थः। साध्यकोत्तमा इति प्र-
पञ्चयागादौ तत्वबृहामध्येकारठकः। पू- २५
र्वमिति। लिपिन्यासात् पूर्वं निखिलिपिन्यासादुत्तरमित्यर्थः। अवहितन इति बीजादीनां ध्यानभेदः। यथावदित्यङ्गादिन्यासपू-
२६। र्वकत्वं। मन्त्रितम इति विभूति मन्त्रजपः बी-

२०।२८

षट्कानन्तरं महाविभूते वरे वरदे सर्वज-
नमित्यादिर्विभूतिमन्त्रः ग्राह्यंकृत्वा स्मरेति न-
वग्रहन्यासः सूचितः। प्राणाग्निहोत्रार्थं
सप्तग्रहन्यासस्थानमाह — वदनेति —
अयमत्र न्यासक्रमः। स्वरस्थाने स्वरान्विन्य-
स्य तानुक्त्वा स्वराधिपतये सूर्याय भगवते
नमः। इति स्वरस्थाने व्यापयेत्। कवर्गं न्य-
सित्वा तानुक्त्वा कवर्गाधिपतये नाराय-
णाय भगवते नमः। चवर्गाधिपतये शुक्रा-
य नमः। इत्यादिकयो व्यापकमन्त्राः ज्ञात-
व्याः। यथावदिति प्रणवशक्तिमूलमन्त्रादि-
योगो व्यापकन्यासश्च सूचितः। मन्त्री स्व-
रादिवर्णेशानिति। भगवत्पदस्य तत्तदधि-
पतिपदस्य च योग उक्तः। स्वरानुक्त्वा सो-

सप्तमः पटलः

ममण्डलाय इति मूर्धादिगलपर्यन्तं व्याप्य स्पर्शानुक्त्वा सूर्यमण्डलाय नम इति गलादिनाभिपर्यन्तं व्याप्य यादिकमुक्त्वाऽग्निमण्डलाय नम इति नाभ्यादिपादान्तं न्यसेदिति मण्डलत्रयन्यासः। अकादि ठान्तमुक्त्वा सोममण्डलाय नम इति मूर्धादिहृदयान्तं न्यसित्वा डादिक्षान्तमुक्त्वाऽग्निमण्डलायेति हृदादिपादान्तं न्यसेदिति अग्नीषोमन्यासः। आदिक्षान्तमुक्त्वा हंसः पुरुषात्मने नम इति व्यापकत्वेन हंसन्यासः। एते चान्याश्च यथावदिहैव सूचिताः। तथेति वा। अथ नवग्रहन्यासः। क्षं ळं हं सं षं मरतकवर्णाय केतवे भगवते नमः। शं गं ळं रं यं गोमेधवर्णाय राहवे मं भं बं फं पं नीलवर्णाय

विवरणे

शनैश्चराय नं धं दं थं तं विद्रुमवर्णाय बृहस्पतये णं ढं डं ठं टं वज्रवर्णाय बुधाय ञं झं जं छं चं पुष्परागवर्णाय शुक्राय ङं घं गं खं कं वैडूर्यवर्णाय अङ्गारकाय अः अं औं ओं ऐं एं ॡं ऌं मुक्तावर्णाय सोमाय ॠं ऋं ऊं उं ईं इं आं अं माणिक्यवर्णाय ~~से~~माय सूर्याय भगवते नमइति मूलाधारलिङ्गमूलनाभिहृदयगलंबिकाभ्रूमध्यललाटब्रह्मरन्ध्रेषु न्यसित्वा मण्डलत्रयाग्नीषोमहंसन्यासान् पूर्वोक्तैवपरीत्येन न्यसेदिति हुत्वा महात्माथ्यशाताधिंकरत्वं विन्यनन्य तावच्चेति प्राणाग्निहोत्रस्य प्राथम्यं वक्ष्यति। अतः प्रथमं नवग्रहमण्डलत्रयादिन्यासं कृत्वा सप्तग्रहमण्डलत्रयादिन्यासः

१३०/

३१

१३०

१३०। कर्तव्यः। ब्रह्मा स्यादृषिरस्य प्रपन्नयाग-
मन्त्रस्य प्राणाग्निहोत्रस्य तु स्वयंभूरिर्षिः।
पञ्चायिता चेति। स्वयमर्चिता गायत्री प्राणाग्नि
होत्रस्येत्यर्थः। स्वयं ज्योतिः प्राणाग्निहोत्र-
३१ देवता च शिरश्च सोऽहमिति। प्राणाग्निहोत्रे हं-
सस्य शिरस्त्वमुक्तम्। अथ च शिखेति। प्रा-
णाग्निहोत्रे सोऽहमित्यस्य शिखात्वं सूचितम्।
स्वयं च वर्मेति। शाके चैर्यत्वं सूचितम्। मन्त्रा-
णां व्याप्तिकथनेन व्यापकविशेषाः सूचिताः।
तेन च गुर्वादिवन्दनं कृत्वा क्रमेण करशुद्ध्यादि-
१३२ कं प्राणायामादिकं च कृत्वा न्यस्तव्यः। हंसा-
हूतिः सर्वशब्दार्थस्य परमात्मनः स्वशब्दा-
र्थ प्रत्यगात्मन्याह्वानमित्यर्थो हूति विद्यात्।
गतिं चेति। आत्मनः परमात्मनि गतिमित्य-

विवरणे

~~३७~~ र्थः। हृदयमन्त्रेण जीवात्मपरमात्मनोः परस्परमैक्यमुक्तमिति तात्पर्यमाह — स्वर्गात्मेति। अयमेवार्थ इत्यत्रोपपत्तिमाह —

३८, यत्र हूयेतेति, परमात्ममन्त्रस्य त्वं पदार्थपर्यन्तं तत्पदार्थमाह — सकृति, अहमिति मय्युदिते मनोऽस्य यत्रेति देहेन्द्रियादिभ्य उद्गते मयि शाम्भीमिणि परमात्मन्यस्य साधकस्य मनो यत्र वर्तेते साक्षि तया सोऽहं

~~३९~~ शब्दार्थ इत्यर्थः। वाक्यार्थमाह — तीव्रेति, सकृत्त्वः परिपूर्णः नित्यप्रकाशश्च तं रूपयतीति सकृन्नित्यप्रकाशरूपो मन्त्रः अजपायास्तत्पदार्थपर्यन्तत्वं पदार्थतामाह — अहमिति ।३९।

४० वाक्यार्थकथनं एवं होमाधिकरणाग्निशोधनार्थयोः परमात्मा अजपामन्त्रयोरर्थमभि-

सप्तमः पटलः

व्याग द्रव्यसंशोधनार्थस्य शक्तिबीजस्यार्थमाह — प्रतिमध्येति प्रतिमध्य संहृत्य गुणत्रय०व्याप्तं सकलं जगत् स्वगुणैः हकारादिरूपैः तांश्च हकारादीन् बिन्दौ गुणसाम्यात्मनि संहृत्य सर्वलोकाश्रयापरप्रकृत्यमृता मनागवस्थितः कवचमन्त्र इत्यर्थः। प्रणव ।४९॥
स्यामृतरूपद्रव्योत्पादकत्वेन विनियोगं वदन् नेत्रमन्त्रार्थमाह — औवैरिति। अप्वस्त्रमिति प्रतिहोममित्यर्थः। पञ्चाशन्म- ४५।
न्त्रैः प्रपञ्चयागक्रममाह — मातृकान्यासवदिति। समग्रहमण्डलत्रयादिहोमं सूचयति — अयमत्र क्रियाक्रमः। प्राणाग्निहोत्रप्रपञ्चयागयोः ऋष्यादिकं विन्यस्य शक्तिरूपमात्मानं ध्यात्वा अष्टाक्षरद्वयमष्टवारमावर्त्य

हयरौं ययरौं रयरौं वयरौं लयरौं इति मूलाधारत्रिकोणशक्ति बिन्दुमध्यप्राग्वारुणसौम्यदक्षिणदिग्गतकुण्डस्थाग्नीनुल्लास्य क्षाद्यकारान्तमुच्चरन् पादादिमस्तकान्तं व्याप्य स्वशरीरात्मकं सर्वं जगत् परमामृतेनैकीकृत्य ओं ह्रीं क्षं परंज्योतिषि जुहोमि सोहं हंसः स्वाहा। ओं ह्रीं कं परंज्योतिषि जुहोमि सोहं हंसः स्वाहा। ओं ह्रीं हं परंज्योतिषि जुहोमि सोहं हंसः स्वाहा। ओं ह्रीं सं परज्योतिषि जुहोमि सोहं हंसः। स्वाहा। इति मध्यादिकुण्डेषु हुत्वाकारमवलोकयेत्। पुनः प्रणवशक्तिबीजाभ्यां शरीरमुत्पाद्य शुद्धन्यासेन सकलीकृत्य क्षाद्यकारान्तव्यापकेन पूर्ववदमृतीकृत्य पुनः

सप्तमः पटलः

क्षं शं मं नं णं ञं ङं अः ऐं कं आकाशशब्दतन्मात्रवागात्मशान्त्यतीतनादतुरीयातीतानुग्रहसदाशिवेशानवासुदेवान् परंज्योतिषीत्यादि मध्ये ओं ह्रीं ठं वं भं धं ढं झं घं ञं लृं उं वायुस्पर्शतन्मात्रास्पर्शपाणिप्रकृति शान्तिबिन्दुतुरीयतिरोधानेश्वरतत्पुरुषसंकर्षणान् परंज्योतिषीत्यादि पूर्वकुण्डे ओं ह्रीं हं लं बं टं ङं जं गं औं लृं ईं तेजोरूपतन्मात्राचक्षुःपादाहङ्कारविद्यामकारसुषुप्तिसंहारकरुद्राघोरप्रद्युम्नान् परंज्योतिषीत्यादि पश्चिमे ओं ह्रीं सं रं फं थं ठं छं खं ओं ऋं इं अप्रसतन्मात्ररसनवायुमनःप्रतिष्ठोकारस्वप्नस्थितिविष्णुवामदेवानिरुद्धान् परंज्योतिषीत्यादि सौम्ये ओं ह्रीं षं यं पं तं टं चं कं एं

विवरणे

ॠं ओं पृथिवीगन्धतन्मात्रा घ्राणे परस्थंबुद्धिनिवृत्त्याकार जाग्रत्सृष्टि ब्रह्मसव्यो जात नाशयणान् परंज्योतिषीत्यादि दक्षिणे डरियों वरियों शरियों यरियों हरियोमित्यर्णेनैकीकृत्य पुनः पूर्ववदुत्पाद्य सबिन्दुकेन सकलीकृत्य पूर्ववदमृतीकृत्य ओं ह्रीं अं परंज्योतिषीत्यादिना हुत्वा पूर्ववदुत्पाद्य सबिसर्गेण सकलीकृत्यामृतीकृत्य ओं ह्रीं ह्वं परंज्योतिषीत्यारभ्याकारान्तं हुत्वा पूर्ववदुत्पाद्य सबिन्दुसर्गेण सकलीकृत्य नवग्रहन्यासमन्त्रैः विधिवद्धुत्वा पूर्वव~~द्धुत्वा~~दुत्पाद्य सकलन्यासेन सकलीकृत्यामृतीकृत्याग्न्यादिमण्डलत्रयन्यासमन्त्रैः विधिवद्धुत्वोत्पाद्य सकेशवादिन्यासेन सकलीकृत्यामृती-

सप्तमः पटलः

कृत्वाग्नीषोमन्याससमन्त्राभ्यां हुत्वोत्पाद्य
श्रीकण्ठादिन्यासेन सकलीकृत्यामृतीकृत्य
हंसन्यासमन्त्रेण हुत्वोत्पाद्य सशक्तिकम-
लमारन्यासेन सकलीकृत्य प्रपञ्चयागं कु-
र्यात्। ओं ह्रीं अं परज्योतिषि जुहोमि हंसः
सोऽहं स्वाहेत्यादिक्षकारान्तं वर्णस्थानेषु न्य-
सेन हुत्वा पूर्ववदुत्पाद्य समारकमलाशक्ति-
न्यासेन सकलीकृत्य सप्रणवहंसन्यासवत्
हुत्वा पूर्ववदुत्पाद्य स्वशक्तिन्यासेन सक-
लीकृत्य सोमादिमण्डलत्रयन्यासवत्कृत्वा
समुत्पाद्य सकमलान्यासेन सकलीकृत्या-
ग्नीषोमन्यासवद्धुत्वोत्पाद्य समारन्यासेन
सकलीकृत्य हंसन्यासवत्कृत्वा प्रणवेन
स्वात्मस्थो भवेदिति प्रपञ्चयागः॥ तं सप्तम- ८६।

विवरणे

ज्ञाकं प्रपञ्चयागमभिधायाज्ञाकं विदुषामयत्नसाध्यं प्रपञ्चयागमाह — पञ्चज्ञानेन्द्रियेति, वाचकवर्गस्येन्द्रियसंबन्धमभिधाय तद्द्वारेणापि वाच्यस्यापि व्यापक तत्त्वगणस्य तदाहुतिरिति॥

अथ होमप्रकारमाह — ताभिरिति। ताभिर्लिपिभिः सह तत्तदिन्द्रियगोचरं ज्ञानाग्नौ जुहुयादित्यन्वयः। आरात्तनं दूरमन्तिकं च अध्यात्ममधिदैवत देवं चेत्यर्थः। अयं होमप्रकारः सर्वसाक्षित्वेन स्वयं वा स्वयमवाच्यवाचकं ब्रह्म भूत्वा घटादिविषयदर्शनक्रमये स्वस्मादुत्पद्यमानस्य तत्त्वगणस्य स्वस्वस्मिन्नेव लयं दर्शनावसाने भावयेदिति। तत्राह — त∴ शिवतत्त्वं प्रमाताकार्यः। तं।

सप्तमः पटलः

परिणामिन्यपरशक्तिरित्यर्थः। तस्य परिणामस्सामरस्यमापन्नशक्तिः। द्वाकार तदुभीरूपिणी विमर्शप्रकाशाभ्यां वा शक्तिशिवतत्त्वभेदः। तदि~~[illegible]~~च्छाक्रियाज्ञानानि सदाशिवेश्वरविद्यातत्त्वानि तत्त्वद्विक्षेपे नदा(अना)च्छादने च मायातत्त्वम~~[illegible]~~वस्थितम्। कालस्तत्काले(लौ) नियतिः। तस्य देशादिनियमे कालादि किञ्चित्कर्तृत्वे अविद्या। किञ्चिद्भूले रागस्तु(क्तत) दपूर्णतायां ~~[illegible]~~पुरुषस्तु कृत्वाभिमानित्वे(अंहकृ) प्रकृतिः सुखदुःखादौ अहंकारादित्रयमहंकारनिश्चयसंकल्पादौ श्रोत्रादिकं शब्दविमर्शस्पर्शरूपणामर्शास्वादपरिमलेषु वागादिकं वचनादानगमनविसर्जना(गी)नन्देषु शब्दाकाशादिकं तु सर्वविषयेषु प्रसिद्धमेव।४८॥ अन

मन्त्रके समन्त्रके च कनिते होमे पृथक् ब्रह्मार्पणं न कर्तव्यमित्याह — ब्रह्माग्निभिरिति ॥४९॥ एवं प्राणाग्निहोत्रप्रपञ्चयागाभ्यां शुद्धस्य सकलीकरणन्यासेनात्मसात्कृतदेवताविग्रहस्यैव जपादावधिकार इत्याह — एवं वर्णैरिति । तेजस्स्वरूपी स्वयं भूत्वेति सकलीकरणन्यासेन चतुर्नवतिमन्त्रात्मकदेवताविग्रहो भूत्वेत्यर्थः । अयं न्यासक्रमः । प्रपञ्चयागानन्तरमपरिच्छिन्ने परे तेजसि प्रणव-

वर्त्त

शक्तिभ्यां व्यापयन् अपरं जीवात्मकं तेजः सञ्चिन्त्य ताभ्यामेव सुषुम्नां कारणशक्तिकवलीकृतजीवां स्मृत्वा तदग्रे ताभ्यामेव सहस्रदलं कारणात्मकं पद्मं प्रतिपद्य तस्मात् ताभ्यामेव वर्णात्मकममृतपिण्डं सुषु-

सप्तमः पटलः

प्राक्जननक्रमेणोत्थाप्य विसर्गान्वितमाद्यकाभ्यासेन सकलीकृत्य तदाधारद्रव्यमध्येषु दशाद्वादशषोडशप्रणवजपेन तावद्दलानि पद्मानि सञ्चिन्त्य दशदलेषु व्यापककला न्यसित्वा कर्णिकायां मं वह्निमण्डलाय दशधर्मकलात्मने नमः इत्यादि मन्त्रं जातवेदसइत्यृचं च जपित्वा तत्रैव व्यापककलानामग्नेश्च प्राणप्रतिष्ठां कुर्य्यात् । पुनः द्वादशदलेषु स्पर्शकला न्यसित्वा कर्णिकायां मं सूर्यमण्डलायेत्यादि तत्सवितुरिति ऋचं च जपित्वा तत्रैव स्पर्शकलानां सूर्यस्य च प्राणप्रतिष्ठां विधाय षोडशदलेषु स्वरकला न्यसित्वा कर्णिकायां मं सोममण्डलायेति मन्त्रं त्र्यम्बकमिति ऋचं च जपित्वा तत्रैव स्वरकला-

*ः दशकं पादयोर्न्यस्य लं पृथिवी गन्धतन्मात्रेत्यादि मन्त्रेन पाद * * *
पञ्चकेन न्यसेत् । अं ब्रह्मणे नमः लं पृथिव्यै नमः इत्यादि

नां सोमस्य च प्राणप्रतिष्ठां कृत्वा पुनः पञ्चाशत्कला
न्यसेत् । कं सृष्ट्यै नमः । इत्यादि* मन्त्रैर्वा
षष्ठपटलोक्तैः वीथ यथास्थानं न्यसेत् । एवमे-
वोकारादिकलान्यासेष्वपि द्विधा पञ्चक-
न्यासो द्रष्टव्यः । पुनः पादयोः हंसः शुचिषदि-
त्यृचं च न्यसित्वा तत्रैवोकारकलानां ब्रह्मणश्च प्रा-
णप्रतिष्ठां कुर्यात् । पुनः टं जरायै नम इत्याद्या उका-
रकला हस्तयोः न्यसित्वा पञ्चकं विन्यस्य
हस्तयोः प्रतद्विष्णुरित्यृचं जपित्वा तत्रैव
उकारकलानां विष्णोश्च प्राणप्रतिष्ठां कुर्या-
त् । पुनः पं तीक्ष्णायै नम इत्यादिमकारकला मूलाण्डगु-
ह्यनाभिहृत्कण्ठपार्श्वद्वयपृष्ठककुत्सु न्यसि-
त्वा तेजःपञ्चकं विन्यस्य हृदये त्र्यम्बकं वि-
न्यस्य तत्रैव मकारकलानां रुद्रस्य

सप्तमः पटलः

च प्राणप्रतिष्ठां कुर्यात् । पुनः षं पीतायै नम इत्यादि बिन्दुकलागणस्य नेत्रेषु नलाट न्यसित्वा वायुपञ्चकं विन्यस्य भ्रूमध्ये तत्सवितुरिति सूत्रं न्यसित्वा तत्रैव बिन्दुकलानामीश्वरस्य च प्राणप्रतिष्ठां कुर्यात् । पुनः अं निवृत्त्यै नमः इत्यादि नाम् द कला विसर्गाद्यकारान्तस्थानेषु विन्यस्याकाशपञ्चकं न्यसित्वा शिरसि विष्णुर्योनिमित्यृचं च विन्यस्य तत्र नादकलानां सदाशिवस्य च प्राणप्रतिष्ठां कुर्यात् । पुनर्जीवकलाः सकला मातृकान्यासवत् विन्यस्य हृदये जीवकलानां प्राणप्रतिष्ठां विधाय हृदये परमात्मकला दशप्राणवल्लक्षणा न्यसित्वा तत्रैव तासां प्राणप्रतिष्ठां कुर्यात् । पाशांकुशत्र्यक्षरं मूलमन्त्राभ्यां स्वेदं भेद सकलीकरणं

कर्तव्यम्। पुनस्त्रिवारं मातृका न्यसित्वा इष्टमन्त्रान्यासादिकं कुर्यादिति सकलीकरणप्रकारः। ।५०।। शुद्धादिन्यासानां प्राणाग्निहोत्रप्रपञ्चयागशेषत्वेन तत्फलेन न फलवत्त्वमभिधाय स्वातन्त्र्येणापि फलसंबन्धमाह — शुद्धन्यासापीति। ।५१।। समन्त्रकप्रपञ्चयागस्य विशेषतो भुक्तिमुक्तिहेतुत्वमाह — प्रपञ्चयागस्त्विति। विपत्प्रपञ्चयापनं विज्ञापनं मोक्ष इत्यर्थः। संसारविशेषयापनं निर्वाहः भुक्तिरित्यर्थः। अमन्त्रकप्रपञ्चयागस्यापि तत्त्वेन केवलमोक्षहेतुत्वमाह — परश्चेति। परः अन्यः प्रपञ्चयागः। अमन्त्रकइत्यर्थः। ।५२।। ।५३।। प्रोक्तक्रमेणेति। षष्ठपटलोक्तक्रमेणेत्यर्थः। मन्त्रितमिति बीजेन चरुं मूलहो-

सप्तमः पटलः

मं सूचयति। ।५४॥५५॥ लक्षसंख्यं मन्त्रीति, सिद्धिकाम
स्य श्रीबीजयोगं मुक्तिकामस्य प्रणवपुटितं तल
च सूचयति। ।५६॥ — प्रजुहोतु मन्त्रीति, नृसिंह
बीजयोगः सूचितः। ।५७॥ होमविधिमाह — द्वाद
शसहस्रमिति। ।५८॥ मतिमान् वस्तुभिरिति। दशां
शेनाभिषेकं पञ्चब्रह्मभिर्योजितःपञ्चगव्यः
प्रा
प्रक्षाशनं च प्रातःकाले मध्याह्ने हृदयमा
प्राजले स्थित्वा सूर्यमन्त्रजपः रात्रौ तिलहो
मश्च सूचितः। ।५९॥ क्रमशो यथाविदित्यमृत
ध्यानं नृसिंहयोगश्च सूचितः। ।६०॥ मन्त्रीतिश्री
योगः। ।६१॥६२॥ सद्रवैरिति। तत्तत्कर्मयोग्यो व्यञ्जन
योगउक्तः। ।६३॥६४॥ सप्तरात्रमित्यष्टम्यादिचतुर्दश्य
न्तामित्यर्थः। ।६५-६७॥ एकादशार्धकर्णिकामिति। ए
व
का प्रध्याना दक्षिणा सा दशार्धकर्णिकां प

रक्ताञ्जनस्य द्व्यादिति, इत्यन्वयः। पटलस्य सप्तमो भागः कर्णिका ॥ ६८॥ ६९॥

इति प्रपञ्चसारविवरणे

॥सप्तमः पटलः॥

॥अथ अष्टमः पटलः॥

प्रपञ्चयागात् पूर्वमेव कर्तव्यमपि प्राणाग्निहोत्रं क्रमगोपनार्थमनन्तरमाह— अथेति। विदुषामिति॥ शुक्लसबिन्द्वादिमातृकाभेदसंयोगक्रमविदामित्यर्थः। मन्त्री विद्वोरित्याध्याहारशक्तिकमलासनाय नम इति स्वासनपूजनं सूचितम् ।१॥ जठरमध्य इति। अशनकाले कुण्डानां स्थानमुक्तम्। नाभेरध्य इति।

अष्टमः पटलः

योगकाले नाभिलिङ्गं तस्याङ्कुरकाख्यस्यार्थः। ज्वलद्वह्निभिरिति। स्वरोमित्यादिमन्त्रैरभिव्यक्तनमुक्तम्। अनारतमिति। अनेन प्राणेन क्रियाविशेषात्मना आरतमित्यर्थः। स्वमो जीवस्य अस्यां च परस्य स्थानत्वात्स्वम कुण्डमित्युक्तम्। कुण्डनामकथनमहानकाले मन्त्रेषु तद्योगार्थम्॥२॥३॥ पञ्चाशद्वर्णैः पञ्चकुण्डेषु क्रमेण होमं दर्शयति——

त्रिरूपादिति। अस्कन्ने हेतुः सकलप्रभेति। तत्र हेतुः मूलप्रकृत्यात्मनइति अमृतमयीमानन्दमयीमित्यर्थः। ज्योतीरुचां स्पृष्टामित्यन्वयः। कुण्डली स्वप्रकाशाभिव्यक्तामित्यर्थः। श्रिया तुष्ट्यादित्यन्वयः। लिति तृतीयहोमार्थमकाण्डेनयोषं सूचयति —— कल्पान्ता-

ग्निः मूलाधारस्थोऽग्निः । ।४॥ नवग्रहहोमं प-
ञ्चमं स्वमन्त्रोद्धारं दर्शयति — सायाद्येति,
व्यापक इत्यादिपदैः मण्डलत्रयहोमः । षष्ठं
सूचितं । सुमतिभिरिति । परमानन्द तत्त्व रूप -
विग्रहैरित्यर्थः । ।५॥६॥ सम्यगिवद्यतीत्य समाभिः
पूर्वोक्तक्रमः सूचितः । मन्त्रिण इति मूलमन्त्रा-
दिप्रयोगः । तैस्तैरित्येतैर्द्विगुणफलं ।७॥ दशाभि-
र्दशाभिर्वर्णैस्सह भूतमन्त्रैः होमं द्वितीयं
दर्शयति — अन्त्यशावर्गान्त्याविति ॥८-१०॥ व्योमे-
त्यादिना भूतमन्त्रोद्धारः कृतः । अखिलम-
विरतामिति । पादाभ्यां शब्दविशेषान्तद-
नुगतं सामान्यं चोक्तम् । अविरतं निरन्त-
रमनुगतमित्यर्थः । उभयरुचिरुचिरैरि-
ति । चिदानन्दात्मकल्पकत्वाग्न्यर्कप्र-

काशामिशिरोऽग्निवेत्यर्थः। उभयरुचिरुचिरु-
चिरे ब्वक्षरौ वारिति पद्याभ्यां सप्तमाष्टमहो-
॥११२॥
मौ सूचितौ। मन्त्री इत्यवशिष्टा होममन्त्राः
॥१११॥
सूचिताः। प्राणाग्निहोत्रे प्रणवं शात्चायनन्-
तरं परमात्ममन्त्रानभिध्यायाल्पपा स्वाहाका-
रैः प्रत्येकं व्याविव्याह — सकृदेति, मध्यमे-
त्यङ्गुष्ठीनितया मन्त्रार्थस्मरणसमर्थ इत्यर्थः।
विन्यस्य तावज्जेति, प्रपञ्चयागं च शताथ्येवा-
रं कुर्वेत्यर्थः। सूत्रमात्राकृतिरिति, सकलनि-
ष्कलध्यानमुक्तम्। नित्यतनुरिति निष्कल-
ध्यानम्। स्थूलध्यानं तु पूर्वमेवोक्तम्। स्वयं
च धर्मेति ध्यातस्यैव फलत्वात् फलमप्य-
॥११२॥
नेनैवोक्तम्। अथ स्थूलादिध्यानं समुच्चित्य
वदन् सफलं प्राणाग्निहोत्रमुपसंहरति —

कल्मादित्यमुखइति विषवादिक इत्यन्तेन,
स्थूलं रूपमुक्तम्। तेजो दूयो यत्प्र भइत्यन्ते -
न सूक्ष्मम्। अवशिष्टेन परिमितिविभागउक्तः ॥१३॥
प्राणाग्निहोत्रकर्तृणामन्नानकाले प्राणाग्निहो -
त्राधिकार इत्याह। नुदिनामिति, मन्त्रैर्विधा -
मित्यनेन प्राणाग्निहुतहो षभूताः केचन मन्त्राः
सूचिताः अयमत्र होमक्रमः। स्वेष्टदेवस्य
सकलीकरणं विधाय तं ध्यात्वा ओं श्रद्धा -
यां प्राणे निविष्टोऽमृतं जुहोमीत्यारभ्य ब्रह्म -
यां ब्रह्मणि मात्मा निविष्टोऽमृतं जुहोमीत्यन्तैः
मन्त्रैः दक्षिणोत्तरपश्चिमपूर्वमध्यकुण्डे जु
आग्नीन्तुं ज्वाल्य स्वप्राणे त्रिपिपचे ह्यविरा -
दाय्यान्नं प्राणमन्नमपानमाहुः। अन्नं मृत्युं
तमु जीवातुमाहुः। अन्नं ब्रह्मणो जरसं च -

अष्टमः पटलः

दन्ति। अन्नमाहुः प्रजननं प्रजानामित्युपस्थाय, सपद्यप्रणवगायत्र्या त्रिवारमभिमन्त्र्य विमुच्चामि विध्यमे पाप्मानमिति उक्तप्रक्षालनं निधाय परिषिच्योपस्पृश्य। ओं तद्ब्रह्म। ओं तद्वायुः। ओं तदात्मा। ओं तत्सत्यं। ओं तत्सर्वं। ओं तत्पुरोर्नमः। ओं अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु। त्वं यज्ञस्त्वं वषट्कारस्त्वं विष्णुः पुरुषः परः। त्वमापः आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरों स्वरोम्। अमृतोपस्तरणमसीत्याचम्य चित्तिः स्रुक् चित्तमाज्यं, वाग्वेदिः, आधीतं बर्हिः। केतो अग्निः। विज्ञातमग्निः, वाक्पतिर्होता, मन उपवक्ता। प्राणो हविः, सामाध्वर्युः वाचस्पते विधे नामन् विधेमते नाम विधे त्वमस्माकं नाम।

ध्या

वाचस्पतिश्चलोनं पिबत्वात्मा ब्रह्मणं ध्यात् स्वाहेति जपित्वा ओं गार्हपत्ये प्राणे हिरण्यवर्णाः शुचयः पावका अग्निं विहृत्यात्मानमुपचर्योर्ध्वं गच्छन्तु। आज्ञायां प्राणे निविष्टोऽमृतं जुहोमि। शिवो मा विशाप्रदाहाय। प्राणात्मने नारायणाय मह्यं महं स्वाहेति दक्षिणाग्नौ हुत्वा अन्वाहार्ये अपाने गगनवर्णाः शुचयः पावका अग्निं विहृत्यात्मानमुपचर्योर्ध्वो गच्छन्तु। आज्ञायामपाने निविष्टोऽमृतं जुहोमि शिवो मा विशाप्रदाहाय अपानात्मने नारायणाय महं मह्यं स्वाहेत्युत्तरे हुत्वा ओमाहवनीये व्याने रक्तवर्णाः शुचयः पावका अग्निं विहृत्यात्मानमुपचर्ये तिर्यक् गच्छन्तु। आज्ञायां व्याने निकृष्टोऽमृतं जु-

होमि। शिवो मा विश्वाप्रदाहाय व्यानात्मने नारायणाय मह्यं मह्यं स्वाहा इति पश्चिमे हुत्वा ओं सन्ध्ये उदाने कृष्णवर्णाः शुचयः पावका अग्निं विद्ध्यात्मानमुपचर्यो ध्वो धियस्तिर्यक् गच्छतु अब्जायामुदाने निविष्टोऽमृतं जुहोमि शिवो मा विशाप्रदाहाय, उदानात्मने नारायणाय मह्यं मह्यं स्वाहा। ओं आवसथीये समाने सुप्रभावर्णाः शुचयः पावका अग्निं विद्ध्यात्मानमुपचर्ये समं गच्छतु। अब्जायां समाने निविष्टोऽमृतं जुहोमि। शिवो मा विशाप्रदाहाय समानात्मने नारायणाय मह्यं मह्यं स्वाहेति मध्ये हुत्वाग्नीन् [illegible] ओं गार्हपत्यान्वाहार्य्याहवनीयसभ्यावसथीयेषु प्राणापानव्यानोदानसमानेषु हिरण्या गगना

रक्ता कृष्णा सुप्रभा वर्णाः शुचयः पावका अग्नि
विद्र्त्यात्मानमुपचर्यो धर्मो धान्तिर्येकसमं
तु|अ॰
गच्छत्वहं वैश्वानरो भूत्वा जुहोम्यन्नं च-
तुर्विधं पचामि। श्रद्धायां ब्रह्मणि म आत्मा
निविष्टोऽमृतं जुहोमि। शिवो मा विशाप्रदा-
हाय क्षेत्रज्ञात्मने नारायणाय मह्यं मह्यं
स्वाहेति हुत्वा पूर्णं तूष्णीं कृत्वा अद्भिः पिधा-
य गण्डूषादिकं कृत्वाचम्य पृथ्वीरसि मृत्युच
प्र
मे पाप्मानमिति हस्तक्षालनं कृत्वा। प्राणानां
ग्रन्थिरसि रुद्रो मा विशान्तकस्तेनान्नेनाप्या-
यस्व। अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः।
ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्।
इति दक्षिणपादाङ्गुष्ठे जलधारामानिच्य
उदूयं चित्रमित्यादिना पातिष्ठेदिति॥ १४-२१॥

अष्टमः पटलः

अथ प्रणवेनामृतमाप्लावयेदिति आह— आरभ्येत्यादिना ॥२१-२२॥ — मातृकया व्यमृतं स्रावणीयमित्याह — सम्भिन्त्येति, ततः शक्त्यां प्राणे निविश्यामृतं हुत्वा प्राणमन्त्रेनाप्यायस्वेत्यारभ्य शक्त्यां ब्रह्मणि समात्मानि विश्यामृतं हुत्वा ब्रह्मात्माणमन्त्रेनाप्यायस्वेत्यन्तैराप्याय्याङ्गर्ष्यादिन्यासिवोपसंहरेत् ॥२३॥ शार्ङ्गी ब्रह्माणं प्रत्याह — इति तवेति, ॥२४॥ सर्वान् प्रत्याह — इति जगदनुकम्पीति। अक्षमालाया मध्यस्थः, क्षकारो मेरुत्वेन न [illegible]ः। अतस्तेन मन्त्रयोगो न कार्यः। ॥२५॥२६॥ सरस्वती देवत्यां लिपिमभिध्याय सरस्वतीदैवतं मन्त्रान्तरमाह — मध्येऽवव्यक्षारयोरिति, ॥२७॥ अङ्गानि षट्क्रमान्मन्त्रीति। वद हृदयाय नमः। वद

शिरसे स्वाहा। चाक्रु शिखायै वषट् मादिनि,
कवचाय हुम्। स्वाहा नेत्रत्रयाय वौषट्।
स्वमन्ते नास्त्रामित्यङ्गेषु मन्त्रयोगः सूचितः।
ऐं बीजं स्वाहा शक्तिः। अत्र वचनस्यां महेश्वरी-
मिति मातृकायामिव पीठमूर्तिमन्त्रादिक्लु-
॥२८-३३॥
त्कम्। न्यासान्वितं निशितधीरिति वाक्य-
यादङ्गं न्यसेत्। जपेदपानमपि तथैव कु-
तद्वत् ॥३४॥
र्यात्। ध्यानं च कुर्यादित्यर्थः। अंगानि षट्
न्यय
क्रमाद्रान्नेति। ऐं ह्रां हृदयाय नमः। इत्यादि
क्रमेणेत्यर्थः। ऐं बीजं, ह्रीं शक्तिः। ऋष्यादि-
॥३५-४०॥ द्य
कं पूर्ववत्। हंसान्स्रुवाणीति वाग्भवे हंस-
योग उक्तः। विद्यावीणेति विद्यापुस्तकं।
॥४१-४४॥
संयतेन्द्रियो मन्त्रीति बालायोग उक्तः। मन्त्री-
नां मज
णेन जपन्निति दुरितमोक्षे नृसिंहस्य लक्ष्म्याः

१४५॥

तद्बीजस्य यत्नासेऽप्यपाया योगः सूचितः। म-न्त्रा कूर्यन्नेति। मन्त्रान्तरेष्वपि सारस्वतेषु स्तो-त्रादिविनियोगार्थः मन्त्रितमिति प्रतिश्लोकं वा-वाङ्मय ग्भवयोगः सूचितः। वाक्सूक्तादिजपो वा कुर्यादिति ध्यानम्॥ ८६-९०॥

इति प्रपञ्चसारविवरणे
॥अष्टमः पटलः॥

॥अथ नवमः पटलः॥

एवं ज्ञानशक्तिप्रधानान्मन्त्रानभि-धाय क्रियाशक्तिप्रधानांस्त्रैपुरान्मन्त्रान् प्रस्तौति — अथेति। बीजत्रयस्वरूपेण त्रिभेदः। त्रिप्रभे-दत्वं त्रिधात्मकारत्वं तु तद्गतबीजबिन्द्वादि-

भिः। अथवा सुष्ठ्वा दुष्ठ्व भावाभिव्यक्तिरुच्चारणं यस्याः सा तथोक्ता। तत्र केवला बिन्द्वन्ता मकारान्ता विसर्गान्ता च सुवर्णा। बिन्दुविसर्गान्ता दुर्वर्णा। कूटत्रैपुरस्यापृथग्गतौ वा सुदुर्वर्णौ मन्त्राविति। कूटाकूटपक्षयोरपि पञ्च पञ्चप्रकारौ सिद्धौ। पुनश्च —

आदिमादिमनादिं च मध्यं मध्यममध्यमम्।
अन्त्यमन्त्यमनन्त्यं च त्रिपुरा बीप्रासिद्धिदा।

इति न्यायेन कूटपक्षेऽकूटपक्षेऽपि त्रिधाप्रकारत्वं सिद्धम्। सर्वेषां त्रिबीजात्मकत्वेन त्रिप्रकारत्वं च सिद्धम्। विशिष्टामिति। विद्याभेदमाह — अविशिष्टा शुद्धा बाला विशिष्टा हकारादिव्यञ्जनविशिष्टा। स भेदानामेव तेषां मन्त्राणां कूटाकूटत्वं सुदुर्वर्णत्वम्।

आदिमादिमनादि चेत्यादि समानमिति सर्वेषां त्रिधाप्रकारत्वं च त्रिप्रकारत्वं च सिद्धम्। पारायणभेदेन चानन्तप्रकारत्वम्। पुनरपि मन्त्रान्तरयोगनिमित्तं भेदमाह — त्रिपुराभिध्यानामिति। त्रिपुराः सत्त्वादिशरीराः त्रिदेवादयः तेषामभिध्यानरूपान्तत्तन्मन्त्रसंयोगेनेत्यर्थः। प्रकारान्तरेण त्रयस्त्रिधाप्रकारत्वं त्रिप्रकारत्वं च सिद्धम्। पारायणभेदेन चानन्तप्रकारत्वमाद्यास्या विद्यायाः या त्रिभेदापीति। कादिहान्ताद्याधारत्वेन त्रयस्त्रिधाप्रकारेत्यर्थः। ।२।। त्रिमूर्तिमन्त्रेषु विन्यासंयोग उपपत्तिमाह — त्रिमूर्तीति। पुरैव त्रयी- त्रि मयत्वं सच्चिदानन्दरूपत्वं गुणसाम्यात्मकत्वं वा समर्थ्यं चन्द्रैरिति। सकारस्यापि-

णी शक्तिर्यस्मिन् हकारे शिवे रमते स हकारः कारः स्वरः। मात्री ईकारः अर्धचन्द्रो बिन्दुरिति निष्कलविद्योद्धारप्रकारः। ॥२॥३॥ व्यस्तविनियोगोक्तिर्वागास्त्रर्येति गैस्म, धर्मेति समस्तविनियोगोक्तिः। आदिनाथ दैवी गायत्री त्रिपुराभैरव्यः ऋष्यादयः वाग्भवकामराजौ बीजशक्ती शाक्तं वा शक्तिः। ।४॥ नाभेराचरणमिति पीठमूर्तिन्यासावाहनादि कराङ्गुलिन्यासव्यापकलिपिश्रीकण्ठादिन्यासानन्तरमित्यर्थः। तत्र पीठन्यासे आधारशक्तिमूलप्रकृत्यनन्त र पृथिव्यमृतार्णवरत्नद्वीपरत्नमण्डपकल्पकतरुश्वेतछत्राणि हृदि विन्यस्य धर्मादिकं वरदान्तं दक्षिणकर्णांसपार्श्वकटिपादेषु धर्मा-

नवमः पटलः

ह्रिं वामकर्णादिषु इच्छाज्ञानाक्रियाकामा कामिनी कामदायिनीरिति प्रियानन्ता मनोन्मन्यो नवशक्तयः नवशक्तिन्यासानन्तरं नवयोनिन्यासनाय नवइति व्या-
पक
प्व नवयोनिन्यासमाचरेत्। मूलबीजैः श्रोत्रद्वयचिबुकेषु प्रथमः पर्यायः। शंखद्वयास्येषु द्वितीयः। द्वौ दृग्द्वयघ्राणेषु तृतीयः। अंसद्वयहृत्सु चतुर्थः कोर्परद्वयकुक्षिषु पञ्चमः जानुद्वयाण्डुषु षष्ठः। पदद्वयगुह्येषु सप्तमः। पार्श्वद्वयहृत्स्वष्टमः। स्तनद्वयकण्ठेषु नवमः। इति पुनर्द्वादशशक्तिन्यासः। ह्रें वामायै नमः। ज्येष्ठायै नमः। रौद्र्यै नमः। अंबिकायै नमः। ह्र त्रिकोणरेखाग्रे मध्ये च इच्छायै ज्ञानायै क्रियायै कुब्जिकायै कोण-

बिन्दरणे

वह्नि घु ध्यै

बाह्येषु मध्ये नाभिकोण्ये निषध्ये कृत ं सर्वानन्दाये कोणत्रितये मध्ये चेति पुनश्चतुष्पीठन्यासः। ऐं क्लीं सौः ओड्याणपीठाय नमः। ऐं जालंधरपीठाय नमः। क्लीं पूर्णगिरिपीठाय नमः। सौः कामरूपपीठाय नमः। इति शिरोललाटहृदयगुह्येषु पीठन्यासः। ऐं परायै अपरायै ऐं परापरायै सौः ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः। इति पीठ समष्टिमन्त्रेण व्याप्य पादुकासप्तकं न्यसेत्। श्रीपादुकाभ्यो नम इति।

ऐं अप्रमे अज्ञानानन्ददीपिके ओंहकारभावां पूजयामि नमः। ऐं परायै श्रीगुरुपादुकापङ्क्त्यै नमः। क्लीं अपरायै श्रीगुरुपादुकापङ्क्त्यै नमः। सौः परापरायै श्रीगुरुपादुकापङ्क्त्यै नमः। ऐं ह्रीं श्रीं अनन्तनाथदेवश्री

नवमः पटलः

अनन्तनाथश्रीदेवि श्रीगुरुपादुकाभ्यो नमः। एवमेव क्लीं श्री अवतारनाथदेवश्री अवतारनाथदेवि श्रीपादुकाभ्यो नमः। सौः श्रीसिद्धनाथदेवि श्रीत्रिपादुकेभ्यो नमः इति त्रिरश्मि ऐं क्लीं ह्सौः इति पुरा भैरवीमूर्त्तये नमः॥

॥ इति मूर्तिन्यासः॥

ततः आ

तत्रावाहनादिकं। ततः करन्यासाङ्गुलिन्यासौ तत्राङ्गुलिन्यासे मध्यबीजस्य ह्रकारेण बिन्दुसकह्रयुतैरीशानादिमूर्तिभिः सहितैरङ्गुष्ठादिषु न्यसेत्। ह्रौं ईशानमनोभवाङ्गुष्ठाभ्यां नमः। ह्रें तत्पुरुषमकरध्वज तर्जनीभ्यां नमः। ह्रुं अघोरकुमारकन्दर्पमध्यमाभ्यां नमः। ह्रीं वामदेवमन्म-

ध्यानामिकाभ्यां नमः। ह्रूं सर्वोन्मत्तकामदेवकनिष्ठिकाभ्यां नमः। पुनः षडङ्गेन सह वाग्भवमध्यदीर्घेणाङ्गुलि न्यसित्वा बाणपञ्चकं न्यसेत्। द्रां शोषण बाणाङ्गुष्ठाभ्यां नमः। एवमेव द्रीं मोहन। क्लीं सन्दीपन। ब्लूं तापन। सः मादनबाणकनिष्ठिकाभ्यां नमः। इति बाणान् न्यसित्वा मूलेन देहे त्रिधा व्याप्य मूलपुटितमातृकां न्यसित्वा श्रीकण्ठादिन्यासं कुर्यात्। ॥२६॥ वाग्भवेन पुनरिति। मूलबीजमध्यमबीजयोर्योनन्तरमित्यर्थः। ह्स्रैं हसकल ह्स्रां ह्स्रैं हृदयाय नमः। हसकल ह्रीं हसकलह्रीं ह्स्रैं शिरसे स्वाहा। ह्स्रैं हसकलह्रूं ह्स्रैं शिखायै वषट्। ह्स्रैं हसकल ह्स्रैं कवचाय हुं हसकलह्रीं हसकल ह्रौं ह्स्रैं

नेत्रत्रयाय वौषट्। ह्स्रौः हसकलह्रं हसैं अस्त्राय फट्। पुनरुक्तिः पुनर्ग्रहणम्। चशब्देन करन्यासः बाणादिन्यासाः सूचिताः। विशदवीरिति, वशाद्यष्टनुभूताक्षरतत्रिपञ्चनवावृत्यमृते ऽथ वर्गादिरत्यादि मूर्द्धेङ् बाणस्तुभगा मात्रादि भूषणन्यासाः सूचिताः। तत्र मूर्ध्ये ध्यानहृत्सु मूलवर्णन्यासः। ह्स्रैं आत्मतत्वेश्वर्यै त्रिपुराभैरव्यै नमः। हसकलह्रीं विद्यातत्वेश्वर्यै त्रिपुराभैरव्यै नमः। ह्स्रौः शिवतत्वेश्वर्यै त्रिपुराभैरव्यै नमः। समस्तान्ते सर्वतत्वेश्वर्यै त्रिपुराभैरव्यै नमः। नाभ्याधारन्यान्तं गुह्यादि भ्रूमध्यान्तं मूलाधारादिमस्तकान्तं पादादिमस्तकान्तं चतंत्वन्यासः। पादजानुगुह्यनाभिहृत्कण्ठा-

न्धभ्रूमस्तकेषु त्र्यावृत्तिन्यासः। मूर्धगुह्यहृत्सु दक्षिणवामोर्ध्वनेत्रेषु कर्णद्वयास्येषु अंसद्वयपृष्ठेषु कोर्पर द्वयनाभिषु पञ्चावृत्तिन्यासः। नवावृत्तिन्यासो नवयोनिन्यासवत्। ह्स्रौः अमृतेश्वर्यै नमः। +मध्यमान्ते योगेश्वर्यै नमः। ह्स्रैं विश्वयोन्यै नमः। भ्रूमध्यहृदयमूलाधारेषु इत्यमृतेश्वर्यादिन्यासः। ह्स्रैं रत्यै नमः। मध्यमान्ते प्रीत्यै नमः। ह्स्रौः मनोभवायै नमः। इति मूलाधारादिषु रत्यादिन्यासः। मूर्तय ईशानमनोभवाद्याः मूर्धास्यहृद्गुह्यपाद नामभिः ऊर्ध्वप्राग्दक्षिणउत्तरपश्चिम वक्त्रनामभिश्च संबोध्य तेष्वेव न्यस्तव्याः। ह्स्रौं ईशानमनोभवमूर्ध्ने नमः। ह्स्रौं ईशानमनोभवाय्यो-

नवमः पटलः

ईशानमनोभवादिकेवलो नाम

ग्रहाः
ध्येयकाम्य नमः। इत्यादि प्रयोगक्रमः। पुनरङ्गा-
नि विन्यस्य मूर्तिन्यासवत् बाणन्यासं वि-
ततः
धाय सुभगादिन्यासं ललाट भ्रूमध्याद्यष्टा-
ध्येषु ऐं क्लीं ब्लूं स्त्रीं इति बीजैः सह वि-
लौ
न्यस्य मूलाधाराद्यष्टाधारेषु आं क्षामादि
ला
दीर्घयुता ब्राह्मण्याद्या असितांगादि ह्रस्वयुता
भैरवैः सह विन्यस्य शिरसि मूलमन्त्रं न्य-
स्येवा न्याप्याङ्गुष्ठादिकं विन्यस्य भूषण-
युता
न्यासं विध्यामात्मानं नामित्युक्त प्रकारेण वि-
१७॥
शाद्यर्थ्यो द्व्योर्विरित्यर्थः। शिरोललाट भ्रूकर्ण
ण्ड
द्वयाक्षि द्वय नासा द्वय गण्ड द्वयोष्ठ द्वयद-
कर्ण
न्तद्वयास्येषु स्कन्धाः गल कण्ठ पार्श्व द्वय स्तन
पाद
द्वय बाहु द्वय कूर्पर द्वय पाणितल तलपृष्ठ ना-
स्फिक्
भि गुह्योरु द्वय जानु द्वय जङ्घाद्वय पादतल

द्वयपादांगुष्ठद्वयेषु कटिरान्तं काञ्चीग्रैवेयकटकद्वन्द्वकुण्डलद्वयमौलिषु वलक्षाक्षलक्षणान्यस्मैरिति भूषणान्यासन्॰। असृक्पंकराजन्मुण्डस्रृन्मण्डिताङ्गीमिति। कुंकुमपंकवच्छोभमानाभिः मुण्डस्रग्भिः उत्तमाङ्गस्वपाभिः स्रग्भिः शक्तिव्यापिनी [illegible] रसनदनीभिर्मण्डितशरीरारिति परावरध्यानकथनमेतत् ।xx

अथवा असृक् अंकारस्पृष्टापरः तस्य पंकः सान्द्रीभावः आभासरूपत्वम्॰। तेन राजन्ती मुण्डा कुण्डलिनी तस्याः स्रग्वद्विच्छिन्नतया वर्तमानाः शक्तिभेदा मुण्डस्रजः तैरलंकृतशरीरामित्यर्थः। यथाश्रुतो वार्थः। तस्मिन्पक्षे आत्मात्मत्वेनैव परादिरूपकथनं द्रष्टव्यम्। निष्कीलपञ्चकूटे पाशांकुशापु-

नवमः पटलः

स्तकाद्यास्त्रधरा वा देवी ध्येया। षट्कूटा-
दिषु पाशांकुशशूलकपालधरा वा। ।८॥ स्वसंप्रदाया-
दिति। वैरिकादिति अर्थः। परप्रकाशान-
न्दनाथश्रीपादुकां पूजयामि। तथा परविमर्शा-
नन्द परमशिवानन्द कामेश्वर्यम्बाश्रीपादुकां।
मोक्षानन्द कामानन्दामृतानन्दा दिव्यौघः ई-
शः ततपुरुषः अघोरः वामः सद्यानन्दाः सिद्धौघः उ-
न्मोन्मनानन्द परमानन्द सर्वेक्षाराहानन्द स्व-
च्छन्दा सिद्धगोविन्दशंकरानन्दाः स्व-
गुरुत्रयं च मानवौघः। इत्ययं वैरिकसंप्र-
दायक्रमः। सुनियत इति। ब्रह्मचर्यादिमा-
निलब्धाः। तत्त्वानि नवत्र्यं च तत्त्वार्थं षट्त्रिं-
शदित्यर्थः। अनेन शुक्लादि चतुष्कूटान्तज-
त्वपरंपरयोक्ता तत्वलक्षणा वक्षीति। पञ्च-

कूटस्य तत्वार्धेक्षणावधिरिति। षट्कूटाद्यैरित्यवगन्तव्यम्। चतुष्कूटान्तस्य प्रत्येकैर्होमः। परमकुमारिन्यैः। अपिशब्देन सर्वेत्रापि शतांशो होमः सूचितः। अथवा भानुसहस्रकमित्यनेनैव सर्वत्र शतांशो होमः सूचितउक्तः। भान्तीति। भानवः षट्त्रिंशत्तत्त्वानि चतुर्विंशतितत्त्वानि द्वादशादित्याश्च तत्सहस्रकमिति हि तदर्थः। मन्त्रीति काम्यहोमेषु तत्तत्कामनोचितबीजप्रयोगः ॥६॥ प्राणायामैः पवित्रीकृततनुरिति वैदिकप्राणायामस्थाने। मूलेन रेचकं पूरकं च कृत्वा कुम्भककाले मातृकां प्रतिलोमेन जपन् अकारक्षान्त्ये परे सर्वसंहरेदिति वर्णवत्वः। पुनस्तन्मात्रापञ्चीकृतबीजानि पञ्चभूतस्थानेषु न्यसन्

सर्गं सृष्ट्वा पञ्चीकृतापञ्चीकृतबीजानि पृथि-
व्यादिस्थानेषु न्यसंस्तानि तन्मात्रासु संहृ-
त्य गन्धमात्राबीजं पादादिजानुपर्यन्तं
न्य
तद्व्यापिता मूलमेकवारं जपन् प्राणमायच्छ-
न् गन्धतन्मात्रं रसतन्मात्रायां संहृत्य-
तत्रापि मात्रा यथाक्रमं संहरेदिति कल्लोलेव्यः।
प
पूर्वोक्तषडाधारयोगरूपा प्राणायामैः सर्वं
संहरेदिति योगिनीवेव्यः। एवं प्राणायामत्र-
यं कृत्वा प्राणायाममन्त्रैरेव व्युत्क्रमेण सृ-
ष्टिः कार्येत्याह आद्य मन्त्रीति— विन्दुरूपा-
मिति। व्यापिन्यादि प्रभाभिर्व्याप्तामित्यर्थः।
ह्य अभ्य
बाह्यान्तरे च योनिमुद्रा बन्धनीया। अधो-
अभ्या
व्योड्याणजालन्धरखेचरी बन्धाद्यैः। इत्यार-
।।२०।।
भोविति वक्ष्यमाणप्रकारेणेत्यर्थः। वामादि-

शक्तिसहितामित्यत्र वामादिशक्तिसहितं
नवयोनिचक्रस्येत्यवगन्तव्यम्। विधिव-
न्नवयोनिचक्रमिति मध्ययोनौ मूलस्या-
वशिष्टयोनिषु गायत्र्यक्षरत्रयं यस्य कोणेषु मा-
तृभैरवबीजानां च बहिर्मातृकावेष्टन-
स्य चतुरस्रे मध्यबीजलेखनस्य च सूचनं
कृतम्। यन्त्रबीजादिकं तु सर्वत्र समानम्।
त्रिपुरादेवी च विद्महे कामेश्वरी च धीमहि।
तन्नः क्लिन्ना प्रचोदयात्। इति गायत्री ॥११॥ नवयोनि
रचनाप्रकारमाह — वह्नीति। वाग्भवा-
दित्रयमुपलक्षणम्। कामराजबीजादिके
परापरादिपङ्क्याः। मन्त्री यथोक्तक्रमतद-
त्यत्र मन्त्रीत्यङ्केषु मूलयोगो मध्यबीज-
दीर्घयोगश्चोक्तः ॥१२-१६॥ इति क्रमाद्येति, गुरोर्ज-

नवमः पटलः

उत्कृत
ध्य
पशुजातिकमाप्नोत्यर्थः । सहार्थे तृतीयाक्षेप्ये -
जुक्षार्थे ॥२०॥
ति केवलमुक्तत्वा न फलाकांक्षेत्यर्थः । स -
कामस्थे
मस्तसाधनमभिधाय फलविशेषकृत्ताम -
स्तन्त्रसाधनं वदन् वाग्भवसाधन -
क्रममाह — नच्छाभहृति, वाग्भवं बीजमे -
पा
कमिति । तद्वादिकं मन्त्रमित्यर्थः । होमः पला -
॥२१॥ मन्त्रौ
शैरेव, वीं जं रतिप तीति मन्त्रस्य
कामराजादिकमुक्तम् । होमो श्वारिभिर्वक्षां -
।२२॥
शः । मध्यबीजस्य होमकर्त्वमाह । सम्पुरा -
अन्त्य
सुरेति । अल्पान्तं मनुमिति । अन्त्यबीजादिकं
मनुमित्यर्थः । हसः हस्रां हसफल हस्क्लीं ?
ह्रीं हसरस्योः इत्येवंक्रमेण वक्ष्यमाणाः परिवार -
वर्णाः प्रतिबीजमन्त्रापि प्रयोक्तव्याः । सम - २३-२५
न्त्राजापीत्यनुजपः सूचितः । सर्वत्र दलद्वैः

विवरणे ।२३-३१॥

विकसद्दलैरित्यर्थः। प्रजप्य मन्त्रीति। मन्त्री- ।३२॥ ३३॥
स्त्यधिकयोरपि प्रयोगः सूचितः। ऊर्ध्वेन्तु मन्त्री-
न्तम इत्यन्त बीजादित्वममृतयोगो वा सूचितः ॥३४॥३५॥
पूर्वसूचितान्योगानाह — मूलाधारादिति।
त्रिशिखिपुरपुरेषु त्रिरावृत्या [illegible] त्र्यान्यास्वं
बहिरष्टदले केसरस्थाने स्वरयोगं दलेष्व-
र्णयोगं भूपुरे मध्यमबीजयोगं बीजविशे-
षयोगं चाह — मन्त्री व्याप्येति। ।३६॥ वाग्भव-
वह्निर्बिम्बीति। षट्कोणेषु वाग्भवयोगमाह ॥३७॥
योगमाह — व्याप्येन्मन्त्रीति। मध्यमबीज-
योगमाह — हृत्पद्मेति। योनिः षट्कोणम्। अ- ~~।३८॥~~
त्रं कोणेषु मध्यमबीजयोगमुक्त्वा योन्यन्त-
राले लाघव मित्यनेनान्त्यबीजयोगमाह — ॥३८॥
मूर्ध्नीशीति योनिः षट्कोणमेव। नवयोनिर्वा।
मकारस्थितमिति शेषः। आशु मन्त्रीति।

न्तर्हित
योनिश्चन्त्यबीजयोग उक्तः ॥३९॥ । पुनर्नेस्य प्रध्यानं
रक्तवर्णध्यानयुक्तं वाग्भवयोगमाह — यो-
[illegible]
॥३४॥३५॥ नेरिति ॥४०॥ मध्यमबीजस्य स्थानभेदेन यो-
गान्तरमाह — गुह्यस्थितामिन्द्रलावित्रिना ॥४१॥
अन्त्यबीजस्य सकलयोगमितरबीजयोरपि
प्र
उपलक्षणार्थमाहान्त्य इति ॥

इति प्रपञ्चसारविवरणे

॥ नवमः पटलः ॥

॥ अथ दशमः पटलः ॥

अथैवंशक्तिप्रध्यानां भुवनेश्वरीमाहात्म्या-
मिवक्ष्यतीति । सकलप्रपञ्चमूलामिति काव्याहीति
फ्का
पूर्वोक्तानिष्कलविद्या मध्यमबीजस्य स्मरभू-

तथा इत्यर्थः। अतोऽस्याः तद्योगः सूचितः। अथवा सकलः प्रणवः पञ्चाशद्वर्णात्मकत्वात् तस्य प्रपञ्चो विस्तारः विभूतिः श्रीरित्यर्थः।
षां मन्त्र
मूलं कामं वाक् च एतेषामात्मभूताया मध्यस्थायाः प्रकृतेः इत्येतन्नामैकेन समस्तैश्च पुटितत्वं श्लोकः सूचितम्। यथावदित्यनु-
ङ्क त्रि
लोम प्रतिलोमक्रमः सूचितः। साङ्गस्त्रिलयङ्गेषु तत्तद्बीजदीर्घादियोगाः सूचिताः। सकलार्थसिद्ध्यै इति। प्रणवयोगे मोक्षस्य श्रीयोगेऽ-
अर्थस्य वा
र्थस्य कामयोगे कामस्य वाग्योगे धर्मज्ञानादेः सर्वयोगे सर्वसिद्धिरित्यर्थः। १२॥ केवलस्यापि सकलपुरुषार्थसाधनत्वमाह—

दुरितापहरेति। १२॥ बोधस्वरूपवाचीति। बोधस्वरूपं परमात्मानं वक्ति प्रकाशयतीति

बोध्यस्वरूपवाची ब्रह्मात्मैकत्वविद्या निरूढा संविदित्यर्थः। गुरुभिः प्रोक्तेति। श्रीदुर्गादिमन्त्रा देवताः पक्षाः सूचिताः। ॥३॥ ज्योतिर्भिभिन्नेनेति हृदयाय नमः। इत्यादिप्रयुक्तेनेत्यर्थः। अपि त्वा सर्वज्ञादियोगः उक्तः। हुं बीजं द्विठाद्यैः ॥४॥ दिग्बन्धाद्यनन्तरं भूतशुद्धिक्रममाह— अग्नीन्द्विति। अग्नीन्दुशब्दाभ्यां प्रकृतिपुरुषावुच्येते। योगस्तयोः संबन्धः तेन परा पश्यन्ती तदर्थादिरूपेण विकृता लिपयो वैखरी तद्रूपेण सृष्टाभिः यस्मात्तस्मात्ताभिः सभेदं शरीरं तदर्थात्मकं तत्र व्यापयेत् संहरेत्। कथमिति तमाह प्रतिलोमपठिताभिरिति। प्रतिलोमेनन्यस्ताभिरित्यर्थः। शरीरस्याशुद्धत्वेन संहरणीयत्वमाह—

भूतात्मकमिति। प्रतिलोममातृकान्यासेन
वैखरीतदात्मकं स्थूलं बिन्दुं मध्यमात्मके
स्थूले संहृत्य बुद्ध्येनः सूक्ष्मादिकं संहरेदित्य-
मित्याह —— निश्चितधीरिति। विधिनेति
मं
प्राणायामैरित्यर्थः। तत्र प्रथमप्राणायामेन
त्मा च उकारिणा
बिन्दुं सूक्ष्मात्मकं नादे कारणे पश्यन्त्यां वि-
लापयेत्। द्वितीयेन नादं कारणं स्वात्मा-
न्ये परायां शक्तौ तृतीयेन शक्तिं शान्ताविति
विधिनेति सूचितम्। यथावदिति। नादान्त-
१५॥
न्तं मूलोच्चारणेनेत्यर्थः। प्रकारान्तरेण
भूतशुद्धिमाहान्यावृषिभिरिति। मूलाधार-
लिङ्गमूलनाभिहृदयगलतालुभ्रूमध्य-
चतुः
ललाटमस्तकेषु द्वितुश्चतुश्चतुष्पञ्च प-
ञ्चपञ्च पञ्चषोडशदलानि पद्मान्युद्ध-

दशमः पटलः

स्व
प्रकृतीश्च नराधिष्ठितानि स्मृत्वा तत्संहारेण
स्वयं परो भवेदिति श्लोकार्थः। तत्र मूलाधारं-
परंऽक्षरन्ध्र हुत्वा आप
रपद्मं ध्यात्वा दललवन स्मृत्वा तद्दलद्वय पृथि-
वीकारणात्मकं वं स्वाहा लं स्वाहेति कर्णि-
प्याप्या
कागतपृथिवीं विलाप्य स्वापि लिङ्गमूलस्थ-
ल
हकारं षड्दलचतुर्दशाप पद्मकर्णिकागताप्सु संहा-
र्येत्याह —— अन्त्याबुध्यास्विति। तत्रापि व-
न् द्विकान् ता
कारात्मकद्व्योकारान् पूर्ववदप्सु हुत्वा अ-
पि नाभिस्थवारिं चतुर्दश पद्मकर्णिकास्थ-
स्ताइ हअ
तेजसि संहार्येत्याह अमुन्तादिष्वपि। तदपि
तेजः सविकारं हृद्गते पञ्चदले पवर्गात्मके
वायुरूपे संहार्यमित्याह —— मलिपिषु
कैसान्तर
तानीति। अनेनैव क्रमेणोत्तरं पञ्चतुष्कं
तवर्गाद्यात्मकं पञ्चपञ्चदलं स्वाधिष्ठानकं

निबरणे

ले प्रतिपत्तव्यं योगमाह —— अथवा सूक्ष्मा -
।५०॥
ख्यायामिति। ^ तत्र सूक्ष्मशब्देन सूक्ष्मा वागु -
क्ता स्वमहिमस्था निरुक्ता। आख्याशब्दे -

× तुरीयातीतेति वा पाठः

न परा किञ्चिच्छलिता मूलाधारस्था पश्यन्ती सामान्यज्ञानरूपिणी नाभिस्था मध्यमा विशेषज्ञानरूपा हृदि स्थिता वैखरी शब्दरूपिणी मुखस्था इति मन्त्रोत्पत्तिक्रमयोगमभिधाय लयक्रमयोगमभिदधाति। ससुषुम्नाग्रगयोरिति सुषुम्नाया अग्रं सुषुम्नाग्रं तं गच्छन्तीति सुषुम्नाग्रगाः। वैखरी मध्यमा पश्यन्ती। परा सूक्ष्माख्याः। अास्यभ्रूमध्यमूर्ध्वद्वादशान्तषोडशान्तस्थाः वाग्भेदाः। तैः सहितयोः मध्यमाख्यवैखर्योरित्यर्थः। योगक्रममाह— बीजोच्चार इति। सृष्टिसंहारयोः जाग्रदवस्थैकैवावगन्तव्या। बिन्दुरेव प्र इति। भ्रूमध्यहृदयस्थ मध्यमा रूपात्मकबिन्दुरूपात्मक

स्वप्रकाश्यमित्यर्थः। एवमुत्तरत्रापि योज्यम्। सकल
सकल्प्रकाशः। सर्वस्य तेजोमयत्वेन प्र-
चिकरा चेतिका।
काशः विन्ता वेत्तृतायाथात्म्यमित्यर्थः। ज्योति-
प्रकाशनमिति परं प्रत्यापि सर्वस्य ज्योति-
र्मयत्वप्रकाशनमित्यर्थः॥

॥इति प्रपञ्चसारविवरणे एकोनविंशतिः पटलः॥

॥अथ विंशतिः पटलः॥

प्रणवमभिधाय

^ प्रणवस्याष्टमात्रात्मकाष्टवर्णविशिष्टमष्टाक्षरविधिं वदन् विनियोगमाह—
मत्य
अथ पुनरिति। पूर्वमप्यष्टभेदप्रणवात्मना अष्टाक्षरस्यैवोक्तत्वात्। पुनश्शब्दः ॥१॥ अ-

छे
षडक्षरस्यार्थमाह —— तारइति। शान्त्युथतये-
द्दता
ति शान्त्युथ्या जपा परमात्ममन्त्रसारतयेत्य-
र्थः। सोऽहं न तु पञ्चभूतसंबन्धीदमिति मन्त्रा-
क्रमा
इत्यर्थः। मनो॰ क्रमादित्युक्रान्ते स्वाहापदं
प्रयोज्य पञ्चाङ्गानि॰ प्रयोक्तव्येति सूचितम् ॥२-५॥
अष्टाङ्गकं सुधीरिति न्यासे वाष्टाङ्ग विनि-
योग॰। नत्तु पूजयामिति। विशेषस्तु इत्यर्थः॰।
।६-८॥ तं
ॐ बीजं। आद्यशक्ति॰। यजेन्मन्त्रीति नमस्ते
नमः। इत्यस्यानन्तरं मं मायायै नमः। विवि-
।६-११॥
द्यायै नमः। इति मन्त्रद्वयं सूचयति। मन्त्री
मन्त्रवर्णेति न्यासमन्त्राणां प्रणवपुटितत्वं
।१२-१३॥
प्रतिपर्यायं व्यापकन्यासश्चोक्तः। ततोऽष्टाक्ष-
रपूज्यार्थमिति। यद्यप्यष्टाक्षराणामष्टप्र-
कृत्यात्मकत्वेन जडवाचकत्वमेवेति भाति।

S.T. p. 61

मन्त्रानाम्। तथापि लक्षणया चेतनस्या-
प्युक्तत्वात् बिन्दुनादशक्तिशान्तानामा-
त्मचतुष्टयगामिनां सद्भावाद्वा पूर्ण-
मेव स्वतोऽष्टाक्षरं तथापि तन्न स्पष्टमिति।
मन्त्रोऽष्टाक्षरे
तत्स्पष्टीकरणाय द्वादशाक्षरमन्त्राक्षरेऽ-
।२५॥
न्तर्भूतः स्मर्तव्यो न्यस्तव्यश्चेत्यर्थः। स्वतः
पूर्तिं वदन्नक्षरतत्वन्यासं सूचयति —
अष्टेति। द्वादशाक्षरयोगे पूर्तिं वदन् बि-
न्द्वादिभिः सार्धमात्मचतुष्टयन्यासं व्या-
पकत्वेनाहाष्टानामिति। अत्र प्रणवेन सा-
र्धं बिन्द्वादयः प्रयोक्तव्याः। तत्वन्यासो
द्वादशाक्षरयोगोऽनेनैव सूचितः। मूर्तिप-
ञ्जरन्यासमाह — आदित्या इति, का-
।२६॥२७॥
स्ताः द्वादशमूर्तयः? किं विशिष्टाश्चेति?

तदाह—केशावावीति। ।१८॥१९॥ मन्त्रविन्मूर्ध्नीत्यष्टा-
क्षरेण स्वार्थमित्यर्थः। तत्र प्रतिपत्तिमाह—
मूर्ध्नि स्थ इति। ।२०॥ मन्त्रविन्मकारान्ते कुण्डल-
मिति मकरकुण्डलालंकृत इति पदाद्व्या-
हारः सूचितः। ।२१-२४॥ सुशुक्लमना इति। गन्धादी-
नां निर्णयेन्तं व्याप्तिचिन्तनमुक्तम्। ।२५॥ वि-
धिवदिति। पुष्पाञ्जलेर्जलगन्धसंपुट-
त्व। ।२६-३०॥ अष्टाष्टाराङ्गैरिति पत्राङ्गैः प्रथमाव-
रणमुक्तम्। अष्टार्णवर्णैरित्यक्षराष्टकेनद्वि-
तीयं पत्रावरणमित्यङ्गैः। विनेत्यवगन्त-
व्यम्। ।३१-४२॥ अर्चनाद्यैर्मन्त्रीति लौहकासिक्यौ
तव्योग्यवीप्ययोगादिकमुक्तम्। ।४३-४५॥ क्रमेण लि-
ङ्गानित्यङ्गावरणयोगडकः। ।४६-४७॥ भेदाभिन्ना-
नीत्यावरणभेदभिन्नानीत्यर्थः। अम्बुरु

हरागवर्णाः सर्वविधानेष्ववशिष्टान्या
मूर्तिरितिज्ञेया। ।४८॥४९॥ अरिदरगदाब्जहस्ताःस-
वीशति दक्षिणोर्ध्वहस्तमारभ्य प्रादक्षिण्ये-
नेत्यर्थः। इयमेवाक्षरमूर्त्यावर्तिः वृत्तिः प्रणव-
त्वे विधाने सिता ।धिका भवति। तस्मात् पुरा प्रणव-
पटले उक्तात् प्रणवविधानादित्यर्थः रीति। अंग-
वासुदेवाद्यात्मादीन्द्रवज्रादिभिर्हि प्रणव-
विधानमुद्दिष्टम्। अत्र तु कुक्षेत्रादिभि-
र्वा पूज्यां तदनन्तरमक्षरमूर्तिपूज्यां। ततो
वासुदेवादिक्रममिति, नकारादिविधाने-
षु ओं नं ओं नमो नारायणाय इत्यादयो
मन्त्राज्ञातव्याः। सर्वत्र चाङ्गानन्तरं मूर्त्या-
वृत्तिः मर्तिद्वयं द्रष्टव्यम्। ।५०-५३॥ विमलधीरिति। मूर्त्या-
वरणमन्त्रभेदाः। मूर्त्यावरणे तत्तदक्षरा-

।५४-६०॥
नन्तरमारभ्य पूर्वाक्रमन्त्रसूचितः । आ-
लक्ष्यमिति, किरीट$\overset{\text{मन्त्र}}{\text{मात्रा}}$पुष्पाञ्जल्यादि-
क्रमेष्वपि विधानेषु द्रष्टव्यमित्यर्थः ॥६१॥६२॥

॥ इति प्रपञ्चसारविवरणे विंशतिः पटलः ॥

॥ अथ एकविंशतिः पटलः ॥

अथाष्टाङ्गानस्यैव मास$\overset{\text{त्रय}}{\text{यन्त्रा}}$भेदेन विधान-
भेदं वक्तुमारभते —— अथ $\overset{\text{प्र}}{\wedge}$वक्ष्यामीति $\overset{\text{॥१॥}}{\wedge}$यन्त्रा-
दिकथनप्रयोजनमाह —— यैः कुर्युः इति ॥२॥ मा-
सयन्त्राणां सामान्य$\overset{\text{ग्रह}}{\wedge}$लक्षणं विभा$\overset{\text{ग}}{\text{गं}}$ चा$\overset{\text{औह}}{\text{माह}}$ ——
मेषादिकमिति, स्वैः स्वैश्च नामेति स्वैः स्वैरूपै-
र्मेषवृषभादिलक्षणैः कथंभूतैर्नामभिः वृष-

विवरणे

भद्रयादिभिर्लेखालिखितैः सह प्रविभक्तं
रूपं येषां ते तथोक्ताः। बिम्बशब्देन यन्त्राब्जे लिखितानि वारवादिमण्डलान्युच्यन्ते ॥३-६॥
यन्त्रोदरक्लृप्तेति मध्यबीजस्य यानि वेष्टनान्युक्तानि त्रिगुणितादिषु तद्बाह्ये ओं मेषाधिपतये केशवाय नमः। इत्यादिमन्त्रैर्वेष्टितानीत्यर्थः। ।७॥ वृत्तानि भवन्तीति उक्तवेष्टन
बाह्ये मेषाद्याकार बाह्या ह्ये इति केचित्। शिला
मनःशिला, अलं हरिदलं, सचक्रशंखा इति
पद्मारिगदया शंखपद्मशंखगदारिभिः।
गदारिशंखपद्मैश्च केशवाद्यास्त्रयोंकिताः।
गदाचक्राब्जशंखैश्च गदाशंखारिपंकजैः।
शंखचक्राब्जगदया गोविन्दाद्य अंकिताः।
गदाब्जचक्रशंखैश्च चक्रशंखगदाम्बुजैः।

[illegible] पटलः

चक्राम्बुजगदाशंखैः त्रिविक्रमपुरस्सराः।
चक्रकौमो०जशंखैश्च पद्मकौमोदिशंखकैः।
शंखचक्रगदापद्मैः हृषीकेशादयः क्रमात्।
उत्तराधरभेदेन दक्षबामक्रमात्तथा।

इत्युक्तक्रमेणेत्यर्थः। ।१८-२२४। पूजामन्त्रान् कथयति प्रथमं केशवेति। ओं अं केशवाय धात्रे नमः। ओं आं नारायणायार्यम्णे नमः। इति द्वादशाक्षराक्षरद्वादशस्वरमूर्त्यादित्यनमस्कारयुता मन्त्रा इत्यर्थः। एते च पुष्पाञ्जलिन्यासादिमन्त्राः। मूलमन्त्रास्त्वेते। ओं प्रौं नमो भगवतेऽनन्ते केशवाय। ओं प्रौं ओं नम इति केशवमन्त्रः। ओं क्ष्रीं नमो भगवतेऽनन्ते नारायणाय ओं क्ष्रीं ओं नमः। ओं ह्व्रौं ओं नमो भगवते माधवाय ओं ह्व्रौं ओं नमः। ओं ह्व्रौं नमो भगवतेऽनन्ते गोविन्दाय ओं

निवृत्ते

ओं छ्रौं ओं नमः। ओं मुक्तिषु श्रीधराय स्वाहा-
न्ते विष्णवे नमः। ओं म्रौं मधुसूदनाय ओं
म्रौं ओं नमः। ओं ह्रीं त्रिविक्रमाय ओं ह्रीं ओं
नमः। ओं प्रौं वटुवामनाय ओं प्रौं ओं नमः।
ओं क्लीं ओं श्रीं क्लीं नमः श्रीधराय ओं क्लीं श्रीं क्लीं ओं
नमः ओं ऐं द्रों द्रां द्रां हृषीकेशाय विष्णवे ओं
ऐं द्रों द्रां ओं नमः। ओं हुं ओं नमः। पद्मनाभा-
य ओं हूं ओं नमः। ओं द्रं ओं नमो दामोदरा-
य ओं द्रं ओं नमः इत्यवशिष्टा मन्त्राः। एतैः
सहितेनाष्टाक्षरेण पूजाः कार्याः। ओं केशवाय वि-
द्महे * ~~भवोद्भवाय~~ जलधराय धीमहि तन्नो ध्रुवः
प्रचोदयात्। नारायणाय विद्महे भवोद्भवाय
धीमहि तन्नो वन्द्यः विश्वः प्रचोदयात्। श्रीगोवि-
न्दाय विद्महे विश्वेश्वराय धीमहि। तन्नो वि-

---

* श्री माधवाय विद्महे लक्ष्मीधराय धीमहि तन्नो
विश्व प्रचोदयात

८ कालिशः पटलः

स्वः प्रचोदयात्। निष्वीश्वराय विद्महे देव-
श्रेष्ठाय धीमहि, तन्नो वाणी प्रचोदयात्। मधु-
सूदनाय विद्महे लोकपालाय धीमहि, तन्नो
धीरः प्रचोदयात्। वामनेशाय [देवा] विद्महे माया-
रूपाय धीमहि। तन्नश्लिङ्गं प्रचोदयात्। श्रीध-
रेशाय [रा] विद्महे लक्ष्मीश्वराय धीमहि, तन्नो जा-
तः प्रचोदयात्। त्रिविक्रमाय विद्महे महाम्बुजा-
य धीमहि। तन्नो जीवः प्रचोदयात्। हृषीकेशा-
य विद्महे महादेवाय [योगा] धीमहि। तन्नस्साध्यः
प्रचोदयात्। पद्मनाभाय विद्महे आत्मेशा-
नाय धीमहि। तन्नो ब्रह्मा प्रचोदयात्। दामोद-
राय विद्महे रत्न[भस्म]प्रियाय धीमहि तन्नो दि-
व्यः प्रचोदयात्। इति गायत्रीभिर्वा पहारान्
प्रयच्छेत् ।२२-२४॥ आवरणेष्वपि सामान्यावरणा-

न्याह —— आद्याविति। यथाविधीति। अंगानन्तर्यं। वासुदेवादीनां वासुदेवादिमन्त्रपूर्वकत्वं चाह —— मन्त्रीति। तृतीया या मूर्तिर्मध्ये पूज्या। तस्याः स्थाने वासुदेवमन्त्रेण पूजोक्ता। सा तं नु केशवाद्यैरिति केशवादेः प्र पूर्व मेतस्या पूर्वमध्याव्यावरणं केशवादेः पूर्वं पूर्व शेषाद्यावरणमित्यर्थः। अतः सर्व पूर्वपूज्यानु केवा द्यावरणानि स्तिले तत्त्वमपि सिद्धम् ।।२५-२६।।

प्राक्प्रोच्याविति। ऌ ऋकारादिस्व~~[illegible]~~राष्टकं प्रतिलोमेन लृकाराद्यष्टकमनुलोमेन इत्यर्थः। ऋं ऌं ॠं ॡं ऊं टं इत्येवं क्रमेण पूर्वोक्तेतवेष्टनवाह्ये वेष्टयेदित्यर्थः। बहिरपीति। शक्तिवेष्टनात् बहिरपीत्यर्थः। ट्ट सिंहानुष्टुभवराहमन्त्राभ्यां वृत्तद्वयं कार्यम्। बिन्दुनामन्तराकेष्विति वायुमण्डलस्य बिन्दुना-

मन्तराले च्चित्यर्थः। अभिमतकामप्रदमिति
मध्ये कामबीजस्य लेखनं सूचितं। यन्त्र-
स्तु उक्ता ।१७॥
सामान्यमन्त्रा स्वत्रापि समानाः। मूलयोरिति
द्यौ
वासुदेवादि केशवाद्योरित्यर्थः। अंगवासु-
देवगौरीकेशवध्वजेन्द्रवप्राद्यैः सप्ताव-
णं दि ।१८॥१९॥ च गो
रणामेव यन्त्रापूजेत्यर्थः। अत्र मध्यराजादि-
ति मध्यबीजवेष्टनानां मध्ये राजद्भिः पान्त-
द्यावक्षरैराढ्यमित्यर्थः। अं क्षं आं वं इं हं इ-
त्यादिक्रमेण वेष्टयेन्मध्यबीजमित्यर्थः।
नाद्यैः कान्तैरिति शक्तिवेष्टनात् बाह्ये
नं कं सं खं दं गमित्यादिक्रमेण वेष्टनमवग-
।२०-२२॥
न्तव्यम्। अङ्ग वासुदेवानि वृत्यानन्तन्त-
केशवमत्स्याशो ध्वजेन्द्र वप्रादिभिर्नवा-
ग नीति ति
वरणा वृषयन्त्रपूजा प्रागाच्छादिति। प्रा~~[illegible]~~-

350.

विवरणे

गच्छति गच्छद्भिः

लोम्येनागच्छद्भिः ब्राह्म्यादिमातृणामभिख्या लिपिभिः नामाक्षरैरभिवृत्तमध्यबीजमित्यर्थः। यदेवंभूतं यन्त्रं तद्युग्मम्मित्युत्तरत्र यच्छब्दस्यान्वयः। मात्राक्षराकृति

तृका

विशिनष्टि। स्वरायुक्त व्रतमिति। अः अं मध्यस्थ क्षी औं ओं चण्डिके ऐं वं इन्द्राणी इत्यादिक्रमेण वेष्टनमवगन्तव्यम्। शाद्यैः क्षान्तैरिति, षड्गुणितस्य गण्डद्वादशकं भवति। तेषु शादिक्षान्तं क्षादिशान्तं च लिखेदित्यर्थः। तत्र दक्षिणभागगण्डेषु क्षादिकं वामेषु शादिकमित्यवगन्तव्यम्। तद्रक्रान्तेति षट्दलचक्रेषु पूं स इति लिखेदित्यर्थः। काव्यैर्भान्तैरिति शक्तिवेष्टनात् बहिः कं अं खं बं गं ङमित्यादि क्रमेण च लेखनीयम्।

वृत्त

द

द्य

एकविंशः पटलः

मयरलवहयुबिन्दुकमिति। वायुमण्डलबिन्दुश्वेतानि लिखेदित्यर्थः। अंगवासुदेवेन्द्राणी केशवकेविन्द्रवज्रादिभिस्सप्तावरणा मिथुनयन्त्रपूजा। ।२३।।२४।। पश्चाद्वेष्टार्णेति। महाष्टाक्षरं वैष्णवाष्टाक्षरं, शाखान्तरुद्ध गगनेति। शांखान्तं प्रणवः तस्मिन् आ रुद्धं ईं शाखान्तरुद्ध गगनं हकारः। नृहरिः क्ष्रौं एतैरात्तकोणमित्यर्थः। बहिश्चेति त्रिकोणात् बहिरित्यर्थः। काहरिमिहरानिघोर इत्यादि क्रमेण वेष्टनं प्रत्यनूच्य वर्णाढ्यमिति। शक्तिवेष्टनबाह्येऽङ्गवासुदेवरक्ता भूतिकेशवकेविन्द्रवज्रादिभिरष्टावरणा कर्कटकपूजा। ।।२५-२७।। ऊष्माणेति। अत्रानुविगता ऊष्माणी ग्राह्याः। शं ओं षं नं सं मों हं नां हं रां सं यं

षं नां यं वं इति वेष्टनप्रकारः। द्वादशार्णं प्रसिद्धम्। सान्तस्येति। क्रमगतात्माष्टाक्षरवर्णद्वयानन्तरं क्रमगतान्तस्था वर्णानामेकैकं लिखित्वा विगतात्माष्टाक्षरवर्णद्वन्द्वानन्तरं विगतान्तस्था वर्णानामेकैकं लिखित्वा विगतात्माष्टाक्षरवर्णद्वन्द्वानन्तरं विगतान्तस्था वर्णानामेकैकं लिखेदित्यर्थः। गण्डशब्दार्थ उक्तः किं चानुष्टुभि विवि. शक्तिवेष्टनादूहिः उं ग्रं अं वीं रं आं इत्यादिप्रकारेण वेष्टनं वन्हि प्राणेति पृथिवीमण्डलस्याग्निवायवीशाननिऋतित्रिकोणेषु कचटतवर्गात् पयशाक्षवर्णांश्च लिखेदित्यर्थः। वक्रच्छेदेन यवर्ग उक्तः। अंगवासुदेवपुष्टिकृष्णानन्तकेशवमन्त्रस्य केबिन्द्रवप्रादिभिर्दशा-

२८-३०
वरणा सिद्धपूजा। सर्गाद्यान्ताद्यमन्तैरिति,
विसर्गाद्याकारान्तैरकाराद्यमन्तैश्च वेष्टयेत्। अः अं अं औं उं इं ओं ईं इत्यादिप्र-
ग्रकामाते अग्र
कारेण आत्ताक्रकमलत्र्यश्रशब्देन षट्कोणकोणान्युच्यन्ते। शिखाशब्देन षट्कोणा-
घ: ष
ग्राणि। वर्गान्त्यः ङकारः वर्णैः प्रत्यन्वितैरि-
र्थे
ति। शक्तिवेष्टनवाह्ये अवस्थानेषुरकोणेष्वेव
क्लीं च क्लिन्ने स्वाहाणीः अंगनामुदवकृषीकेशामलस्य केशवके विन्द्र वप्रादिभिरष्टा-
॥३१॥३२॥
वरणा कन्यका पूजा। आव्येनावीतमिति,
ग्रहवलयमुतं यथा भवति तथा येरावीतमच्छबीपमित्यर्थः। सूर्यः अं आं सोमः इ
ईं अंगारक उं ऊं शुक्र ऋं ॠं बुधः ऌं ॡं
बृहस्पते एं ऐं शनैश्चर, ओं औं राहो अं

विवरणे

केतो अः, इति वेष्टनप्रकारः। हुंफडायुक्त-
कोणमिति हुं फड्युक्ताग्निकोणकोणमित्य-
र्थः। बाह्य इति। शक्तिवेष्टनाद्बाह्य इत्यर्थः।
युगषण्मूर्तयः केशवाद्याः तेषां नामार्णैरे-
कावृत्तिः तद्बहिः प्रत्यन्वेष्यक्तिः मातृका-
वर्णैरावृत्तिद्वयं तद्बहिः हरिहरवर्णैर्द्व-
वासुदेव चक्रकेशवकेलिन्द्रवज्रादिभिः स-
॥३३॥३४॥
ष्टावरणानुक्तपूजा। अक्षीवेति। द्वादशाक्ष-
हं
पिद्वादशाक्षरं, अं ओं आं नं उं मों इत्या-
दिप्रकारेण वेष्टनमवगन्तव्यम्। अग्नीद्व-
पटकेति। अष्टाक्षराद्यर्द्धद्वन्द्वं कोणद्वये
लिखित्वा ऊष्मार्णानामेकैकं तृतीयकोणे
तत कौपायु नपुंसकाक्षराणि
विलिख्यावशिष्टकोणेष्वप्येवं क्रमेण लि-
खेदित्यर्थः। लिपिभिः कादिभिरिति शाखि-

एकत्रिंशः पटलः

वेष्टनबाह्ये चन्द्रमण्डलप्रपुरितकेति । चन्द्रमण्डलं लिखित्वा तन्मध्ये भूमण्डलं विरच्य तत्कोणेषु नपुंसकाक्षराणि लिखेदित्यर्थः। अङ्ग वासुदेव चिद्रूपानन्तकेशव मत्स्यकेलिन्द्र वज्रादिभिर्नवावरणाकृत्रिकपूजा । ।३५-३७॥ बाणासनेति । बाणासनशब्देन धनुराकारं षट्कोणान्तरावमुच्यते— तदन्तारिति । षट्कोणमध्य इत्यर्थः। शुक्लपञ्चकाख्यं पञ्चकद्वयाख्यं किं तत्पञ्चकद्वयमिति । तदाह — लघुसन्ध्यर्णेति ॥ अइ उऋऌ इत्येतत् ~~[illegible]~~ लघुपञ्चकं । एऐ ओ औ अं इत्येतत्सन्ध्यपञ्चकं वेष्टनक्रममाह — परानुप्रवर्त्तितेति । लृं एं ऐं ऊं ओं औं अं अं इति क्रमेण वेष्टयेत् इत्यर्थः।

अश्रिष्विति, षट्कोणेष्वित्यर्थः। आं ईं ऊं ॠं ॡं अः इत्येते दीर्घाः स्वराः। उपरि लसच्छुलप्राप्तवर्गमिति षट्कोणाश्राग्रेगच्छत्सुमूलेषु प्राप्तकचटतपयवर्गमित्यर्थः। यच्चद्वयहृल्लवकं कामबीजं हृमित्यर्थः। अङ्गवासुदेवहृषीकेश केशवकेविन्द्रवज्रादिभिः सप्तावरणा चापपूजा, ॥३८॥३९॥ अनुपरात्स्वरप्राक्परार्धमिति अं अः अं आं इं औमित्यादिक्रमेणेत्यर्थः। सिंहार्णाश्रीति क्ष्रौंकारविशिष्टकोणत्रयमित्यर्थः। अष्टार्णावृतिः हरिहरवाद्ये षोडशार्णावृतिश्च तत्रैव षोडशार्णः सुदर्शने वक्ष्यमाणो ग्राह्यः। अत्र षोडशार्णाक्षराभ्यां वृत्तमिति शक्तिवेष्टनात् बहिर्मातृकावृतिरप्युक्ता। स्वक्षेत्रव-

*ग इति क्रमस्थवर्तिं

त्तिनइत्युक्तम् । सहावरणं सर्वत्र समानमि-
ति केचित् । सर्वेष्वापि तन्न । पृथग्गणना-
णा
हं केशवाद्यावरणत्वान्तर्भूतत्वात्
आदित्यावरणवत् अङ्गवासुदेवमध्याके-
शवकेविन्द्रवज्रादिभिः सहावरणामक-
॥४०-४२॥
रयन्त्रपूजा, शक्तिःश्रीति, ह्रीं ह्रीश्रीं ह्रक्लीं*
ह्रीमिति क्रमेणावृत्तिः* कार्येत्यर्थः । आदिक्षा-
गृ
न्तैरिति शक्तिबाह्ये भवनिग्रहेति, दिग्गत-
कोणेषु कामादयोल्लेख्याः । कोणगतकोणे-
षु चिन्तामणिमनुरिति विभागः । अङ्गवा-
सुदेवाच्युतानन्तकेशवमत्स्यकेविन्द्र-
।४३-४५॥ ॰यन्नप्येद्वास्व
वज्रादिभिर्नवावरणा कुम्भपूजा, ॰यन्त्वे-
दीर्घेति
ष्यद्धवेसेति अं आं ओं ईं ऐं ऊं लृं ॠं ऋं
लृं उं एं इं औं अं अः इति क्रमेणावृत्तिः कार्य-

यर्थः। विधिवत् कल्पितमिति यन्त्राद्युद्धारकं सूचयति। अङ्गवासुदेवहृषीकेशकेशवकैरिन्द्रवज्रादिभिः सप्तावरणामीनपूजा। ।४६-५२॥ यस्तु मन्त्री चिरायेति। अनेकान्केशवादिमन्त्रान् सूचयति॥ ६९॥

॥इति प्रपञ्चसारविवरणे एकविंशतिः पटलः॥

॥अथ द्वाविंशः पटलः॥

द्वादशमूर्तिविधानानन्तरं तत्समष्टिवात्मकस्य द्वादशाक्षरस्य विधानं वदन् विनियोगमाह— अथोच्यत इति। ॐ बीजं, नमः शक्तिः। ।२-३॥ पत्राङ्कविधिरीदृशः। इति द्वादशाक्षरस्यापि समुदा-

नः सूचितः तत्र द्वादशार्णैः सार्द्धं पुरुषसत्याच्युतवासुदेवादिनारायणब्रह्मविष्णु नरसिंहवराहात्मभिः षडङ्गोदरपृष्ठबाहूरुजानुपादेषु कार्यम्। ।४-६॥ द्वादशसाहस्रकं मन्त्रीति विशेषहोमजपेषु बीजशेष-
॥१०॥
(संयुत) उक्तः। भक्तिपूर्वतो विद्वानित्यष्टाक्षरोक्तं सर्वं विदुरिति मासयन्त्रपूजादिकमत्रापि
सामान्य ।११-१४॥
समानमित्युक्तम्। सम्यग्विज्ञाननिश्चयस्य वासुदेवस्य पूजामभिधाय चक्रामकज्ञानविशिष्टस्य तस्यैव विधानं वक्तुमारभते। ॥१५॥ अन्त्येति देवता विष्णुरिति सुदर्शनविष्णुरित्यर्थः। हूं र बीजं हुं शक्तिः ॥१६॥ देन्द्री दिशं चक्रेण बध्नामि नमश्चक्राय स्वाहेत्याद्याः प्रयोगेषु रक्षार्थं दिग्बन्धमन्त्राः।

सुदर्शनमुद्रया सहार्यं दिग्बन्धः कार्यः ॥१७॥१८
तारं तु मूर्ध्नीति वर्णन्यासः। अत्रापि समानाः सामा-
न्यन्यासाः। ॥१९-२१॥ सान्निध्यकारिणीमुद्रां सुदर्शनमु-
द्रां सुधीरिति सहस्रारस्य सुदर्शनस्य ख्या-
नमुक्तम्। ॥२२-२४॥ पूजादौ प्रयोक्तव्यं यन्त्रमाह—
षट्कोणेति। विवरशब्देन षट्कोणषट्कमुक्तम्।
बाह्यइति। वृत्तबाह्य इत्यर्थः। कलाः स्वराः
उदरं दलमध्यं वर्णैः विराजदिति दल-
लसत्षोडशार्णमिति वर्णैः कादिवर्णान्तैः दि- निशार्द
शः केसरस्थानालिखितैः नीपे विराजदिति कर्णिकया
वन्मुखपद्मदलस्थषोडशार्णमित्यर्थः। तद्बा-
ह्यस्थवृत्तत्रयेति ति वीतस्तोमान्त्यार्णं व्योमार्णं
हकारः। अन्त्यार्णः क्षकारः। तद्बाह्ये स्व-
नाम्नासह विरचितगुणपाशाङ्कुशं। गुणः

V. 52,
p. 678

द्वाविंशः पटलः

प्रणवः प्रथमं प्रणवः ततो नाम्नः प्रथममक्षरम् ।
⑥
ततः पाशः ततो नाम् द्वितीयाक्षरम् । ततोऽङ्कु-
॥२५-२८॥
शमिति विरचनाप्रकारः । पीतरक्तादिवर्णास्तु
।२९-३१॥
द्रव्याद्या ज्ञातव्याः । सम्यगिति द्रव्याणां सम-
॥३२॥
विभागं सूचयति — मनस्वीति, ब्रह्मचर्यादि-
॥३३॥
नियमवानित्यर्थः । विधिना यथावदिति
विधिनेत्यग्निजननादिकमुक्तम् । यथाव-
दिति कार्यानुगुण~~नीच~~विशेषप्रयोगः सू-
।३४॥
चितः । निशात्यमिति ~~स्वित~~रथ्यो इति, चक्रयाथा-
त्म्यसत्वमुक्तम् । मन्त्रीति : चक्रस्य मूलम-
न्त्रांगुक्तत्वम् । कुंभं संपूर्येति, संपूर्य तत्र
देवतां वाह्याभिपूज्येत्यर्थः । विधिवत्क्षिपे-
ति दशांशः कलशे क्षिपेदित्यर्थः
त्यर्थः । कुंभोदक इति, कुंभमुखइत्यर्थः । मन्त्र-
विदिति, जपहन्तमूलानीति सुदर्शनगायत्र्या

क्षिपेदित्यर्थः, मन्त्रार्णैरित्यनेनैव दक्षिणभागस्थस्य स्थापितस्य सकलीकरणं रक्षोघ्नमन्त्रेण नीराजनं चोक्तम्। ॥३५-३७॥

ओं स्थाने हृषीकेश तव प्रकीर्त्त्यास्ते सह नमो जगत् प्रहृष्यत्यनुरज्यते चान्ते स्वार नारारक्षांसि भीतानि दिशो द्रवन्ति। हुं फडुच्चार्य सर्वे नमस्यन्ति च सिद्धसंघाः। ओमिति रक्षोघ्नमन्त्रः मन्त्रवित् कुर्यादिति प्रणवाद्यादित्वं मन्त्रस्य सूचितम्। ॥३८-४०॥ कुम्भमपीत्यपिना सकलीकरणमुक्तम्। ॥४१॥४२॥ सिद्धेऽग्नौ कुंभमिच्छुमिति पूर्वोक्तविधानेनाग्निं संस्कृत्य पूर्वोक्तपूर्वोक्तप्रकारेणैव कुम्भे पञ्चगव्यं संयोज्य तस्मिन् प्रोक्तमौषधजातं निक्षिप्य मूलमन्त्रं जपन् अर्चयेत्। ततः

v. Gita XI. 36

द्वात्रिंशः पटलः

कुंभमध्यगतौषधिच्छविभिर्यकेग्नौ मूलेन
शतं सहस्रं वा हुत्वा जपपूजादिना घटे सिद्धं
।४३।।४४।।
भवन्म सकलाभ्युदयदायीत्यर्थः। स्वाष्टकंच
।४५।।
मन्त्रितमश्नाति नृसिंहबीजस्योपासकः। मन्त्रवि-
त्तमो जुहुयादित्यपि तथा नखर कारयो राक्ष्ना ।।४६।।४७।।
मनुं जपेन्मन्त्रीति रक्षोघ्नमन्त्रयुतमित्यर्थः। ।।४८।।
संयत
मन्त्री सुनियतइत्यपि तथा सुनियतचित्त-
।।४९।। दाम्रामिते
इति। सहस्रारज्वालाकरालकलध्यानमुक्तम् ।।५०।।
ज्वालावृतमिति, यं यामीत्यादिभिरावृतमि-
त्यर्थः। शिरसि स्थितं समक्षरं वायव्याकारं हृ-
ब
द्गतं जीवं ग्रसति। ज्वलन्तीति यान्ति धीनैशि-
।।५१।।५२।।
कमप्येतदेवन स्रवत्सुधावर्षिणमिति प्रयो-
लं
गोमृतमण्डले वं ~~[illegible]~~ नामीत्यादिशुक्र-
।५३।।
श्च कार्यः। विधिवदभिजप्येति। होमादिपू-

वक्ष्मीत्यर्थः। स्वकोष्ठमन्त्रमुद्धरतीत्यं स्थानेति। यन्त्ररचनाप्रकारमाह — अष्टाक्षरेति। रेखाष्टकं लिखित्वा एकान्तरितमुभयतो (योर्) बध्वाष्टाक्षराक्षरं द्व्यान्तरितमीता त्रिष्टुप्पादचतुष्कयुतकोष्ठचतुष्कं कुर्यात्। प्रथमं पादद्वयमूर्ध्वभागस्थकोष्ठद्वये परं द्वयमधोभागस्थकोष्ठद्वये मध्यकोष्ठोभयभागस्थकोष्ठद्वययोः (ये) सुदर्शनं मध्यकोष्ठगप्रणवे साध्यादिकं लिखेदिति यन्त्ररचनाप्रकारः। श्रुतिशः प्रवक्ष्यामीति तृतीयतृतीयरेखादिभिः वक्ष्मीत्यर्थः। ।५६॥ मन्त्रीति यन्त्रहृदयादिकमुक्तम्। अंसमादिना होमप्रविहितकृत्संपातपातेन चात्रशक्तीत्यर्थः॥ ५७॥

॥इति प्रपञ्चसारविवरणे द्वाविंशः पटलः॥

श्रीः

॥ अथ प्रायोगिकः पटलः ॥

रक्षाप्रधानं सुदर्शनमभिध्याय रक्षितस्य शीघ्रं विभूतिसिद्धये श्रीपुरुषोत्तमविधिमाह — धर्मेति, अथवा चक्राधिरूढस्य भगवतो विधिमभिध्याय गरुडाधिरूढस्य भगवतो विधिरभिध्यीयत इति संबन्धो वाच्यः। धर्मेत्यादिना विनियोग उक्तः। योषितामपीति, स्त्रीणामप्यत्राधिकार उक्तः। मन्त्रिमतामिति तत्तत्पुरुषार्थविनियोगबीजविशेषज्ञानामित्यर्थः। ॥१॥२॥ भूतार्थोक्तिश्च संसारेति प्रभूतानां प्राणिनां प्रयोजनार्थोक्तिश्च संसारनिर्वाहादिकमर्थयन्तीति तथोक्ताः। ॥३॥४॥ मारणोच्चाटनेत्यादिना स्वार्थप्रयोगकांक्षि-

णामप्यधिकार उक्तः। मन्मन्त्री स्वत्र पूर्णं कमित्यमुकमित्यमुकशब्दं परित्यज्य तत्स्थाने साध्यनामप्रयोग उक्तः॥ ॥४-१२॥ मन्त्रामुद्धरेन्मन्त्रीति शक्तिश्रीबीजप्रयोग उक्तः। ॥१३। मन्त्रापदानीति। आमन्त्रापदानि संबुध्यन्तपदानीत्यर्थः। तानि द्वादश विद्यात्। द्वादशाङ्गन्यासपूजादिसाधनत्वेन जानीयादित्यर्थः। आज्ञापदानि प्रार्थनपदानीति भावः। तान्यपि तापद्यादीनि तावन्ति द्वादशसंख्यातानि विद्यात्। वश्याकर्षणक्रूरकर्मादिषु पुष्पाञ्जल्यर्थं जानीयादित्यर्थः। तत्र द्वादशाङ्गादिमन्त्राणां द्वादशमूर्तिसंयोगमाह— सम्बुध्यमन्त्रांशान्ताः पुरुषाद्यन्ताइति। संबुध्यन्ता मन्त्रांशाः पुरुषाद्यन्ताः। संबुध्यन्तानां पदाना-

मुपरि पुरुषादयः प्रयोक्तव्याः # इत्यर्थः। पुरुषसत्यांच्युतवासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणब्रह्मविष्णुनरसिंहवराहाः पुरुषादयः आज्ञापदान्विशिनष्टि। हुं फट् पदान्विताः इति, आज्ञापदानामुपरि हुं फडिति प्रयोक्तव्यानीत्यर्थः। ।१४॥ पुनरपि मन्त्रणपदानां विशेषं दर्शयन् बीजप्रयोगक्रमं मन्त्रणपदानां द्वादशसंख्यानां च पूरयति, मध्येति, मध्यनवान्ते अवा(?) पञ्चेति रे मुनिभिः द्वादशमन्त्रा गदिताः स्युरित्यन्वयः। बीजत्रितये मध्यस्थो नरः पुरुषः पुरुषोत्तमः कामबीजरूपी मध्यनरः तस्यान्तपार्श्वे सति पार्श्वद्वयगतशक्तिश्रीबीजद्वये सतीत्यर्थः। अनेन बीजानां प्रयोगक्रम उक्तः।

विवरणे

आमन्त्रणपदानां वीप्सात्रयेण सार्धं द्वादशासंख्या च पूरिता। अवशिष्टं मन्त्रांशमाह — परे सतीति। संबुध्यन्तपदानामुपरि चतुर्थ्यन्ते ऽप्युपदे च सतीत्यर्थः। चशब्देन मन्त्राणामादिभूत प्रणवोपरि मन्त्रमध्यगतनमः पदयोगः सूचितः। आज्ञापदेष्वपि वीप्सात्रययोगं वदन् तेषामादौ पुरुषोत्तमपदसंयोगमाह — मध्यनरान्ते च पर इति मध्यनरस्य मध्यमपुरुषस्यान्ते उत्तमपुरुषे पुरुषोत्तमे सति परे अन्ये आज्ञामन्त्राः स्युरित्यर्थः॥

अत्रायं द्वादशाङ्गमन्त्रप्रयोगक्रमः।

ओं नमो ह्रीं पराय पुरुषात्मने हृदयाय नमः।

ओं नमः क्लीं पराय सत्यात्मने शिरसे स्वाहा।

त्रयोविंशः पटलः

ओं नमः श्रीपरायाच्युतात्मने शिखायै वषट् ।
ओं नमः पुरुषोत्तमपराय वासुदेवात्मने क-
वचाय हुम् । ओं नमः प्रतिरूपपराय संकर्षणा-
त्मने नेत्राभ्यां वौषट् । ओं नमो लक्ष्मीनि-
वासपराय प्रद्युम्नात्मने अस्त्राय फट् । ओं
नमः ~~सक~~जगत्क्षोभणपरायानिरुद्धात्मने उ-
दराय नमः । ओं नमः सर्वस्त्रीहृदयविदार-
णपराय नारायणात्मने पृष्ठाय नमः । ओं
नमस्त्रिभुवनमनोन्मादकरपराय ब्रह्मणे
बाहुभ्यां नमः । ओं नमः समस्तपरमसुभग-
पराय विष्ण्वात्मन ऊरुभ्यां नमः । ओं नमः
सर्वसौभाग्यकरपराय नृसिंहात्मने जा-
नुभ्यां नमः । ओं नमः ~~सर्व~~ सर्वकामप्रदपरा-
य वराहात्मने पादाभ्यां नमः ॥ ३ ।

इति द्वादशाङ्गन्यासादिमन्त्राः॥

द्वादशाङ्गन्यासानन्तरं लक्ष्म्याद्याः सुदर्शनोक्ताः शक्तयो मूर्ध्नास्य हृद्गुह्यकण्ठनाभ्यक्षि सर्वाक्षि सर्वाङ्गेषु स्वां स्वीं स्वूं स्वें स्वैं स्वों स्वौं स्वः बीजयुता न्यस्तव्याः। अथाज्ञामन्त्रा वश्यादिक्रियासु पुष्पाञ्जल्यर्थ्या उच्यन्ते। ओं ह्रीं क्लीं श्रीं नमः पुरुषोत्तमामुच्यसुरासुरमनुजसुन्दरीजनमनांसि तापय तापय हुं फट् तुरु तुरु किं तिष्ठसि तावद्यावत् समीहितं मे सिद्धं भवति। हुं फण्णमः। इति तापनमन्त्रः॥

एवमेव दीपनशोषणमारणस्तम्भनद्रावणाकर्षणमन्त्रेषु प्रणवादि बीजचतुष्टय-

त्रयोविंशः पटलः

स्य नमस्तः पुरुषोत्तमपरत्यामुष्यसुरासुरमनुजसुन्दरीजनमनांसीत्यस्य दीपयेत्याविवीपयायां हुं फट् पट योस्तुरु तुरु इत्यादेश्च प्रयोगो द्रष्टव्यः। एते च मन्त्रा वश्याकर्षणेषु प्राधान्येन प्रयोक्तव्याः। मारणमन्त्रान्व्यतिरिक्ताः षण्मन्त्रास्तु वश्यादौ प्रयोक्तव्या इत्यन्ये। अथ मारणादौ प्रयोक्तव्या पाशनताडनभेदनहननमारणमन्त्रा उच्यन्ते —

ओं ह्रीं क्लीं श्रीं नमः। पुरुषोत्तमामुकं ~~[illegible]~~ अदस्य खड्ग[illegible]) पाशेन पद्धय. ह्रीं हुं फट् तुरु तुरु किं तिष्ठसीत्यादिर्बन्धनमन्त्रः। अथांकुशेन ताडय ताडयेत्यादिस्ताडनमन्त्रः। ओं ह्रीं क्लीं श्रीं नमः। पुरुषोत्तमामुकं चक्रेण गदया खड्गेन सर्वबाणैः भिन्द्धि भिन्द्धि।

हुं फट् तुरु तुरु। किं त्रिभ्रसीत्यादिर्भेदनम-
न्त्राः। तथा हन हनेत्यादि हननमन्त्राः। तथा मा-
रय मारयेत्यादिर्मारणमन्त्राः। इति। उक्तोऽर्थं चा-
पीति। पूर्वोक्तावाहनादिमन्त्रसमुच्चयार्थोपि
२५ शब्दः। शंखादिमन्त्रेषु पाञ्चजन्याय
नमः। कौमोदक्यै नमः। इत्यादिकमन्ते
प्रयोक्तव्यम्। न्यस्तैः द्वादशाभिरिति। नित्य-
पूजासु संनुध्यन्तैः द्वादशाभिर्नरगात्राम-
न्त्रैर्यथायोगमित्यर्थः॥

इति प्रपञ्चसारविवरणे
त्रयोविंशः पटलः

॥अथ चतुर्विंशः पटलः॥

विभूतिप्रदश्रीपुरुषोत्तमानन्तरं तथाविधमेव श्रीकरं विनियोगमाह — अथोच्यत इति। मन्त्रीति। तत्तलिङ्गुजितश्रीप्रयोग उक्तः।।१।। श्रीबाहुः श्रीकरः श्रीं बीजं स्वाहा शक्तिः। हरिरपीति। श्रीकरविष्णुरित्यर्थः। यान्तैर्हुमन्त्रैरिति, क्रमेणोभ्यान्तं श्रीघादीनां विप्रादिन्यासोऽप्यक्षरैः सार्थमेव कार्यः।।२।।३।। श्रिये यो मुकुन्द इत्यनेनैव श्रीवेव्याकह ध्यानमित्यवगन्तव्यम्।।४।।५।। मन्त्री पुनः हेमविधिमिति, जपपूजाहोमादिषु प्रणवश्रीबीजयोग उक्तः।।६।।७।। द्रव्यैस्तैरिति, श्रीदुग्धरसमिदादिभिः दीक्षाहोमाय कथितैरित्यर्थः।।८-९।। विभू-

विवरणे

प्रतिज्ञायार्थं वराहमन्त्रमाहाथेति। मन्त्रिणामभीष्टाप्त्यै इति अभीष्टविशेषेषु बीजविशेषयोगार्थः ॥१३॥ सुमतिरिति भूपतित्वमित्यत्र साध्यनामग्रहणमुक्तम्। ॥१४-१८॥ स्वल्पाम्बुवाहेति द्विभुजस्य ध्यानमुक्तम्। ॥१९॥ स्तम्भनशान्तिकवश्याद्युच्चाटनशून्यताकरणादिषु पृथिव्यादिषु बीजयुक्तस्य ध्यानविशेषानाह —— हेमप्रख्यमिति। एते च ध्यानविशेषाः सर्वमन्त्रेषु समानाः। सत्यसंस्थमिति मुमुक्षोर्ध्यानमुक्तम्। स्वस्वमहिमस्थमित्यर्थः। प्राणसंस्थमिति चार्थः। उल्लसत्कर्णिकामिति, वराहबीजविशिष्टकर्णिकामित्यर्थः। हूं बीजं, स्वाहा शक्तिः ॥२०॥ निधिवरदारत्नाढ्येति स्वरकेसरं चतुश्चतुर्वर्णलसद्दलाष्टकं बहिर्व्यञ्जनावेष्टितं भूको-

चतुर्विंशः पटलः

स्थ
गास्वबीजमारचयेत्यर्थः। ।२२-२४॥ एव काले इति प्रा-
तरेवेत्यर्थः। ।२५-२७॥ सितां गव्यैरिति, दशपलमितां
बिल्वादिपात्रस्थामित्यर्थः। मन्त्री मनुष्यपरत-
इति भूबीजसाहित्यमुक्तम्। ।२८॥२९॥ साध्येन मन्त्रील-
नेऽम
पि तथैव, स्यान्मन्त्रिण इत्यपि एवमेव हुवेम-
न्त्रीत्यपि। तथा शतं मन्त्रीति। वराहबीजयोग-
माह — मन्त्री विराध्यत इत्यस्मिन्नेव प्रयो-
गे बीजयोग उक्तः। ।३०-३६॥ अमुना तु साधितेनेति
ऋषिदेवते पूर्वोक्ते, गायत्री छन्दः। दीर्घयु-
ते
जा स्वेनैवाङ्गानि ॐ बीजं हं शक्तिः। ध्यानपूजा-
दिकं पूर्ववत्। ।३७-४३॥ तथा वराहीमिति साध्यादिनाम
प
सहितामित्यर्थः। ।४४॥४५॥ निक्षिपितां यथावदिति। गर्ते-
षु स्थितपाषाणादिषु आवाह्य संपूजयेत्।
इत्यर्थः॥ ४६-४८॥

॥इति प्रपञ्चसारविवरणे चतुर्विंशः पटलः॥

॥अथ पञ्चविंशः पटलः॥

वराहविध्यानान्तरं नृसिंहविध्यानं वक्तुं विनियोगमाह श्येति ।१। मन्त्री समस्तार्थदमिति । तत्तदर्थविशेषषु बीजविशेषयोगस्तु॰। हं बीजं ईं शक्तिः ।२-५॥ प्रसन्नां प्रतिपत्तिमाह —— ज्ञान्वोरिति । बाहुसंस्पृष्टकेशाद्रीति कण्ठेशश्च केशौ ।६॥७॥ क्रूरां प्रतिपत्तिमाह —— उद्यमीति, अन्तनुमिति । सूक्ष्मादिरूपमुत्क्रम । ।८॥ नरकी हमनुमिति मानसपूजा । सा च सर्वमन्त्रेषु समाना, ।९॥ निशादमीतिरित्याधारशक्त्यादीनां ध्यानं सूचितम् ।

पञ्चत्रिंशः पटलः

सम्यगीति मूलप्रकृत्यादिमन्त्रयोग उक्तः पीठपूजायाम्। स च सर्वत्र समानः। ।१०-१३॥ जपपरिपूर्तौ मन्त्रीति ब्रह्मद्वादशाक्षरपञ्चाक्षरगरुडपञ्चाक्षरानन्तं सप्ताक्षरादयः सूचिताः। द्विपान्ते तारं स्वाहेति गरुडपञ्चाक्षरं। आमन्तोऽनन्ताय नमइत्यनन्तमन्त्रः। ।१४-१६॥ सम्यगमुनेत्यृष्यादिकं सूचितम्। ब्रह्मा ऋषिः। गायत्री छन्दः नृसिंहो देवता दीर्घयुजा स्वनाङ्गानि क्षौं बीजं षं शक्तिः ध्यानादिकं पूर्ववत्। मन्त्रविदिति तत्तत्साध्यानुरूपबीजयोग उक्तः। ।१९-२०॥ मन्त्री जुहुयादथाप्स्विति, नृसिंहं भीषणमिति निष्कलमन्त्रेण इत्यर्थः। ।२२-३०॥ साध्यनाम मन्त्रितमङ्गेति, चक्षुषि नृसिंहबीजन्यास उक्तः। ।३१॥३२॥ साधयेन्मन्त्रीति, स्तम्भनादिषु पृथिवीबीजादियोग उक्तः॥ ३३॥

प्रोक्तमार्गेण मन्त्रीति रक्षायां नृसिंहबीजप्रयोग-
उक्तः। |३४-३९|| सुमतिरिति। श्रीबीजप्रयोगस्त्वाभि-
षेकध्याने कथिते प्राप्नुयान्मन्त्रजापीत्यनु-
जपउक्तः। षडक्षरस्य क्ष्रौं बीजम्। ह्रीं शक्तिः। |४०-४९|| भू-
तशान्तये मन्त्रीति मन्त्रजपसपञ्चगव्यप्राशना-
दिकं सूचितम्। |५०-५२|| मन्त्रप्यापीति श्रीबीजप्रयोग-
उक्तः। |५३-५७|| आशु मन्त्रीत्यभिलषितविशेषप्राप्तौ
बीजविशेषप्रयोगउक्तः॥ ५८।

॥इति प्रपञ्चसारविवरणे
पञ्चविंशः पटलः॥

॥अथ षड्विंशः पटलः॥

नृसिंहविधानानन्तरं रक्षाकरत्वसाम्या-

षड्विंशः पटलः

त्र विष्णुपञ्जरविधानमाहाथ । संप्रतीति — रक्षाकरत्वमाह — जितवानिति, ॥१॥ विष्णुपञ्जरयन्त्रं तावदाह — शङ्केरीति, ~~॥२॥~~ मण्डलाग्निवृत्तत्रिकोणचतुरस्राणि, ॥२॥ अथ्यिकमंशमाह — विष्णुमिति, विष्णुं मकारमित्यर्थः । तस्याबिन्दौ विश्वरूपविष्णुरपि लेखनीयः । तस्य हस्तेषु वक्ष्यमाणायुधधारणक्रमेण षोडशाक्षराक्षराण्यपि लेखनीयानि, कपोलयोरिति अकारहकारभागद्वन्द्वयोरित्यर्थः । विह्वराह शब्दाभ्यामेव तद्बीजे उक्ते, तत्राकारकपोलयोः लेखनीये बीजे इति तु हकारकपोलयोः गरुडचक्रबीजलेखनमुत्क्रमम् । तद्विश्वरूपेति । तच्छब्देन मध्यमबीजमुक्तम् ॥ ३॥ विश्वरूपमन्त्रमुद्धरति । तारमिति । ओंबी-

विवरणे

जं, नमःशक्तिः। चक्रादिमन्त्रेषु षोडशाक्षराक्षरयोगं सूचयति, तद्वर्णविकारजाता इति। याभिरिति, कारणसूक्ष्मस्थूलरूपाभिः भगवद्भुस्तवेष्टनबीजपत्रदलादिस्थाभिरित्यर्थः ॥४-६॥ यन्त्रस्य बीजेष्विति वेष्टनशक्तिबीजेष्वित्यर्थः। विदूरानिति चित्रकर्मस्वित्यर्थः। मन्त्रैः सहितामिति ललाटे तत्तन्मन्त्रांश्च लिखेदित्यर्थः। ॥७॥ अक्षिष्विति, अक्षिगतबीजबिन्दुष्वित्यर्थः। सिंहवराहमूर्त्योस्तु लेखनं शक्तिवेष्टनपूर्वापरभागयोः गरुडचक्रमूर्त्योस्तु शक्तिवेष्टनबाह्ये नृसिंहस्याग्रे ॥८॥ चक्रादिमन्त्रानुद्धरति। सप्रणवेति, नमो योगादेव भगवद्विष्णुपदयोश्चतुर्थ्यन्तत्वमवगन्तव्यम्। स्वा व्याख्यानं स्वस्य चक्रादेराख्यानं ततश्च ओं नमो

भगवते विष्णवे चक्रइत्येतत् सिद्धं भवति। स्वाख्यानमूर्तीति। स्वाभिमुख्यार्थे आख्यानं स्वाख्यानं तेन सहिता मूर्तिः स्वाख्यानमूर्तिः संनुध्यन्तो मूर्तिशब्द इत्यर्थः। स्वस्य स्वाध्यकख्याख्यानं स्वाख्यानं। शोभनप्राप्त्यर्थमाख्यानं स्वाख्यानं मां रक्षेत्याख्यानमित्यर्थः। सुतरामाख्यानं स्वाख्यानं रक्षरक्षेति वीप्सेत्यर्थः। ततश्च चक्र मूर्ते मां रक्षरक्षेत्येतत् सिद्धं भवति, स्वाख्यानमूर्तिधरयुक्ताः सेनापतिसहित सहिता इति स्वाख्यानयुक्ताः स्वाख्यानमूर्तियुक्ताः स्वाख्यानमूर्तिधरयुक्ताः। स्वाख्यानमूर्तिधराः सेनापतिसहिता इत्यन्वयः। तत्र स्वाख्यानयुक्ता इत्यस्यायमर्थः। ओं नमो भगवते विष्णवे चक्रायेत्यादीनि

स्वाख्यानानि तैर्युक्ताइति स्वाख्यानमूर्तियुक्ताइत्यस्यायमर्थः। उक्तमन्त्रान्ते चक्रमूर्त्तये. इत्यादि योजयेदिति, ततःपरं चक्रमूर्तिधरायेत्यादि योजयेत्। ततःपरं चक्रमूर्तिधरस्सेनापतये इत्यादि योजयेदित्यवशिष्टस्यार्थः॥६॥

निगमन्त्रानुद्धरति —— सहस्रारे इति। पोत्रं धृतधरं त्रिद्रूनीति वराहबीजयोगमिदुर्वित्यर्थः। विषवभिरव्ययोरन्तरेति, विष्णवे पोत्रधृतधराय महावराहायेति क्रमेणेत्यर्थः। मन्त्रीति महावराहस्यान्ते योगइत्यर्थः। नारसिंहे पुनः सुधीरिति नृसिंहबीजयोगइत्यर्थः। नृसिंहात् प्रागिति महानृसिंहाय नमइत्यतः पूर्वमित्यर्थः। नृसिंहमन्त्रं समापयेदित्यनुष्टुभोन्ते योगउक्तः। विष्णो-

न्त इति विष्णवे महापक्षिराजायेत्यादि क्रमे-
णोच्चारेदित्यर्थः। विदूद्धिरिति महापक्षो-
।१०-१९॥
गरुडकः। अग्नीषोमात्मकमिति। दक्षिणाधो-
हस्तमारभ्य पञ्चमे पञ्चमे हस्ते चक्रादिच-
तुष्टयं दक्षिणाधस्तृतीयहस्तमारभ्य पञ्च-
द्वितीय
मे पञ्चमे शंखादि चतुष्टयं दक्षिणाधोहस्त-
मारभ्य एकैकान्तरितहस्तेषु दण्डाद्यष्टक-
धाव ।२०।२१॥
मित्येवमायुधध्यारणक्रमः। क्रमशो विद्धा-
।२२-३२॥
निति वासुदेवादिमन्त्राः सूचिताः। संयतात्म-
कोमन्त्रीति केशवादीनामुक्ता मन्त्राः सूचि-
ताः। वन्हिमूर्तिग्रहणंपि हृदीनामप्युपल-
।३३-३६॥
क्षणम्। विष्णोर्मनुर्विश्वरूपमन्त्रः। पृथक्पृ-
चक्र मूर्ति
थङ्मन्त्रीति वराहनृसिंहगरुडमन्त्रैरपि होमं
॥३७॥ त्यादि
सूचयति — हुनेन्मतिमानिति। आद्यो प्रण-

।३८-४०॥

नेन होम उक्तः। सुमतिरारभ्येदिति। चक्रमनोरूर्ध्वं प्रणवशक्तियोगज इत्यर्थः। ।४१॥ विष्णुः प्राच्यादिक्रमश्च जपेदिति. त्रिष्टुबनुष्टुब्गायत्री गीता त्रिष्टुबित्यस्वरूपषोडशाक्षराणां सकृत्सकृत् जपानन्तरं शतानीकउवाचेत्यारभ्य तन्निबोध महीपत इत्यन्तः सकृज्जप्त्वा त्रिष्टुबादिमन्त्रषट्कं त्रिवारमावर्त्यानन्तरमित्यथशब्दार्थः। षोडशाक्षराक्षरस्वरा। हृन्नृसिंहशंखचक्रबीजैः सप्रणवशक्तिभिः सह तेषां जपः कार्यः। अयमत्र प्रयोगक्रमः। ओं ह्रीं ओं विष्णुः प्राच्यां स्थितश्चक्री ओं ह्रीं नं विष्णुर्दक्षिणतो गदी, ओं ह्रीं मों प्रतीच्यां शार्ङ्गधृग्विष्णुः ओं ह्रीं भं विष्णुः खड्गी ममोत्तरे ओं ह्रीं गं हृषीकेशो विकोणेषु ओं

षड्विंशः पटलः

ह्रीं वं हृषीकेशो विकोणेषु ह्रीं फट् तच्छिद्रे ओं ह्रीं यान्तच्छिद्रेषु ओं ह्रीं हान्तच्छिद्रे ह्रीं तें हृषीकेशो विकोणेषु ओं ह्रीं वां हृषीकेशो ओं लुं तच्छिद्रेषु जनार्दनः ओं ह्रीं वें तच्छिद्रेषु ओं ह्रीं वां तच्छिद्रेषु ओं ह्रीं यान्तच्छिद्रे ओं ह्रीं हुं तच्छिद्रे फट् अच्छिद्रेषु ओं ह्रीं स्वांतच्छिद्रेषु ओं ह्रीं हान्तच्छिद्रेषु ओं ह्रीं ध्रुं क्रोडरूपी हरिर्भूमौ ओं ह्रीं क्ष्रौं नरसिंहोम्बरे मम ओं ह्रीं क्ष्रौं विष्णुरग्रेऽपिपो गरुडः ओं ह्रीं रं विष्णुरग्रे स्थितं चक्रीमिति विद्वान्मन्त्रांस्त्रिवारं जपेत् । नरसिंहोम्बरान्तामिति, नृसिंहमन्त्रस्य पञ्जरकल्पनामन्त्रो ह्यन्यत्वमुक्तम् ॥

ननु ततः परं पञ्जररक्षकमन्त्राभावोऽन्त-

विवरणे

शब्देन सिध्यति, यतः तल पुनरपीति, मन्त्रादूर्ध्व-
संख्यात्वं सूचयति। तथा पञ्चविंशत्येकविंशा-
दिति विश्वरूपमन्त्रेण सार्धं चक्रादिचक्रा-
न्तानेकविंशतिमन्त्रान् पञ्चपञ्चवारं जपेदित्यर्थः।
तत्र विश्वरूपमन्त्रं ओं नमो भगवते विष्ण-
वे विश्वरूपमूर्त्ते मामित्यादिको ग्राह्यः॥
पूर्वोक्तविश्वरूपमन्त्रेण च सहाद्यं पञ्चवारं
प्रथमतो जप्यः। ततश्चक्रादिमन्त्राः विमल-
शितमीतिरिति पञ्चजराकाराणां तद्रक्षकाका-
राणामायुधादीनामाधारभूतानां त्रिष्टुभा-
दीनां ध्यानमायुधानां मुद्रापूर्वकं जपः
त्रिष्टुबादिप्रतिलोमजपश्चेत्यादि सूचितम्॥ ४५॥
॥४३-४५॥
चक्रमन्त्रमुद्धरति। ओं नमः इति विश्वरूपत्रि-
ष्टुबादीनामपि पञ्चपञ्चवारं जपमाह——

पूर्वमिति । विश्वरूपचक्रादिमन्त्रजपात् पूर्वमित्यर्थः । त्रिष्टुबादिजपक्रमं च सूचयति — विध्यानिविदिति ।४६॥ चक्रादिमन्त्रेष्वपि गीता त्रिष्टुबादियोगमाह — योजयित्वेति ॥४७॥४८॥ सुधीरिति । गाथाचक्रमन्त्रेष्वपि गीता त्रिष्टुबादियोगः इत्यर्थः । पादपूर्वोत्तरभागयोर् अष्टाक्षरस्य सुदर्शनस्य च क्रमेण योगमाह — मन्त्रमिति । जपेन्मन्त्री विध्यानिविदिति सुदर्शनानन्तरं प्रणवशक्तिषोडशाक्षराक्षरादिबीजन्यस्तोद्गाय्योगः इत्यादिकं दर्शितम् ।४९॥ अयमत्र मन्त्रप्रयोगक्रमः । ओं ह्रीं रं विष्णुरक्षे स्थितं चक्रमित्यन्तमुक्तप्रकारेण त्रिवारं जप्त्वा षोडशाक्षरादि मन्त्रषट्कं त्रिवारमावर्त्य हुंरान्तमित्यादि विष्णुचक्ररयाहता इत्येकवारं

मे

जप्त्वा षोडशाक्षरादिमन्त्रषट्कमध्येकैकवारं जप्त्वा जपित्वा त्रिष्टुबादिमन्त्रषट्कं पञ्चवारमावर्त्य ओं नमो भगवते विष्णवे विश्वरूपमूर्ते मामित्यादिविश्वरूपमन्त्रमपि पञ्चवारं जपित्वा चक्रादिचतुर्विंशतिमन्त्रान् पञ्च पञ्चवारमावर्तयेत्। ओं नमो नारायणाय स्थाने हृषीकेश तव कीर्त्या प्रकीर्त्या सहस्रारं हुं फट्। ओं ह्रीं ओं विष्णुः प्राच्यां स्थितश्चक्री ओं नमो भगवते। विष्णवे चक्रमूर्ते। मां रक्ष रक्ष। ओं नमो भगवते विष्णवे चक्राय चक्रमूर्तये चक्रमूर्तिधराय चक्रमूर्तिधरसेनापतये सहस्रारं हुं फडिति चक्रमन्त्राः। एवमन्येऽपि मन्त्रा ऊह्याः। एवं रक्षां कृत्वाङ्गुष्ठादिकं विन्यस्योपसंहरेदिति

शरीररक्षाप्रकारमभिधाय वास्त्वादिर-
क्षाप्रकारमाहाग्नेयेति विधानप्रकारमाह—
॥५०॥५१॥
मध्य इति, हस्तागाधानिति, मध्यव्यतिरि-
ननु त्रि
क्तानां परिमाणानामकथनं मध्ये इतरत्र
मून
हस्तेन त्रिभौमो भाव्यम्। वराहनृसिंह-
योरपि तत्रैव प्रतिष्ठायां वक्ष्यमाणत्वात् एकोन-
इ
विंशतिकुण्डानि कार्याणि, चक्रस्य पुरतो ग-
न मात्र
रुडस्यापि हि स्थापनमत्र विवक्षितम् ॥५२-६५॥
अपरत्रा नरे कथा केति एवंविधवाक्यानुपरी-
ई
तमिन्द्रमपि अरक्षत्। ततोऽन्यवशानुं नरं र-
क्षितुं सामर्थ्यमस्तीति का कथेत्यर्थः॥ ६६॥

॥ इति प्रपञ्चसारविवरणे
षड्विंशः पटलः॥

श्रीः

॥अथ सप्तविंशः पटलः॥

वैष्णवविध्यानानन्तरं शैवं विधानं वदन् शैवागमसारस्य प्रासादस्य विधानं सप्रयोजनं वक्तुमुपक्रमते। अथेति ॥१॥२॥ देवतेशाः स्युरिति, सदाशिवइत्यर्थः। ॥३॥४॥ मन्त्रविद्वक्ष्यमाणान्न्यासानिति अंगुष्ठाभ्यां नमइत्यादियोगरूढैः। ताभिरेवाङ्गुलिभिरित्यस्य मूर्धाननादिषु विन्यसेदित्युत्तरत्रान्वयः। ॥५॥ ईशानादिमन्त्रान् विहाय देवतानामभिर्वा बीजवर्गहितैः न्यासइति मन्त्राणां देवतानामानि कथयति। ईशानइति। ॥६-९॥ अष्टपत्रमिति मध्ये प्रासादं कं केसरेषु स्वरान् दले अष्टाक्षरं तद्बहिः वृत्ते व्यञ्जनानि पार्थिवकोणेषु प्रासादं लिखेत्।

सप्तविंशः पटलः

तद्बहिः गुणवृत्तादिकं लिखेदित्यर्थः। ॥२०॥ पीठशक्तीराह — स्वामेति ॥२२-२३॥ न्यासक्रमेण मन्त्रीति पूजायां पञ्चाक्षार्थेन्तत्वमुक्तम्। पूर्वोक्तदिङ्क्षिवेति, ऊर्ध्वे प्रागित्यत्रेत्यर्थः। ॥२४॥२५॥ क्ताः प्रोक्तः सर्व इति पक्षान्तरं बाहुभिः खेटाभयवरदकुठारधराक्रान्तास्मिन् पक्षे सर्वो देवः स्वयमपि शूलडमरुकवराभयधरोऽस्मिन् पक्षे पक्षान्तरमाश्रित्य ईशानस्य ध्यानमाह — मुक्तागौरेति सद्यादीनां स्वरूपमाहाम्बुजन्मेति मूर्त्यावरणाद्बहिरंगावरणं द्रष्टव्यम्। ॥२६-२८॥ प्रासादविधानमभिधाय तदवयवभूतानां पञ्चब्रह्मणां विधानमाह — वक्ष्यामीति। शशिन्यङ्गदेष्टदा मरीच्यंशुमालिन्यः ईशानकलाः निवृत्याद्याक्रान्तस्रस्तत्पुरुषकलाः॥

तमो मोहा क्षया निद्रा व्याधिर्मृत्युः क्षुधा तृषा ।
इति अघोरकलाः ॥

रजा रक्षा रतिः पाल्या कामा संयमिनी क्रिया ।
वृद्धिः स्थिरा च रात्रिश्च भ्रामिणी मोहिनी ज्वरा ।

॥ इति वामदेवकलाः ॥

वृद्धिः सिद्धिर्द्युतिर्लक्ष्मीर्मेधा प्रज्ञा प्रभा सुधा ।

॥ इति सद्योजातकलाः ॥

एताश्च पञ्चब्रह्मकलाभिः सार्धं न्यस्तव्याः ।

अतस्तैः सार्धं वक्ष्यामीत्याह — सपञ्चभिरिति ।२५-२६॥ इन्द्रियस्यारसमेतमिति ता, ऐं हैं श्रीं ह्रीं ह्सखफ्रें ह्सौः सर्वेशाय सर्वात्मने हृदयाय नमः । इति हृन्मन्त्र इत्यर्थः । पञ्चप्रणवयोगः शिरआदिष्वपि समानः तृतीये इत्यत्र पूर्वे (शौवस) नित्यपदं म योज्यमित्याचार्याः ॥ अत्रापि श्रीरित्यस्यानन्तरं

·᳡· अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यश्च

सप्तत्रिंशः पटलः

ह्रीमिति योज्यम्। मन्त्रवित्तमैरिति प्रणवशक्ति-
प्रा
प्रसादयोगः पदविभागश्च कथितः॥"ईशानः
सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधि-
पतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदा-
शिवोँ॥"

"तत्पुरुषाय विद्महे महादेवाय धीमहि।
अथ रेभ्यः
तन्नो रुद्रः प्रचोदयात्॥ अघोरेभ्यः घोरः
श र्व
घोरतरेभ्यश्च सर्वतः सर्वसर्वेभ्यः नमस्ते अस्तु
रुद्ररूपेभ्यः। वामदेवाय नमः। ज्येष्ठाय नमः।
लाय
रुद्राय नमः। कालाय नमः। कल नमः। विक-
लाय
रणाय नमः। बल नमः। विकरणाय नमः।
बल प्रमथनाय नमः। सर्वभूतदमनाय नमः।
मन नमः। उन्मनाय नमः। सद्योजातं प्रपद्यामि
सद्योजाताय वै नमः। भवे अभवे अनादिभवे

भजस्व मां भव उद्भवाय नमः। ।२७-३१॥ न्यासक्रममाह। दिक्ष्विति। शिरोदिक्ष्वित्यर्थः। ऐन्द्रेत्यादिना — वक्त्राणि तत्पुरुषन्यासस्थानान्युच्यन्ते। हृदीत्यादिना घोरकला न्यासस्थानानि गुह्येत्यादिना वामकला न्यासस्थानानि पद्द्वोरित्यादिना सद्योजातकला न्यासस्थानानि अङ्गुलीभिरित्यङ्गुष्ठाद्यङ्गुलीभिः क्रमेणेशान् नादि कलादि न्यसेदित्यर्थः। ओं ह्रीं हौं नमः शिवाय ईशानः सर्वविद्यानां शशिन्यै नमइत्यादयो मन्त्राः। ॥३२-३४॥ पञ्चब्रह्मणि ध्यानमभिध्याय तदात्मकस्य पञ्चात्मकस्य क्षर विधिं वदन् विनियोगमाह — पञ्चाक्षरेति, जपतामिति पञ्चाक्षरमन्त्रो सर्वेषामधिकार उक्तः। न केवलं प्राप्तिमात्रेणेष्टसिद्धिः।

न्तु
किन्त्वस्याधितेनैवेत्याह — सिद्धेनेति ॥२५॥
प्रणवस्य भूतयोन्यात्मत्वमितरेषां भूतात्म-
र न्यो
त्वं च वदन्त्या सावौ मन्त्रविशेषानाह —
नि
तारादीति, अनेन चाक्षरतत्वन्यासः सूचि-
।२६॥२७॥
तः। पूर्वमिति प्रासाद इत्यर्थः। अं बीजं, आद्य-
।२८-४९॥
शक्तिः। मन्त्रमिदं सुधीरिति, मन्त्रार्थगतमान-
।५०-५१॥
सइत्यर्थः। मन्त्रो पुष्पाञ्जलिमि[illegible]ति, मूल-
तप्र
मन्त्रप्रयोगमाह — सम्यगिति, स्वप्रतिपत्तिकामि-
।५२-६६॥
त्यर्थः। शक्तिपञ्चाक्षरविधानमाह — अमुमेवे-
ति, ह्रूमादियुक्तेन षडक्षरेणाङ्गानि ऋष्या-
ह्रीं
दिकं पूर्ववत्, ओं बीजं, शक्तिः। अष्टाक्षर-
वमेव
स्याप्येवं बीजशक्ती। पञ्चार्णोक्तान्यङ्गानि,
इति ग्ना (ह्रू)मादियोगबाधकं न भवति ॥६७-७३॥

इति प्रपञ्चसारविवरणे सप्तविंशतिः पटलः ॥

श्रीः

।अथ अष्टात्रिंशः पटलः॥

एवं पञ्चवक्त्रस्य शिवस्य मन्त्रानभिधाय दक्षिणवक्त्रप्रधानं सौम्यमन्त्रमाह— अथ प्रवक्ष्यत इतीष्टः ति विनियोग उक्तः। ओं बीजं ह्रीं शक्तिः। |१-५॥ मन्त्री कुर्यादिति सर्वत्रादियोग उक्तः। |६॥ द्वाभ्यां मन्त्रविदिति प्रणवशक्त्योः सर्वत्र योगं जानन्नित्यर्थः। |७॥८॥ कृतसन्दीक्षो मन्त्रीति शक्त्यनन्तरं पञ्चाक्षरयोग उक्तः॥९॥ द्वयेनापीत्यपिर्वार्थः। |१०॥११॥ दक्षिणवक्त्रप्रधानमेवाग्नेयं मन्त्रमाह— जीवेति। |१२-१५॥ विग्रहे मन्त्रीति न्यासमन्त्रेषु प्रणवशक्त्यादियोगार्थः। हुं बीजं ह्रीं शक्तिः। |१६-२०॥ पूजाया मन्त्रमाह— हृल्लेखेति। साध्याक्षरमिति। साधकाद्यक्षरमिति

k 736

अष्टात्रिंशः पटलः

वी
साधकाद्यक्षरस्योपलक्षणम्। कलावेष्टितमि-
ति, स्वरवेष्टितमध्यबीजमित्यर्थः। अन्ये स-
कलक्षयाक्षरोल्लसितमिति, अन्ये दले सह-
लक्षयाक्षरोल्लसितमिति। अन्ये दले सह-
लक्षयाक्षरोल्लसितं क्षयाक्षरं क्षकारः उक्तं
हि भुवनं क्षतइति। स एव लकारेण सह वर्तत
इति सह लक्षयाक्षरं तेनोल्लसितमित्यर्थः।
यत या
अथवा हकारलकाराभ्यां सहवर्तमानं क्ष-
क्षयकारः न्ये सितं। अ
कार तेनान्येन उल्लसितमित्यन्ये दलेऽक्षर-
।२१॥२२॥
त्रयलेखनमनेन दर्शितम्। समाप्य मण्डल-
मिति वृत्तराश्यादिकं बहिः कल्पयितेत्य-
।२३॥
र्थः। परिस्फुरणं सिद्धेः। मन्त्रीति प्रणवशा-
।२४-२६॥
क्तिपुटितत्वमुक्तम्। मन्त्री मयूरीति। शक्य-
।२७-३०॥ स्य
नन्तरं चिन्तामणियोग उक्तः। शिवस्यैवोर्ध्व-

जूं

*- ल्यूं बीजं सः शक्तिः ।।३२।। स्फटिकरजतमुक्तावर्णामिति। एकैकाक्षरप्रधाने-
ष्ववक्ष्यमाणेषु ध्यानेष्वपि वर्णविशेष उक्तः। ।३३।। गुर्वादेशादिति। द्रव्यदेव-
तैकन्नालमुक्ताम्। ।३६।। सम्यक् पूजावस्तुभिरिति। अमृतमयैरित्यर्थः।

विवरणे

।३१।।
वक्त्रप्रध्यानं मन्त्रावयेमा ह खसप्तमङ्गेति। अ-
हृस्व
ङ्गान्यथाचरेत्। भृगुणेति। नाभिहृद्भ्रूमध्ये-
हृस्व
ष्वक्षरन्यासानन्तरं दीर्घस्वरयुतेन भृगुणा-
ङ्गान्याचरेदित्यर्थः। मन्त्राप्यापीति। मन्त्राम्ना-
आर्च हृस्वरस्य *
ताः। मन्त्रे वीता न मन्त्राप्यापीत्यनेनार्चां वि-
शिनष्टि। शिवपदादाविर्भूय तत्रैव विली-
मायया येच्छा ।३४।।
नयामृतमय्यार्चा कार्येत्यर्थः। वक्ष्यमाण-
।३५।।
मन्त्रेणार्चा कार्येति भावः। मन्त्रोक्तमूर्तिवि-
हिततनुरिति। मन्त्रगततत्तदक्षरानुगतह्र-
राते। ~~संयोगस्य~~
स्वस्वरपञ्चकेन सार्धमक्षैरीशानादिमूर्तिभि-
र्विहिततनुरिति प्रणवादिप्रध्यानयोगेषु न्या-
सविशेषाः कथिताः। तत्र प्रणवप्रध्यानयोगे
शङ्कादि
ओं ऐं उं हं अं इति बीजैः सार्धमीशानादिमू-
र्तिभिः स्थूलवक्त्रान्यासं कुर्यात्। वोमित्यादि-

अष्टात्रिंशः पटलः

स्वौ
भिः सार्धं वा । इतरयोस्तु योगयोर्व्वौं स्यौं-
मित्यादिभिः सार्धं न्यासः कार्यः । सर्वैः सार्धं
।२६॥
समष्टिमूर्तेरित्यर्थोसि क्रमेतत् । प्रणवप्रख्या-
क्रमेत
नं योगमाह —— तारेति, क्रमात् क्रमादित्यू-
र्ध्वाधोमुखपञ्चद्वयं क्रमोत्क्रममन्त्रात्मकं
चिन्तनीयमित्युक्तम् । चिन्तयेन्नियतमन्त-
रा शिवमिति, नियतमन्तरा नियतस्य नित्य-
स्य मायाबीजस्यानुलोमविलोममन्त्रमध्य-
स्थितस्यान्तरा मध्ये शिवं पञ्चाक्षरमि-
त्यर्थः । ततो ध्यानार्थमौं नमः शिवाय ईमिति
मन्त्रः सूचितोऽनुलोमविलोममध्येऽत्र च शिवः
स्फटिकनिभः स्त्रीरूपो वीणावादनपरो
।२७॥
ध्येयः । अस्मिन्नेव योगे मन्त्रान्तरं शिववा-
चकमाह —— ऊर्ध्वाधइति, पूर्ववत् पञ्चद्वयं

बिवरणे

संकल्प्य दलेष्वप्यक्षरत्रयं लेख्यमित्याह—दलनिचितैरक्षरैरिति ॥ स्वरविशिष्टानामक्षराणां लेखनं कर्तव्यमित्याह—— आद्यन्तैरिति। अ आ इत्याद्यन्ते येषामक्षराणां तान्याद्यन्तानि। तैरित्यर्थः। तस्मात् प्रणवसंबन्धिभिः स्वरैः केसरस्थाने संवेष्ट्य जकारसंबन्धिभिः स्वरैः दलमध्ये वेष्टयित्वा सकारसंबन्धिभिः स्वरैः दलाग्रे वेष्टयेदित्यर्थः। पूर्वोक्तपक्षेऽपि समानमेतत् वेष्टनत्रयं ईशानं सूक्ष्मरूपमिति मन्त्रविशेषमाह—इकारः सूक्ष्मशब्दार्थः। तत ईं ईशानाय नमः ईं इति मन्त्रः सिक्तो मुक्तोमीवत्नामध्ये। अत्र तु शिवो वीणावादनपरो ध्येयः। ।३८॥ वाद्यप्रयोगांगं यन्त्रमाह—आद्यौ तारमिति। ३९-४२॥ होमकाले प्रतिपत्तिमाह—

अष्टाविंशः पटलः

॥४३-४४॥

तावत्संख्यैरिति मध्यबीजप्रध्यानमान्तरं योग-
माह —— मन्त्रान्त इति, मन्त्रमपि प्रोक्तं प्रतीपं
प्रतिलोमं समापयेदित्यन्वयः। पाल्लवेत्यस्या-
न्ते ज्वीं नमः। शिवाय ज्वीमित्येतन्मन्त्रमुक्तं
प्रतिलोममुच्चरेदित्यर्थः। रजतवर्णां मुद्रापुस्त-
कधरां देव्यत्र ध्येया, पुनः पूर्ववद्धकारत्रयवि-
शिष्टषोडशस्वरयुक्तं पञ्चद्वयं सन्निवेश्य तन्म-
ध्ये मुद्रापुस्तकधरं शिवं सन्निवेश्य पाल्लवा-
न्ते ज्वीं ईशानाय नमः ज्वीमिति जपित्वा प्र-
तिलोमं जपेदिति मध्यबीजयोगः। ॥४५॥ तृतीयबी-
जप्रध्यानं योगादिकमाह — अध्येवेति। कमलद्व-
यं वर्णद्वयं स्वरविशिष्टमन्त्राण्यनुलोमविलोम-
मन्त्रात्मकं द्रष्टव्यम्। स्विं नमः शिवाय स्वीमिति
देवीमन्त्रः स्विं ईशानाय नमः स्वीमिति देवमन्त्रः।

विवरणे

तत्र त्रिवर्षं दिग्वाससं विचित्रकिङ्किण्याद्यलंकृतं वामहस्ते अर्धेन्दुधरं तमेव दक्षिणहस्तेन भक्षयन्तं मुक्तावर्णं देवं देवीं च ध्यायेत्। अर्धनारीश्वरो वा सर्वत्र ध्येयः। इति ॥४६-५१॥ मन्त्री विदध्याद्दशाहुतीरिति पञ्चाक्षरप्रयोग उक्तः। ॥५२-५४॥ प्रणवान्ते यो मन्त्रीति। प्रणवान्ते शक्तिबीजप्रयोग उक्तः ॥५५॥

॥ इति प्रपञ्चसार विवरणे अष्टाविंशतिः पटलः॥

॥अथ एकोनत्रिंशत्पटलः॥

ॐ पूर्ववक्त्रप्रधानमन्त्रानन्तरमुत्तरवक्त्रप्रधानं मन्त्रं वदन् विनियोगमाह ध्या-

※ अर्धनारीश्वर देवतापक्षेऽप्याह हावभावेति पुरश्चरणे नित्यपूजादौ

एकोनत्रिंशः पटलः

जपहुता

सञ्जापाद्य इति, ॥१॥२॥ उमेशदेवतापक्षे ध्यानमाह — अ हीति, ॥३॥※ अर्धनारीश्वरध्यानं नियमयति — चापविध्याविति, ॥४॥ क्रूरप्रयोगे ध्यानमाह — अध्वेति, ईं रं बीजं, औं शक्तिः। ॥५॥ मतिमानिति उन्मन्यन्तं व्याप्नोतीत्यर्थः। ॥६॥ अङ्गपदैर्यथावदिति, सर्व संज्ञादियुक्तैरित्यर्थः। मुखाद्यैरिति वृं वृषभाय नमः। इत्यादिप्रकारेण मुखाक्षराद्यैरित्यर्थः। ~~पारस्परयन्तक स्थान इ~~ अथवा देवस्याग्रमारभ्य पूजयेदित्यर्थः। ॥७॥ अर्धनारीश्वरध्यानपक्षे वृषभादिस्थान आवरणान्तरमाहारभ्येति ॥८॥ — कापूर्वमिति, रेफं परित्यज्य तत्स्थानइत्यर्थः। प्रासाद्यादित्वमपि तथैव ॥९॥१०॥ निजवर्णविकीर्णेति निजशब्देन वैश्वानरो मूलमन्त्रस्थो ग्राह्यः। अतः सर्वकोणेष्वग्निकोणं लिखित्वा तेषु

4e/+.

विवरणे

बीजेषु मूलाधाराणि षट्कोणपूर्वकोणमारभ्य लिखित्वा मध्यगताग्निबीजे बिन्दौ मूलं लिखित्वा तत्र वक्ष्यमाणक्रमेण मकारसंबन्धे रेफोदरे साध्यं कोणोदरे मोदरे वा साधकं साधकांशो कर्म चा निक्षिपेदिति सिद्धम्। ॥२२-२४॥ सन्तृप्ये मन्त्राविति। चकारयोगान्ते पञ्चाक्षरयोगश्चोक्तः। वातेनेति कामचानुपातेनत्यर्थः। ॥२५॥ निजवाञ्छयैव मन्त्रीति मूलाधारगतमन्त्रात्मनौ साध्यप्रक्षेप उक्तः॥२६॥२७॥ शीतलया मानस इति योनिस्थमन्त्ररज्ज्वा बद्धस्य तस्यामानसस्य लिङ्गं निसृतं कुण्डलीशतयाकर्षणध्यानमुक्तम्। ॥२८॥ स्रावयन्तीति यस्य प्रतिबन्धदृष्टः। शुक्रस्य रक्तस्य वा तदाकारे पृथिवीबीजस्थमर्णं चिन्तयेत्।

एकोनत्रिंशः पटलः

इतरत्राग्निबीजस्थं तत इष्टं भवतीत्यर्थः। ॥१८॥
उभयोरपि सहृक्षरणार्थमन्यमृतरक्ष्यः। प्र-
योगान्तरमाह— निजशिवेति, त्रिकगमिति,
त्रिकोणगतमित्यर्थः। हुताशयुगमकंषट्-
कोणं हुताशयुगषट्कं तेन वृतमित्यर्थः। ॥१९॥२०॥
अत्रापि कोणेषु मन्त्राक्षरयोगो द्रष्टव्यः। तथा
विभज्येति सव्यपादसव्यपार्श्वसव्यहस्तशि-
रोदक्षिणहस्तपार्श्वे दक्षिणपादे जुहुयात्॥ ॥२१॥
स्त्रीवश्ये पुरुषवश्ये तु विपरीतमित्यर्थः। वि-
षपावको मकारसंबद्धो रेफः। तस्मिन्नुद्धृते-
न साध्यसाधकाभिधानेन निगदनं संपु-
टकमित्यर्थः। ॥२२॥ सुमतिरिति बिन्दुलक्षणेन
दै निशेषेण तस्य जीवं रक्षाग्निक्षोभ्यमुक्तम् ॥२३॥
कृत्वा वन्हेः पुष्करमिति बन्धुजीवपुष्परसेन

विवरणे

भूमिं विलिख्य तत्र तद्रसेन तत्पुष्पेण त्रिकोणं
लिखित्वा तन्मध्ये मन्त्रं च विलिख्याह्वन्ध्या-
ध्यानादिकं कुर्यादित्यर्थः। अत्र लोहत्रयमपि
।२४-२६॥
मूलाक्षरसंख्यं ग्राह्यम्। बिम्बदुन्दु इति
~~।२७।२८॥~~
बिम्बदुन्दुमध्य इत्यर्थः। तदाग्रेष्वन्तरालेषु
यथावीदिति पूमिति चकारेण स्वार्थमित्यर्थः। च
न ।२७॥२८॥
कुगृहे च नृसिंहबीजं लिखितव्यम्। दहनपु-
रयुगे युगमध्य इत्यर्थः। तदपिष्वन्तरालेषु
चैनं पूर्ववल्लिखित्वा नेमिबाह्येऽग्निज्वाला-
।२९।३०॥
श्च लिखेदित्यर्थः। महेश्वरस्य मन्त्रानभि-
ण
धाय चण्डेश्वरस्य मन्त्रमाह— विष्णुतिचं
।३१-३३॥
बीजं फट् शक्तिः। मन्त्री जप्यादिति प्रणव-
।३४-३७॥
योग उक्तः। मन्त्री लोकेश्वरीति चण्डपार्ष-
।३८॥
दायेति योगः सूचितः। यथावदिति प्रणव-

त्रिंशः पटलः

योगउक्तः॥३९-४६॥

इति प्रपञ्चसारविवरणे एकोनत्रिंशत्पटलः॥

॥अथ त्रिंशत्पटलः॥

तान्त्रिकमन्त्रानन्तरं वैदिकमन्त्रान् वदन् वेदसाररूपिण्या गायत्र्या विधानं प्रथमतः प्रतिपादयन् तद्वाच्यदेवतायाः तत्वमाह। अखिलेति, अथशब्दस्तान्त्रिकानन्तर्यार्थः। अखिलार्थानुगता शक्तिरेव गायत्री संज्ञापि भवेत्। अथ तद्विशेषानपि सहप्रयोगान् साङ्गान् प्रतिवदामीत्यन्वयः। त्रिसमव्याहृति दशावृत्तिदशप्रणवशक्तिश्री-

बीजादियुक्ता गायत्र्यो विशेषशब्दार्थेन
अखिलार्थानुगतया ताया एकरूपिण्याः शक्तेः कथं
चतुर्विंशत्यक्षरात्मकगायत्र्यात्मकत्वमित्याशं-
क्य शक्तेरपि चतुर्विंशतत्त्वात्मना चतुर्विंशति
संख्यायोगादिति वदन् गायत्र्यक्षरैः सार्धं
तत्त्वन्यासं सूचयति। युक्ता चतुर्विंशतित-
त्त्वभेदैरिति, ॥१॥ वक्ष्यामीति प्रतिज्ञातं विशेषमाह—
ताराद्यैरिति, अन्वर्थत्वं साधयति—
वेदसारमिति ॥२॥ जपादावधिकारनियममाह—
जाप्यस्स्यादिति, यथावदुपनयनादि-
पूर्वकमित्यर्थः। द्विजशब्देन रूढिमाश्रित्य
न ब्राह्मणमात्रं गृह्यते। इत्याह— भूदेव वा इ-
ति, ॥३॥ द्विजन्मे षड्वि ष्वपि शुद्धानामेवाधिकार इत्या-
ह— तेषामिति। शुद्धानामप्युपनीतानामेवा-

त्रिंशः पटलः

धिक्कार इत्याद्यारभ्येति । उपासनप्रकारानाह — सन्ध्येति, सन्ध्योपासनप्रकारमुत्तरत्र वक्ष्यति । ॥४॥ अथ ध्यानार्थं सविशेषाया गायत्र्या अर्थं वदन् प्रणवस्यार्थं सानुभवसाधनमाह — आद्यौ तारमिति, आद्यौ भवो यस्तारः असौ प्रकृति विकृति प्रोक्षितः। प्रकृतिर्निष्कला परा वाग्रूपिणी परप्रणवात्मिका कुण्डलिनी शक्तिस्तस्या विकृतिर्विकारः पश्यन्त्या पश्वादिरूपः तद्रूपेण प्रोक्षितः अभिव्यक्तः तत्रमुच्चारणात्पूर्वं पूर्णसंविदात्मना स्थितस्य पर प्राणप्रणवस्य किञ्चिद् बहिर्मुखस्यसन् स्वातन्त्र्येच्छाज्ञानप्रयत्नशरीरस्पर्शोतदन्तर्गतक्रियाज्ञानशक्तिरूपगुरुत्वकमनोन्मन्युन्मनासमना व्यापिनी स्पर्शशक्तिनादान्तनादावस्थाः प्राप्तस्य विशेषयन्

विवरणे

रूपनिरोधिन्यात्मना ज्वालाप्रवाहशब्दभेदरूपकार्य्य बिन्दुबीजात्मना चोच्चारणसमयेऽभिव्यक्तस्य प्रणवस्य सुषुम्नाप्रवेशातमं दर्शयति — तेन परानुभवप्रकारं दर्शयितुमसावित्यादिना । अभिव्यक्तः प्रणवः । मूलाधारात् आमूलाधारमुद्भूतो य आधारः आसमन्तात् स्वप्रभया गच्छतीत्याधारश्चेदग्निः ज्योतिर्लिङ्गाकारः तस्माद्विविभूतिः सन् सौषुम्नमार्गं प्रविश्य शाश्वतो भवतीत्यन्वयः । सौषुम्नमार्गं प्रविष्टे प्रणवे स्थानविशेषे वाचकरूपाकारादिस्वप्रभेदानुसन्धानं कर्तव्यमित्याह — आद्यैः शान्ता बिधिभिः स्वप्रभेदैरनुगत इतिवाचकभेदानुगतवाच्यभेदानुगमोऽपि

विधा क्र
व्यातव्यइत्याह—— मात्रेति। मात्रा कुण्डलि-
नीशक्तिः। तयान्त ब्रह्मविष्णुरुद्रेश्वरसदाशि-
वशक्तिपरस्वरूपिण्या अनुगत इत्यर्थः। उक्तवाच्य
वाचकभेदे संहारेण शुक्लज्योतिर्मात्रप्रणवो
व्यातव्यइत्याह—— शुक्लइति। मूर्धशब्देन
सर्वोत्कृष्टं द्वादशान्तस्थं तत्त्वमुच्यते। तत्र-
स्थं व्यापिन्यादि द्वारेण गत्वा शाश्वतो भव-
ति। अपरिच्छिन्नत्वेन शाश्वतत्वमुपपादयति।
।५॥
अन्तर्बहिश्चेति। एवं निर्विशेषब्रह्मार्थं
प्रणवस्योत्तमाधिकारिणः प्रदर्श्य तनानां स- मन्दा
प्रपञ्चार्थत्वमाह—— प्रकाशिनादाविति। तारा-
द्या त से र्थः ।६॥
दिषूमकान् त्रिगुणासत्वाद। वित्यक्षरासं एव प्र-
स
णवस्य गुणं निर्गुणं चार्थमभिधाय व्या-
हृतीनामर्थं वदन् भूरित्यस्यार्थमाह——

भूशब्दस्तदिति तत्पदार्थ इत्यर्थः। भूशब्दस्य कथं तत्र प्रवृत्तिः इति तत्राह — तत्पदं सदिति। तदिति पदं यस्य यस्य ब्रह्मणः त्व तस्यैव सोम्य ओं तत्सदित्यादौ सदिति प्रोक्तम्। भूश्च सत्तार्थः। अतस्तस्य तदर्थत्वं तत्पदत्वं संभवतीत्यर्थः। अतः पूर्वोक्तस्य प्रणवार्थस्य सन्मात्रत्वात् भूशब्देनापि तदेव लक्षणयोच्यते, इत्याह — सन्मात्रत्वादिति, मन्दानां चादित्यानुगतं सदादिशब्दवाच्यं सगुणं ब्रह्म भूःशब्देन प्रतिपत्तव्यमित्युक्तम्। तुशब्देन भुव इत्यस्य भू इत्यस्य भूतात्मत्वं व इत्यस्य जगदात्मनाम् जगदुत्पादनात्मत्वं च स्वीकृत्याह — भूतत्वादिति, भूतत्वं नित्यसिद्धत्वं पारमार्थिकत्वं च। भवश्शब्दस्य

संख्या
संगतिरिति प्रणवार्थेन लक्षणया मुख्यया
सम्बन्ध
वृत्त्या वा इत्यर्थः । एवमुत्तरपदानामपि प्रण-
वार्थेनैव संगतिः । स्वःशब्दस्य स्वर्गसुखा-
र्थ भव
मकत्वेनात्मार्थत्वं सुवह्नार्थत्वं चादत्याह—
।७।८॥
सर्वस्येति । महत्त्वं त्रिविधं देशतः कालतो
ष्यन्तम
वस्तुतश्च । महस्त्वं चैतन्यं ज्योतिषि इतरच्च
तदेव इति ब्रह्मैवेत्यर्थः । तस्मात्तद्व्याहृतिर्जन-
।९॥
इति शब्दार्थयोरेकत्वमप्युक्तम् । तापतयेति,
अज्ञानां संसारतापनिमित्तत्वादित्यर्थः । आ-
तापकत्वं
विद्यानुगते तु तत्सत्त्वं प्रसिद्धमेवासत्त्वम् । त्य
परत्वादिति, अनृतेभ्यः परत्वादित्यर्थः ।
